संहि॰ पतेस्ते वृष्णोरेतोधामशीय १० उपयामगृहीतोसि। उपयामगृहीतोसिह पू॰अ॰
४५ रिरसि हारियोजनो हरिभ्यान्त्वा॥ हर्य्योर्द्धानास्थसहसोमाऽइन्द्राय ११ ८
यस्ते॥ऽ अश्वसनिर्भक्षोयोगोसनिस्तस्यतऽइष्टयजुषस्तुतस्तोमस्य
शस्तोक्थस्योपहूतस्योपहूतोभक्षयामि १२ देवकृतस्यैनसः॥ देवकृत
स्यैनसोवयजनमसिमनुष्यकृतस्यैनसोवयजनमसिपितृकृतस्यैनसो
वयजनमस्यात्मकृतस्यैनसोवयजनमस्येनसऽएनसोवयजनमसि॥ ४५
यच्चाहमेनोविद्वांश्चकारयच्चाविद्वांस्तस्यसर्वस्यैनसोवयजनमसि १३

संवर्च्चसा। संवर्च्चसा पयसा सन्तनूभिरगन्महि मनसा सꣳ शिवेन। त्वष्टा सुदत्रो विदधातु रायोनु मार्ष्टु तन्वो यद्विलिष्टम् १४ समिन्द्र। णो मनसा नेषि गोभिः सꣳ सूरिभिर्म्मघवन्त्सꣳ स्वस्त्या॥ सम्ब्रह्मणा देवकृतं यदस्ति सन्देवानाꣳ सुमतौ यज्ञियानाꣳ स्वाहा १५ संवर्च्चसा। संवर्च्चसा पयसा सन्तनूभिरगन्महि मनसा सꣳ शिवेन॥ त्वष्टा सुदत्रो विदधातु रायोनु मार्ष्टु तन्वो यद्विलिष्टम् १६ धाता रातिः सविते दञ्जुषन्ता म्प्रजापतिर्न्निधिपा देवो ऽअग्निः॥ त्वष्टा विष्णुः प्रजया सꣳ ररा

णायजमानायद्रविणन्दधातुस्वाहा १७ सुगावः। सुगावोदेवाःसदनाऽअ
कर्म्मयऽआजग्मेदꣳसवनञ्जुषाणाः॥ भरमाणावहमानाहवीꣳष्य
स्मेधत्तवसवोवसूनिस्वाहा १८ याꣳ२॥ऽआवहः॥ याꣳ२॥ आवहऽउशतो
देवदेवाँस्तान्प्रेरयस्वेऽअग्नेसधस्थे॥ जक्षिवाꣳसःपपिवाꣳसश्चवि
श्वेसुङ्घर्म्मꣳस्वरातिष्ठतानुस्वाहा १९ वयꣳहि॥ त्वाप्प्रयतियज्ञेऽअ
स्मिन्नग्नेहोतारमवृणीमहीह॥ ऋधगयाऽऋधगुताशमिष्ठाःप्रजान
न्यज्ञमुपयाहिविद्वान्त्स्वाहा २० देवागातुविदः। देवागातुविदोगातुंवित्त्वा

गातुमित ॥ मनसस्प्पतऽइमन्देवय्यज्ञꣳस्वाहाव्वातेधाः २१ यज्ञयज्ञङ्ग
च्छयज्ञपतिङ्गच्छस्वांय्योनिङ्गच्छस्वाहा ॥ एषतेयज्ञोयज्ञपते
सहसूक्तवाकः सर्व्ववीरस्तञ्जुषस्वस्वाहा २२ माहिः ÷ । माहिर्ब्भूर्म्मापृ
दाकुः ॥ उरुꣳहिराजाव्वरुणश्चकारसूर्य्यायपन्थामन्वेतवाऽउ ॥ अप
देपादाप्प्रतिधातवेकरुतापवक्ताहृदयाविधश्चित् ॥ नमोव्वरुणायाभि
ष्ठितोव्वरुणस्यपाशः ÷ २३ अग्नेरनीकम् । अग्नेरनीकमपऽआविवेशा
पान्नपात्प्रतिरक्षन्नसुर्य्यम् ॥ दमेदमेसमिधंय्यक्ष्यग्नेप्प्रतितेजिह्वाघृ

Indira Gandhi National Centre for the Arts

त मुञ्चेरण्यत्स्वाहा २४ समुद्रेते । समुद्रेतेहृदयमप्प्स्वन्तः सन्त्वाविश
न्त्वोषधीरुतापः ॥ यज्ञस्यत्वायज्ञपतेसूक्तोक्तौनमोवाकेविधेमयत्स्वा
हा २५ देवीरापः । देवीरापऽएषवोगर्भस्तंसुप्रीतंसुभृतम्बिभृत
॥ देवसोमैषतेलोकस्तस्मिञ्छञ्चवक्ष्वपरिचवक्ष्व २६ अवभृथनिचु
म्पुण । निचेरुरसिनिचुम्पुणः ॥ अवदेवैर्देवकृतमेनोयासिषमवमर्त्यैर्म्मर्
त्यकृतम्पुरुराव्णोदेवरिषस्पाहिदेवानांसमिदसि २७ एजतुदशमा
स्यः । एजतुदशमास्योगर्ब्भोजरायुणासह ॥ यथायंवायुरेजतियथास

मुद्रऽएजति ॥ एवायन्दशमास्योऽअस्रज्जरायुणासह २८ यस्यैते । यज्ञि
योगर्भोयस्यैयोनिर्हिरण्ययी ॥ अङ्गान्यह्रुतायस्यतम्मात्रासमजीगमꣳ
स्वाहा २९ पुरुदस्मोविषुरूपः । पुरुदस्मोविषुरूपऽइन्दुरन्तर्महिमा
नमानञ्जधीरः । एकपदीन्द्विपदीन्त्रिपदीञ्चतुष्पदीमष्टापदीम्भुवनानु
प्रथन्ताꣳस्वाहा ३० मरुतोयस्य । मरुतोयस्यहिक्षयेपाथादिवोवि
महसः ॥ ससुगोपातमोजनः ३१ महीद्यौः । पृथिवीचनऽइमंयज्ञ
म्मिमिक्षताम् ॥ पिपृतान्नोभरीमभिः ॥ आतिष्ठ वृत्रहन्रथंयुक्ताते

Indira Gandhi National Centre for the Arts

ब्र॒ह्म॑णा॒ हरी॑॥ अ॒र्वाची॑नꣳ सु॒ते मनो॒ ग्रावा॑ कृणोतु व॒ग्नुना॑॥ उ॒प॒या॒मगृ॑-
ही॒तो᳖सीन्द्रा॑य त्वा षोड॒शिन॑ऽ ए॒ष ते॒ योनि॒रिन्द्रा॑य त्वा षोड॒शिने॑ ३३ यु॒क्ष्वा
हि। के॒शिना॒ हरी॒ वृष॑णा कक्ष्य॒प्रा॥ अथा॑न ऽ इन्द्र सोमपा गि॒रामुप॑श्रुतिं
च॒र॥ उ॒प॒या॒मगृ॑ही॒तो᳖सीन्द्रा॑य त्वा षोड॒शिन॑ऽ ए॒ष ते॒ योनि॒रिन्द्रा॑य त्वा षो-
ड॒शिने॑ ३४ इन्द्र॒मित्। इन्द्र॒मिद्धरी॑ वह॒तो᳖प्र॑तिधृष्टशवसम्॥ ऋषी॑णां
च स्तु॒तीरुप॑ य॒ज्ञं च॒ मानु॑षाणाम्॥ उ॒प॒या॒मगृ॑ही॒तो᳖सीन्द्रा॑य त्वा षोड॒शि-
ने॑ऽ ए॒ष ते॒ योनि॒रिन्द्रा॑य त्वा षोड॒शिने॑ ३५ यस्मा॒न्न जा॒तः परो॑ऽ अ॒न्यो

ऽअस्तियऽआविवेशभुवनानिविश्वा ।। प्प्रजापतिःप्प्रजयासᳬंरराणस्त्री
णिज्ज्योतीᳬंषिसचतेसषोडशी ३६ इन्द्रश्च । सम्म्राड्वरुणश्चराजातौते
भक्षञ्चक्क्रतुरग्ग्रऽएतम् ।। तयोरहमनुभक्षम्भक्षयामिवाग्देवीजुषा
णासोमस्यतृप्प्यतुसहप्प्राणेनस्वाहा ३७ अग्ग्नेपवस्व । अग्ग्नेपव
स्वस्वपाऽअस्मेवर्च्चःसुवीर्य्यम् ।। दधद्रयिम्मयिपोषम् ।। उपयाम
गृहीतोस्यग्ग्नयेत्वावर्च्चसऽएषतेयोनिरग्ग्नयेत्वावर्च्चसे ।। अग्ग्नेवर्च्च
स्विन्वर्च्चस्वाᳬंस्त्वन्देवेष्ष्वसिवर्च्चस्वानहम्मनुष्ष्येषुभूयासम् ३८ उत्ति

संहि ष्ठुन्नोजसा।उत्तिष्ठुन्नोजसासुहपीत्वीशिप्प्रेऽअवेपयः॥सोममिन्द्रच्च पू.अ.
४९ मूसुतम्॥उपयामगृहीतोसीन्द्रायत्वौजसऽएषतेयोनिरिन्द्रायत्वौज ८
से॥इन्द्रौजिष्ठौजिष्ठुस्त्वन्देवेष्ष्वस्योजिष्ठोहम्मनुष्ष्येषुभूयासम्॥३९
अदृश्श्रमस्य।अदृश्श्रमस्यकेतवोव्विरश्श्मयोजनाँ२॥ऽअनु॥भ्राजन्तो
ऽअग्नयोयथा।उपयामगृहीतोसिसूर्य्यायत्वाभ्राजायैषतेयोनिःसू
र्य्यायत्वाभ्राजाय॥सूर्य्यभ्राजिष्ठुभ्राजिष्ठुस्त्वन्देवेष्ष्वसिभ्राजिष्ठोह ४९
म्मनुष्ष्येषुभूयासम्४०उदुत्यम्।उदुत्यञ्ज्ञातवेदसंन्देवंव्वहन्तिकेतवः

दृशेविश्श्वायसूर्य्यम्।।उपयामगृहीतोसिसूर्य्यायत्वाभ्भ्राजायैषतेयोनिः
सूर्य्यायत्वाभ्भ्राजाय ४१ आजिग्घ्र। आजिग्घ्रकलशम्मह्यात्वाविशन्त्वि
न्दवः।।पुनरूर्ज्जानिवर्त्तस्वसानः सहस्रन्धुक्ष्वोरुधारापयस्वतीपुनर्म्मा
विशताद्रयिः ४२ इडेरन्ते। इडेरन्तेहव्येकाम्म्येचन्द्रेज्ज्योतेदितिसरस्वति
महिविश्श्रुति।।एतातेऽअग्घ्न्येनामानिदेवेभ्भ्योमासुकृतम्ब्रूतात् ४३ वि
नः।।ऽइन्द्रमृधोजहिनीचायच्छपृतन्यतः।।योऽअस्माँ २।।ऽअभिदास
त्यधरङ्गमयातमः।।उपयामगृहीतोसीन्द्रायत्वाविमृधऽएषतेयोनिरि

Indira Gandhi National Centre for the Arts

संहि॰ न्द्रायत्वाविमृधे ४४ वाचस्प्पतिं।विश्श्वकर्म्माणमूतयेमनोजुवंवाजेऽअद्या पू॰अ॰

५० हुवेम॥सनोविश्श्वानिहवनानिजोषद्विश्श्वशम्भूरवसेसाधुकर्म्मा॥उपयाम ८

गृहीतोसीन्द्रायत्वाविश्श्वकर्म्मणऽएषतेयोनिरिन्द्रायत्वाविश्श्वकर्म्मणे ४५

विश्श्वकर्म्मन्हविषा॥विश्श्वकर्म्मन्हविषावर्द्धनेनत्रातारमिन्द्रमकृणोरवद्ध्य

म्॥तस्मैविशःसमनमन्तपूर्वीरयमुग्ग्रोविहव्व्योयथासत्।उपयामगृही

तोसीन्द्रायत्वाविश्श्वकर्म्मणऽएषतेयोनिरिन्द्रायत्वाविश्श्वकर्म्मणे ४६ उ ५०

पयामगृहीतोसि।उपयामगृहीतोस्यग्नयेत्वागायत्त्रछन्दसङ्गृह्णामीन्द्रा

Indira Gandhi National Centre for the Arts

यत्वाग्निर्बृहच्छन्दसङ्गृह्णामिग्निभ्यस्त्वादेवेभ्योजगच्छन्दसङ्गृह्णाम्य
नुष्टुप्तेभिगरः॥४७ब्रेशीनान्त्वा। ब्रेशीनान्त्वापत्मन्नाधूनोमिकुकूननी
नान्त्वापत्मन्नाधूनोमिभन्दनानान्त्वापत्मन्नाधूनोमिमदिन्तमानान्त्वा
पत्मन्नाधूनोमिमधुन्तमानान्त्वापत्मन्नाधूनोमिशुक्रन्त्वाशुक्रआधू
नोम्यह्नोरूपेसूर्यस्यरश्मिषु ४८ ककुभंरूपम्॥वृषभस्यरोचते
बृहच्छुक्रःशुक्रस्यपुरोगाःसोमःसोमस्यपुरोगाः॥यत्तेसोमादाभ्य
नामजागृवितस्मैत्वागृह्णामितस्मैतेसोमसोमायस्वाहा ४९ उशिक्त्वम्।

Indira Gandhi National Centre for the Arts

संहि· उशिक्त्वन्देवसोमाग्नेःप्प्रियम्पाथोपीहिवशीत्वन्देवसोमेन्द्रस्यप्प्रियम्पा पू·अ·
५१ थोपीह्यस्मत्सखात्वन्देवसोमविश्श्वेषान्देवानाम्प्रियम्पाथोपीहि ५० इ ८
यरतिःऽइहरतिरिहरमध्वमिहधृतिरिहस्वधृतिःस्वाहा ॥ उपसृजन्धरुणम्मा
त्रेधरुणोमातरन्धयन् ॥ रायस्पोषमस्मासुदीधरत्स्वाहा ५१ सत्रस्यऽऋ
द्धिः। सत्रस्यऽऋद्धिरस्यगन्मज्ज्योतिरमृताऽअभूम ॥ दिवम्पृथिव्याऽ
अद्ध्यारुहामाविदामदेवान्त्स्वर्ज्ज्योतिः ५२ युवन्तम्। युवन्तमिन्द्रापर्वतापु ५१
रोयुधायोनःपृतन्यादपतन्तमिद्धतंवज्रेणतन्तमिद्धतम् ॥ दूरेचत्तायच्छ

न्त्सुह्वैनं यद्विनक्षत ॥ अस्माकꣳ शत्रून्परि शूर विश्वतो दर्मा दर्षीष्ट
विश्वतः ॥ भूर्भुवः स्वः सुप्रजाः प्रजाभिः स्याम सुवीरा वीरैः सुपोषाः
पोषैः ५३ परमेष्ठ्यभिधीतः ॥ प्रजापतिर्वाचि व्याहृतायामन्धो ऽअच्छे
तः सविता सन्न्यां विश्वकर्मा दीक्षायां पूषा सोमक्रयण्यामिन्द्रश्च ५४
इन्द्रश्च । मरुतश्च क्रयायोपोत्थितोऽसुरः पण्यमानो मित्रः क्रीतो वि
ष्णुः शिपिविष्ट ऽऊरावासन्नो विष्णुर्न्नरन्धिषः प्रोह्यमाणः ५५ प्रो
ह्यमाणः सोम ऽआगतो वरुण ऽआसन्द्यामासन्नोऽग्निराग्नीध्र ऽइन्द्रो

संहि॰ हविर्द्धानेयद्वेपावह्रियमाणोविश्श्वेदेवाः ५६ विश्श्वेदेवाःविश्श्वेदेवाऽ पू॰अ॰
५२ ऽअꣳशुषुन्युप्तोविष्णुराप्रीतपाऽ आप्याय्यमानोयमःसूयमा ८
नोविष्णुःसम्भ्रियमाणोवायुःपूयमानःशुक्रःपूतःशुक्रःक्षीरश्री
र्मन्थीसक्तुश्रीर्विश्श्वेदेवाः ५७ विश्श्वेदेवाःविश्श्वेदेवाश्चमसेषून्नी
तोसुर्होमायोद्यतोरुद्रोहूयमानोवातोभ्यावृत्तोनृचक्षाःप्प्रतिख्या
तोभक्षोभक्ष्यमाणःपितरोनाराशꣳसाः ५८ सन्नःसिन्धुःसन्नः ५२
सिन्धुरवभृथायोद्यतःसमुद्रोभ्यवह्रियमाणःसलिलःप्प्रप्लुतोययो

रोजसा स्कभितारजांसि वीर्येभिर्वीरतमा शविष्ठा ॥ याऽपत्येतेऽ अ
प्रतीता सहोभिर्विष्णूऽ अगन्वरुणा पूर्वहूतौ ५९ देवान्दिवम्। देवा
न्दिवमगन्यज्ञस्ततो मा द्रविणमष्टु मनुष्यानन्तरिक्षमगन्यज्ञस्ततो मा
द्रविणमष्टु पितॄन्पृथिवीमगन्यज्ञस्ततो मा द्रविणमष्टु यङ्कञ्च लोकम
गन्यज्ञस्ततो मे भद्रमभूत् ६० चतुस्त्रिँशत्तन्तवः। चतुस्त्रिँशत्तन्त
वो ये वितत्निरे यऽ इमं यज्ञँ स्वधया ददन्ते ॥ तेषां छिन्नँ सम्वे
तद्दधामि स्वाहा घर्मोऽ अप्येतु देवान् ६१ यज्ञस्य दोहः। यज्ञस्य दोहो

 वितेतः पुरुत्रासोऽअष्टधादिवमन्वाततान ॥ सयज्ञन्धुक्ष्वमहिमेप्रजा 
 यांरायस्पोषंविश्वमायुरशीयस्वाहा ६२ आपवस्व । आपवस्वहिरण्यव 
दश्ववत्सोमवीरवत् ॥ वाजङ्गोमन्तमाभरस्वाहा ६३ ॥ २३ इतिसंहिता
यांअष्टमोध्यायः ८ देवसवितः । देवसवितःप्रसुवयज्ञम्प्रसुवयज्ञप
तिम्भगाय ॥ दिव्योगन्धर्वःकेतपूःकेतन्नःपुनातुवाचस्पतिर्वाजन्नः
स्वदतुस्वाहा १ ध्रुवसदन्त्वा । नृषदम्मनःसदमुपयामगृहीतोसीन्द्राय 
त्वाजुष्टङ्गृह्णाम्म्येषतेयोनिरिन्द्रायत्वाजुष्टतमम् । अप्सुषदन्त्वाघृत

सदं व्योमसदमुपयामगृहीतोसीन्द्रायत्वाजुष्टङ्गृह्णाम्म्येषतेयोनिरिन्द्रा
यत्वाजुष्टतमम्। पृथिवीसदन्त्वान्तरिक्षसदन्दिविसदन्देवसदन्नाकस
दमुपयामगृहीतोसीन्द्रायत्वाजुष्टङ्गृह्णाम्म्येषतेयोनिरिन्द्रायत्वाजुष्टत
मम् २ अपाꣳरसम्। अपांꣳरसमुद्वयसꣳ सूर्य्येसन्तꣳ समाहितम्।
अपाꣳरसस्ययोरसस्तंवोगृह्णाम्म्युत्तममुपयामगृहीतोसीन्द्रायत्वाजुष्टं
गृह्णाम्म्येषतेयोनिरिन्द्रायत्वाजुष्टतमम् ३ ग्रहाऽऊर्ज्जाहुतयः। ग्रहाऽ
ऊर्ज्जाहुतयोव्यन्तोविप्प्रायमतिम्। तेषांविशिप्प्रियाणांवोहमिषमूर्ज्जꣳ

संहि॰ समग्ग्रभमुपयामगृहीतोसीन्द्रायत्वाजुष्टंङ्गृह्णाम्म्येषतेयोनिरिन्द्राय पू॰अ॰
५४ त्वाजुष्टतमम् ॥ सम्पृचौस्थःसम्माभद्रेणपृङ्क्तंविपृचौस्थोविमापाप्म ९
नापृङ्क्तम् ॥४॥ इन्द्रस्यवज्ज्रः। इन्द्रस्यवज्ज्रोसिवाजसास्त्वयायंवा
जंसेत्वाजस्यनुप्प्रसवेमातरम्महीमदितिन्नामवच्चसाकरामहे ॥
यस्यामिदंविश्वम्भुवनमाविवेशतस्यान्नोदेवःसविताधर्म्मसाविषत्
५ अप्स्वन्तः। अप्स्वन्तरमृतमप्सुभेषजमपामुतप्प्रशस्तिष्वश्वाभ ५४
वतवाजिनः॥ देवीरापोयोवऊर्म्मिःप्प्रतूर्तिःककुन्मान्वाजसास्तेना

यंव्वाजर्ठ॰सेत् ६ व्वातोवा। व्वातोवामनोवागन्धर्व्वाः सप्तविर्ठ॰शतिः॥ तेऽ
अग्ग्रेऽश्श्वमयुञ्जँस्तेऽअस्म्मिञ्जवमादधुः ७ व्वातरर्ठ॰हाभव व्वाजिन्न्यु
ज्ज्यमानऽइन्द्रस्येवदक्षिणःश्श्रियैधि॥ युञ्जन्तुत्वामरुतोव्विश्ववेदसऽ
आतेत्वष्टापत्सुजवन्दधातु ८ जवोयः। जवोयस्तेव्वाजिन्निहितोगुहायः
श्येनेपरीत्तोऽअचरच्चव्वाते॥ तेननोव्वाजिन्बलवान्बलेनव्वाजजिच्चभवस
मनेचपारयिष्णुः॥ व्वाजिनोव्वाजजितोव्वाजर्ठ॰सरिष्यन्तोबृहस्पतेर्भा
गमवजिघ्रत ९ देवस्याहम्। देवस्याहर्ठ॰सवितुःसवेसत्यसवसोबृहस्प

Indira Gandhi National Centre for the Arts

संहि तैरुत्तमन्नाकꣳरुहेयम्॥ देवस्याहꣳसवितुःसवेसत्यसवसऽइन्द्र शु·अ·
५५ स्योत्तमन्नाकꣳरुहेयम्॥ देवस्याहꣳसवितुःसवेसत्यप्प्रसवसोबृ ९
हस्प्पतेरुत्तमन्नाकमरुहम्॥ देवस्याहꣳसवितुःसवेसत्यप्प्रसवसऽ
इन्द्रस्योत्तमन्नाकमरुहम् १० बृहस्प्पतेबाजम्। बृहस्प्पतेबाजञ्जय
बृहस्प्पतयेबाचंबदतबृहस्प्पतिंबाजञ्जापयत। इन्द्रबाजञ्जयेन्द्रा
यबाचंबदतेन्द्रंबाजञ्जापयत ११ एषावः। एषावःसासत्यासंबाग ५५
भूद्ययाबृहस्प्पतिंबाजमजीजपताजीजपतबृहस्प्पतिंबाजंबनस्प्प

तयोविमुञ्चध्वम्। एषा वः सा सत्या संवागभूद्ययेन्द्रं वाजमजीजपताजी
जपतेन्द्रं वाजं वनस्पतयोविमुञ्चध्वम् १२ देवस्याहम्। देवस्याहꣳ सवि
तुः सवे सत्यप्रसवसो बृहस्पतेर्वाजजितो वाजं जेषम्। वाजिनो वाज
जितोऽध्वनः स्कभ्नुवन्तो योजना मिमानाः काष्ठां गच्छत १३ एष स्यः। एष स्य
वाजि क्षिपणिं तुरण्यति ग्रीवायां बद्धोऽअपिकक्षऽआसनि॥ क्रतुं दधि
क्राऽअनु सꣳसनिष्यदत्पथामङ्काꣳस्यन्वापनीफणत्स्वाहा १४ उत
स्मा। उत स्मास्य द्रवतस्तुरण्यतः पर्णं न वेरनुवाति प्रगर्धिनः॥ श्येनस्ये

संहि॰ वृजेनोऽअङ्गसम्परिदधिक्राव्णः सहोर्जा तरित्रतः स्वाहा १५ शा पू॰अ॰
५६ न्नेः । शन्नो भवन्तु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः ॥ जम्भयन्तोऽहिं ९
वृकं रक्षांसि सनेम्यस्मद्युयवन्नमीवाः १६ तेनेः । तेनोऽअर्वन्तो
हवनश्रुतो हवं विश्वे शृण्वन्तु वाजिनो मितद्रवः । सहस्रसा मेधसाता
सनिष्यवो महो ये धनं समिथेषु जभ्रिरे १७ वाजेवाजेवत । वाजिनो
नो धनेषु विप्राऽअमृताऽऋतज्ञाः ॥ अस्य मध्वः पिबत मादयध्वं तृप्ता ५६
यात पथिभिर्देवयानैः १८ आ मा वाजस्य प्रसवो जगम्यादेमे द्यावापृ

थिवीव्विश्श्वरूपे॥ आमागन्ताम्पितरामातराचामासोमो ऽ अमृतत्त्वेन
गम्म्यात्॥ व्वाजिनोव्वाजजितोव्वाजꣳ सस्सृवाꣳसोबृहस्प्पतेर्ब्भागमव
जिग्घ्रतनिमृजानाः १९ आपयेस्वाहा। स्वापयेस्वाहापिजायस्वाहाक्क्र
तवेस्वाहावसवेस्वाहाहर्प्पतयेस्वाहाह्ने मुग्धायस्वाहामुग्धायवैनꣳ
शिनायस्वाहाविनꣳशिन ऽ आन्त्यायनायस्वाहान्त्यायभौवनायस्वाहा
भुवनस्यपतयेस्वाहाधिपतयेस्वाहा २० आयुर्य्यज्ञेन। कल्प्पताम्प्राणो
यज्ञेनकल्प्पताञ्चक्षुर्य्यज्ञेनकल्प्पताꣳ श्रोत्रंय्यज्ञेनकल्प्पतामॄ

Indira Gandhi National Centre for the Arts

संहि॰ ष्ठंय्यज्ञेनकल्प्यतांय्यज्ञोयज्ञेनकल्प्यताम् ॥ प्रजापतेःप्प्रजाऽअभूमस्व शु॰अ॰
५७ र्द्देवाऽअगन्मामृताऽअभूम २१ अस्म्मेवः। अस्म्मेवोऽअस्त्विन्द्रियमस्म्मेनृ ९
म्म्णमुतक्क्रतुरस्म्मेवर्च्चा ᳪंसिसन्तुवः। नमोमात्रेपृथिव्व्यैनमोमात्रेपृथि
व्व्याऽइयन्तेराड्यन्तासियमनोद्ध्रुवोसिधरुणः ॥ कृष्ष्यैत्त्वाक्षेमायत्त्वारय्यै
त्त्वापोषायत्त्वा २२ व्वाजस्स्येमम्। व्वाजस्स्येमम्प्रसवःसुषुवेग्ग्रेसोमᳪंराजान
मोषधीष्ष्वप्सु ॥ ताऽअस्म्मभ्यम्मधुमतीर्ब्भवन्तुव्वयᳪंराष्ट्रेजागृयामपुरो ५७
हिताःस्वाहा २३ व्वाजस्स्येमाम् ॥ व्वाजस्स्येमाम्प्रसवःशिश्रियेदिवमिमाचविश्वा

श्श्वा भुवनानि सम्म्राट् । अदित्सन्तन्दापयति प्प्रजानन्त्सनो रयिर्ठं
सर्व्ववीरन्नियच्छतु स्वाहा २४ व्वाजस्यनु । प्प्रसव ऽ आबभूवेमाञ्च
विश्श्वा भुवनानि सर्व्वतः ॥ स नेमिराजा परियाति व्विद्वान्प्रजाम्पुष्टिं व्व
र्द्धयमानो ऽ अस्म्मे स्वाहा २५ सोमर्ठं राजानम् । सोमर्ठं राजानमवसे
ऽग्निमन्वारभामहे ॥ आदित्यान्विष्ष्णुर्ठं सूर्य्यम्ब्रह्माणञ्च बृहस्प
तिर्ठं स्वाहा २६ अर्य्यमणम्बृहस्पतिम् । अर्य्यमणम्बृहस्पतिमि
न्द्रन्दानाय चोदय ॥ व्वाचं व्विष्ष्णुर्ठं सरस्वतीर्ठं सवितारञ्च व्वाजिनर्ठं

Indira Gandhi National Centre for the Arts

स्वाहा २७ अग्नेअच्छ। अग्नेऽअच्छावदेहनः प्प्रतिनः सुमनाभव॥प्र
नोयच्छसहस्रजित्त्वꣳहिधनदाऽअसिस्वाहा २८ प्रनः। प्रनोयच्छत्व
र्य्यमाप्प्रपूषाप्प्रबृहस्प्पतिः। प्रवाग्देवीददातुनः स्वाहा २९ देवस्य
त्त्वासवितुः प्प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम्। सरस्व
त्यैवाचोयन्तुर्य्यन्त्रियेदधामिबृहस्प्पतेष्ट्वासाम्म्राज्ज्येनाभिषिञ्चा
म्यसौ ३० अग्निरेकाक्षरेण। प्प्राणमुदजयत्तमुज्जेषमश्विनौद्व्य
क्षरेणद्विपदोमनुष्ष्यानुदजयताँस्तानुज्जेषंविष्ष्णुस्त्र्यक्षरेणत्त्रीँ

ल्लोँकानुदजयत्तानुज्जेषर्ठ्ठंसोमश्चतुरक्षरेणचतुष्पदःपशूनुदजय
त्तानुज्जेषम्पूषापञ्चाक्षरेण ३१ पूषापञ्चाक्षरेणपञ्चदिशऽउदज
यत्ताऽउज्जेषर्ठ्ठंसविताषडक्षरेणषड्ऋतूनुदजयत्तानुज्जेषम्मरुतःस
प्ताक्षरेणसप्तग्ग्राम्यान्पशूनुदजयँस्तानुज्जेषम्बृहस्पतिरष्टाक्ष
रेणगायत्रीमुदजयत्तामुज्जेषम्मित्रोनवाक्षरेण ३२ मित्रोनवाक्षरेण
त्रिवृतꣳस्तोममुदजयत्तमुज्जेषंवरुणोदशाक्षरेणविराजमुदजयत्ता
मुज्जेषमिन्द्रऽएकादशाक्षरेणत्रिष्टुभमुदजयत्तामुज्जेषंविश्वेदेवाद्वा

Indira Gandhi National Centre for the Arts

संहि· दशाक्षरेणजगतीमुदजयुँस्तामुज्जेषं वसवस्त्रयोदशाक्षरेण ३३ वसवस्त्रयोदशाक्षरेण पू·अ·
५९ वसवस्त्रयोदशाक्षरेण। त्रयोदशँ स्तोममुदजयुँस्तमुज्जेषँ रुद्राश्चतु ९
र्दशाक्षरेणचतुर्दशँ स्तोममुदजयुँस्तमुज्जेषमादित्याः पञ्चदशाक्ष
रेणपञ्चदशँ स्तोममुदजयुँस्तमुज्जेषमदितिः षोडशाक्षरेणषोडश
ँ स्तोममुदजयन्तमुज्जेषम्प्रजापतिः सप्तदशाक्षरेणसप्तदशँ स्तो
ममुदजयन्तमुज्जेषम् ३४ एषते। निर्ऋतेभागस्तञ्जुषस्वस्वाहाग्निने ५९
त्रेभ्योदेवेभ्यः पुरःसद्भ्यःस्वाहायमनेत्रेभ्योदेवेभ्योदक्षिणास

न्द्युः स्वाहाविश्वदेवनेत्रेभ्योदेवेभ्यः पश्चात्सद्भ्युः स्वाहामित्रावरुणने
त्रेभ्योवामुरुन्नेत्रेभ्योवादेवेभ्यऽउत्तरासद्भ्युः स्वाहासोमनेत्रेभ्योदे
वेभ्यऽउपरिसद्भ्योदुवस्वन्द्युः स्वाहा ३५ येदेवाऽअग्निनेत्राः पुरःसद
स्तेभ्युः स्वाहायेदेवायमनेत्रादक्षिणासदस्तेभ्युः स्वाहायेदेवाविश्व
देवनेत्राः पश्चात्सदस्तेभ्युः स्वाहायेदेवामित्रावरुणनेत्रावामुरुन्नेत्रा
वोत्तरासदस्तेभ्युः स्वाहायेदेवाः सोमनेत्राऽउपरिसदोदुवस्वन्तस्ते
भ्युः स्वाहा ३६ अग्नेसहस्व। अग्नेसहस्वपृतनाऽअभीमातीरपास्य

संहि·

६० ॥दुष्टरस्तरन्नरातीर्व्वर्च्चोधायज्ञवाहसि ३७ देवस्यत्वा।सवितुःप्प्रसवे पू·अ·

श्विनोर्ब्बाहुभ्याम्पूष्णोहस्ताभ्याम्।उपाᳪंशोर्व्वीर्य्येणजुहोमिहत ९

ᳪंरक्षःस्वाहारक्षसान्त्वावधायावधिष्ष्मरक्षोवधिष्ष्मामुमसौहतः

३८ सवितात्वासवानाᳪंसुवतामग्निर्ग्गृहपतीनाᳪंसोमोवनस्प्पती

नाम्॥बृहस्प्पतिर्व्वाचऽइन्द्रोज्ज्यैष्ठ्यायरुद्रःपशुभ्योमित्रःसत्योव

रुणोधर्म्मपतीनाम् ३९ इमन्देवाः।इमन्देवाऽअसपत्नᳪंसुवद्ध्वम्महते

क्षत्त्रायमहतेज्ज्यैष्ठ्यायमहतेजानराज्ज्यायेन्द्रस्येन्द्रियाय॥इमममुष्ष्य ६०

Indira Gandhi National Centre for the Arts

पुत्रमुमुष्यैपुत्रमुष्यैविश एषवोमीराजासोमोस्माकंब्राह्मणाना

ꣳराजा ४०॥८॥ इतिश्रीसंहितायांनवमोऽध्यायः ९ अपोदेवाः २।

अपोदेवामधुमतीरगृभ्णन्नूर्ज्जस्वतीराजस्वश्चितानाः ॥याभिर्म्मि

त्रावरुणावुभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः १ वृष्ण्णऽऊ

र्मिः २ वृष्ण्णऽऊर्म्मिरंसिराष्ट्रदाराष्ट्रम्मेदेहिस्वाहा वृष्ण्णऽऊर्म्मिरंसिराष्ट्रदा

राष्ट्रममुष्मैदेहि वृषसेनोसिराष्ट्रदाराष्ट्रम्मेदेहिस्वाहा वृषसेनोसि

राष्ट्रदाराष्ट्रममुष्मैदेहि अर्थेतस्स्थ २ अर्थेतस्स्थराष्ट्रदाराष्ट्रम्मेदत्त

 स्वाहार्थेतस्थराष्ट्रदाराष्ट्रममुष्मैदत्तौजस्वतीस्थराष्ट्रदाराष्ट्रंमेद 
 त्तस्वाहौजस्वतीस्थराष्ट्रदाराष्ट्रममुष्मैदत्तापः परिवाहिणीस्थराष्ट्रदा 
राष्ट्रंमेदत्तस्वाहापः परिवाहिणीस्थराष्ट्रदाराष्ट्रममुष्मैदत्तापाम्प
तिरसिराष्ट्रदाराष्ट्रंमेदेहिस्वाहापाम्पतिरसिराष्ट्रदाराष्ट्रममुष्मैदेह्य
पाङ्गर्भोसिराष्ट्रदाराष्ट्रंमेदेहिस्वाहापाङ्गर्भोसिराष्ट्रदाराष्ट्रममुष्मैदे
हिसूर्य्यत्वचस्स्थ ३ सूर्य्यत्वचसस्थ। राष्ट्रदाराष्ट्रंमेदत्तस्वाहासू 
र्य्यत्वचसस्थराष्ट्रदाराष्ट्रममुष्मैदत्तसूर्य्यवर्चसस्थराष्ट्रदाराष्ट्रंमे

दत्तस्वाहासूर्य्यवर्च्चसस्थराष्ट्रदाराष्ट्रममुष्मैदत्तमान्दास्थराष्ट्रदाराष्ट्र
म्मेदत्तस्वाहामान्दास्थराष्ट्रदाराष्ट्रममुष्मैदत्तव्रजक्षितस्थराष्ट्रदारा
ष्ट्रम्मेदत्तस्वाहाव्रजक्षितस्थराष्ट्रदाराष्ट्रममुष्मैदत्तवाशास्थराष्ट्रदा
राष्ट्रम्मेदत्तस्वाहावाशास्थराष्ट्रदाराष्ट्रममुष्मैदत्तशविष्ठास्थराष्ट्रदारा
ष्ट्रम्मेदत्तस्वाहाशविष्ठास्थराष्ट्रदाराष्ट्रममुष्मैदत्तशक्वरीस्थराष्ट्रदारा
ष्ट्रम्मेदत्तस्वाहाशक्वरीस्थराष्ट्रदाराष्ट्रममुष्मैदत्तजनभृतस्थराष्ट्रदा
राष्ट्रम्मेदत्तस्वाहाजनभृतस्थराष्ट्रदाराष्ट्रममुष्मैदत्तविश्वभृतस्थरा

Indira Gandhi National Centre for the Arts

ष्ट्रदाराष्ट्रम्मैदत्तस्वाहावृष्ण्युभ्रन्तस्थराष्ट्रदाराष्ट्रममुष्मैदत्तापःस्व
राजस्थराष्ट्रदाराष्ट्रममुष्मैदत्त॥ मधुमतीर्म्मधुमतीभिः पृच्यन्ताम्म
हिक्षत्रङ्क्षत्रियायवन्वानाऽअनाधृष्टाः सीदतसहौजसोमहिक्षत्रङ्क्षत्रि
यायदधतीः ४ शतम् ४०० ॥ सोमस्यत्विषिः। सोमस्यत्विषिरसितवे
वमेत्विषिर्भूयात्॥ अग्नयेस्वाहासोमायस्वाहासवित्रेस्वाहासरस्व
त्यैस्वाहापूष्णेस्वाहाबृहस्पतयेस्वाहेन्द्रायस्वाहाघोषायस्वाहाश्लो
कायस्वाहांशायस्वाहाभगायस्वाहार्यम्णेस्वाहा ५ पवित्रेस्थः

।पवित्रेस्त्थोवैष्ण्णव्व्यौसवितुर्वः प्प्रसवऽउत्त्पुनाम्म्यच्छिद्द्रेणपवित्त्रे
णसूर्य्यस्यरश्मिभिः ॥ अनिभृष्टमसिव्वाचोबन्धुस्तपोजाः सोमस्य
दात्त्रमसिस्वाहाराजस्वः ६ सधमादोद्द्युम्म्निनीः। सधमादोद्द्युम्म्नि
नीरापऽएताऽअनाधृष्टाऽअपस्योव्वसानाः॥ पस्त्त्यासुचक्क्रेव्वरुणःसं
धस्थमपांᳬशिशुर्म्मातृतमास्वन्तः ७ क्षत्त्रस्योल्ल्बम्। क्षत्त्रस्योल्ल्ब
मसिक्षत्त्रस्यजराय्व्वसिक्षत्त्रस्ययोनिरसिक्षत्त्रस्यनाभिरसीन्द्रस्यव्वा
र्त्रघ्घ्नमसिमित्त्रस्यासिव्वरुणस्यासित्त्वयायंव्वृत्त्रंव्वधेत्॥ दृवासिरुजा

Indira Gandhi National
Centre for the Arts

संहि· सिक्कुमासि॥ पातैनम्प्राञ्चम्पातैनम्प्रत्यञ्चम्पातैनन्तिर्य्यञ्चन्दिग्भ्यः पू·अ·
६३ पात ८ आविर्म्मर्य्याः। आविर्म्मर्य्या ऽ आवित्तो ऽ अग्निर्गृहपतिरावित्त ऽ १०
इन्द्रो वृद्धश्रवा ऽ आवित्तो मित्रावरुणो धृतव्रतावावित्तः पूषा विश्ववे
दा ऽ आवित्ते द्यावापृथिवी विश्वशम्भुवावावित्तादितिरुरुशर्म्मा ९ अवे
ष्टा दन्दशूकाः। अवेष्टा दन्दशूकाः प्राचीमारोह गायत्री त्वावतु रथन्त
रꣳ साम त्रिवृत्स्तोमो वसन्त ऽ ऋतुर्ब्रह्म द्रविणन्दक्षिणामारोह १० द ६३
क्षिणामारोह। त्रिष्टुप्त्वावतु बृहत्साम पञ्चदशस्तोमो ग्रीष्म ऽ ऋतुः

सं॰हि षसोविरोक ऽ उभाविन्द्रा ऽ उदिथः सूर्य्यश्च ॥ आरोहतंवरुणमित्रगर्त्तन्त शु॰अ॰
६४ तंश्चक्षाथामदितिन्दितिञ्चमित्रोसिवरुणोसि १६ सोमस्यत्वाद्युम्नेना १०
भिषिञ्चाम्म्यग्ग्नेर्भ्राजसासूर्य्यस्यवर्च्चसेन्द्रस्येन्द्रियेण। क्षत्राणा
ङ्क्षत्रपतिरेद्ध्यतिदिद्यून्पाहि १७ इमन्देवाः। इमन्देवा ऽ असपत्न्नꣳसु
वद्ध्वम्महतेक्षत्रायमहतेज्ज्यैष्ठ्यायमहतेजानराज्ज्यायेन्द्रस्येन्द्रिया
य ॥ इममुमुष्ष्यपुत्रममुष्ष्यैपुत्रमस्यैविश ऽ एषवोमीराजासोमो- ६४
स्म्माकम्ब्राह्मणानाꣳराजा १८ प्रपर्व्वतस्य। वृषभस्यपृष्ठान्नावश्च

Indira Gandhi National

रन्तिस्वसिचऽइयानाः॥ ताऽआववृत्रन्नधरागुदक्ताऽऽअहिम्बुध्न्य
मनुरीयमाणाः॥ विष्णोर्विक्रमणमसि विष्णोर्विक्रान्तमसि वि
ष्णोः क्रान्तमसि १९ प्रजापतेन। त्वदेतान्यन्योविश्वारूपाणिप
रिताबभूव॥ यत्कामास्तेजुहुमस्तन्नोऽअस्त्वयममुष्यपितासाव
स्यपितावयꣳस्यामपतयोरयीणाꣳस्वाहा॥ रुद्रयत्तेक्रिविपर
न्नामतस्मिन्हुतमस्यमेष्टमसिस्वाहा २० इन्द्रस्यवज्रः। इन्द्रस्यव
ज्रोसिमित्रावरुणयोस्त्वाप्रशास्त्रोः प्रशिषायुनज्मि॥ अव्यथा

यैत्वासुधायैत्वारिष्ठो ऽ अर्ज्जुनोमरुताम्प्रसवेनजयापाममनसासमिन्द्रि
येण २१ मातै। मात ऽ इन्द्रतेवयन्तुराषाडयुक्तासो ऽ अब्रह्मताविदसा-
म ॥ तिष्ठारथमधियंवज्रहस्तारश्मीन्देवयमसेस्वश्वान् २२ अग्नये
गृहपतये। अग्नयेगृहपतयेस्वाहासोमायवनस्पतयेस्वाहामरुता
मोजसेस्वाहेन्द्रस्येन्द्रियायस्वाहा। पृथिविमातर्म्मामाहिꣳसीर्म्मो ऽ
अहन्त्वाम् २३ हꣳसः शुचिषत्। हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता 
वेदिषदतिथिर्द्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमसदब्जागोजा ऽ ऋतजा

ऽअह्रिं जाऽक्रतंम्मृहत् २४ इयंदसि। इयंदुस्यायुरस्यायुर्म्मयिधेहि
युङ्ङसिवर्च्चोसिवर्च्चोमयिधेह्यूर्ग्गस्यूर्ज्जम्मयिधेहि॥इन्द्रस्यवांवी
र्य्यकृतोबाहूऽअभ्युपावहरामि २५ स्योनासि। सुषदासिक्षत्रस्ययो
निरसि॥ स्योनामासीदसुषदामासीदक्षत्रस्ययोनिमासीद २६ निषसा
द। धृतव्व्रतोवरुणः पस्त्यास्वा। साम्म्राज्ज्यायसुक्रतुः २७ अभिभूर
सि। अभिभूरस्येतास्तेपञ्चदिशः॥कल्प्यन्ताम्ब्रह्मँस्त्वंब्रह्मासिस
वितासिसत्यप्रसवोवरुणोसिसत्यौजाऽइन्द्रोसिविशौजारुद्रोसिसुशे

संहि॰ वः॥ बहुकारश्रेयस्करभूयस्करेन्द्रस्यवज्रोसितेनमेरध्य २८ अग्निः पू॰अ॰
६६ पृथुः। अग्निः पृथुर्द्धर्मणस्पतिर्ज्जुषाणोऽअग्निः पृथुर्धर्मणस्प १०
तिराज्ज्यस्यवेतुस्वाहास्वाहाकृताः। सूर्य्यस्यरश्मिभिर्य्यतध्वꣳसजा
तानाम्मध्यमेष्ठ्याय २९ सवित्राप्प्रसवित्रा। सरस्वत्यावाचात्वष्ट्रारूपैः
पूष्णापशुभिरिन्द्रेणास्मेबृहस्पतिनाब्रह्मणावरुणेनौजसाग्निना
तेजसासोमेनराज्ञाविष्णुनादशम्म्यादेवतयाप्प्रसूतःप्प्रसर्प्पामि ३० ६६
अश्विभ्याम्पच्यस्व। अश्विभ्याम्पच्यस्वसरस्वत्यैपच्यस्वेन्द्रायसुत्रा

म्मोपञ्चयस्व ॥ वायुः पूतः पवित्रेण प्रत्यङ्क्सोमो ऽअतिस्रुतः ॥ इन्द्रस्य
युज्यः सखा ३१ कुविदङ्ग । यवमन्तो यवंचिद्यथा दान्त्यनुपूर्वं वियूय । इ
हेहैषां कृणुहि भोजनानि ये बर्हिषो नम ऽउक्तिं यजन्ति । उपयामगृहीतो
स्यश्विभ्यान्त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्णे ३२ युवꣳ सुराममं । युव
ꣳ सुराममश्विना नमुचावासुरे सचा ॥ विपिपाना शुभस्पती ऽइन्द्रङ्कर्म
स्वावतम् ३३ पुत्रमिव पितरौ । पुत्रमिव पितरावश्विनोभेन्द्रावथुः का
व्यैर्दꣳसनाभिः ॥ यत्सुरामं व्यपिबः शचीभिः सरस्वती त्वा मघवन्नभि-

 ष्याकृ ३४॥८॥ इतिश्रीसंहितायांदशमोऽध्यायः१० युञ्जानःप्रथम 
 म्। युञ्जानःप्रथमम्मनस्तत्वायसविताधियः। अग्नेर्ज्योतिर्निचाय्य 
पृथिव्याऽअध्याभरत् १ युक्तेनमनसा। वयन्देवस्यसवितुःसवे।स्वर्ग्या
यशक्त्या २ युक्त्वायसविता।देवान्त्स्वर्य्यतोधियादिवम्। बृहज्ज्योतिःकरि
ष्यतःसविताप्रसुवातितान् ३ युञ्जतेमनः युञ्जतेमनऽउतयुञ्जतेधि
योविप्राविप्रस्यबृहतोविपश्चितः॥विहोत्रादधेवयुनाविदेकऽइन्मही 
देवस्यसवितुःपरिष्टुतिः ४ युजेवाम्। युजेवाम्ब्रह्मपूर्व्यन्नमोभिर्विश्लोक

ऽएतुपथ्येवसूरेः। शृण्वन्तुविश्वेऽअमृतस्यपुत्राऽआयेधामानिदिव्यानि
तस्थुः ५ यस्यप्रयाणम्। यस्यप्रयाणमन्वन्यऽइद्ययुर्देवादेवस्यमहि
मानमोजसा। यःपार्थिवानिविममेसऽएतशोरजाᳬंसिदेवःसवितामहित्व
ना ६ देवसवितः। देवसवितःप्रसुवयज्ञम्प्रसुवयज्ञपतिम्भगाय॥दिव्योगं
धर्वः केतपूः केतन्नःपुनातुवाचस्पतिर्वाचन्नःस्वदतु ७ इमन्नः इमन्नो
देवसवितर्यज्ञम्प्रणयदेवाव्यᳬंसखिविदᳬंसत्राजितन्धनजितᳬंस्वर्जि
तम्। ऋचास्तोमᳬंसमर्द्धयगायत्रेणरथन्तरम्बृहद्गायत्रवर्तनिस्वाहा ८

Indira Gandhi National Centre for the Arts

संहि॰ देवस्यत्वा। सवितुः प्प्रसवेश्विनोर्ब्बाहुभ्याम्पूष्णोहस्ताभ्याम्॥ आददे पू॰भ॰
६८ गायत्रेणछन्दसाङ्गिरस्वत्पृथिव्याःसधस्थादग्निम्पुरीष्यमङ्गिरस्व ११
दाभरत्त्रैष्टुभेनछन्दसाङ्गिरस्वत् ९ अभ्रिरसि। नार्य्यसित्त्वयावयमग्नि
ठंशकेमखनितुठंसधस्थऽआ। जागतेनछन्दसाङ्गिरस्वत् १० हस्तेऽ
आधायसविताबिभ्रदभ्रिठंहिरण्ययीम्॥ अग्नेज्ज्योतिर्न्निचाय्य
पृथिव्याऽअध्याभरदानुष्टुभेनछन्दसाङ्गिरस्वत् ११ प्रतूर्त्तंवाजिन्न्। ६८
प्रतूर्त्तंवाजिन्नाद्रववरिष्ठामनुसंवतम्॥ दिवितेजन्मपरममन्तरिक्षे

Indira Gandhi National Centre for the Arts

तवनाभिं पृथिव्यामधियोनिरित् १२ युञ्जाथाᳬं रासभम्। युञ्जा
थाᳬं रासभंय्युवमुस्मिन्न्यामेवृषएवसू। अग्निम्भरन्तमस्म्मयुम्
१३ योगेयोगेतवस्तरम्। योगेयोगेतवस्तरंव्वाजेवाजेहवामहे॥ सखा
य ऽइन्द्रमूतये १४ प्रतूर्वन्नेहि। प्रतूर्वन्नेत्थ्यवक्रामन्नशस्तीरुद्रस्य
गाणपत्त्यम्मयोभूरेहि॥उर्वन्तरिक्षंव्वीहिस्वस्तिगव्यूतिरभयानिकृण्व
न्न्पूष्णासयुजासह १५ पृथिव्याः सधस्त्थात्। पृथिव्याः सधस्त्था
दग्निम्पुरिष्ष्य मङ्गिरस्वदाभराग्निम्पुरिष्ष्य मङ्गिरस्वदच्छेमोग्निम्पु

संहि· रीष्य मङ्गिरस्वद्भरिष्यामः १६ अन्वग्निः। अन्वग्निरुषसामग्ग्र पू·अ·
६९ मख्यदन्वहानिप्प्रथमोजातवेदाः। अनुसूर्य्यस्यपुरुत्राचरश्मीन ११
नुद्यावापृथिवीऽआततन्थ १७ आगत्यवाजी। आगत्यवाज्ज्यद्ध्वानꣳ
सर्वामृधोविधूनुते॥ अग्निꣳसधस्थेमहतिचक्षुषानिचिकीषते १८
आक्रम्म्यवाजिन्। आक्रम्म्यवाजिन्पृथिवीमग्निमिच्छरुचात्त्वम॥
भूम्म्यावृत्त्वायनोब्रूहियतःखनेमतंवयम् १९ द्यौस्ते। पृष्ठम्पृथिवीस ६९
धस्थमात्मान्तरिक्षꣳसमुद्रोयोनिः॥ विख्यायचक्षुषात्त्वमभिति

द्व पृतन्न्युत॒ २० उत्क्राम। महतेसौभगायास्म्मादास्त्थानोद्द्रविणोदाव्वा
जिन्न्॥ व्वय ँ स्यामसुमतौपृथिव्व्या ऽ अग्निङ्खनन्त ऽउपस्त्थे ऽ अस्याः २१
उदक्क्रमीत्। उदक्क्रमीद्द्रविणोदा व्वाज्ज्यर्व्वाकः सुलोकᳬ सुकृतम्पृथिव्व्या
म्॥ ततः स्वनेमसुप्प्रतीकमग्निᳬ स्वोरुहाणा ऽ अधिनाकमुत्तमम् २२ आ
त्वा। जिघर्म्मिमनसाघृतेनप्प्रतिक्षियन्तम्भुवनानिविश्श्वा॥ पृथुन्तिरश्चा
व्वयसाबृहन्तंव्व्यचिष्ठमन्नैरभसन्दृशानम् २३ आविश्श्वतः। प्प्रत्यञ्चं
ञ्जिघर्म्म्यरक्षसामनसातज्जुषेत॥ मर्य्यश्श्रीस्पृहयद्वर्णो ऽ अग्निर्न्ना

Indira Gandhi National Centre for the Arts

संहि· भिमृशीतन्त्वाजर्भुराणः २४ परिवाजपतिः। परिवाजपतिः कविरग्निर्ह पू·अ·
७० व्यान्यक्रमीत्॥ दधद्रत्नानिदाशुषे २५ परित्वाग्नेपुरंवयंविप्रꣳस ११
हस्यधीमहि॥ धृषद्वर्णन्दिवेदिवेहन्तारम्भङ्गुरावताम् २६ त्वमग्ने। द्यु
भिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि॥ त्वंवनेभ्यस्त्वमोषधी
भ्यस्त्वन्नृणान्नृपतेजायसेशुचिः २७ देवस्यत्वा। सवितुः प्रसवेश्वि
नोर्बाहुभ्याम्पूष्णोहस्ताभ्याम्॥ पृथिव्याः सधस्थादग्निम्पुरीष्यम ७०
ङ्गिरस्वत्खनामि॥ ज्योतिष्मन्तन्त्वाग्नेसुप्रतीकमजस्रेणभानुनादीद्य

नम् ॥ शिवम्प्रजाभ्योऽहिꣳसन्तम्पृथिव्याः सधस्त्थादग्निम्पुरीष्ष्यमङ्गिर
स्वदच्छेमः २८ अपाम्पृष्ठम् । अपाम्पृष्ठमसि योनिरग्नेः समुद्रमभितः पि
न्वमानम् ॥ वर्द्धमानो महाँ २ ।ऽ आ च पुष्करे दिवो मात्रया वरिम्णा प्रथस्व
२९ शर्म्म च । शर्म्म च स्थो वर्म्म च स्थोऽच्छिद्रे बहुलेऽउभे ॥ व्यचस्वती संवसा
थाम्भृतमग्निम्पुरीष्ष्यम् ३० संवसाथाम् । संवसाथाꣳ स्वर्विदा समी
चीऽउरसा त्मना ॥ अग्निमन्तर्भरिष्ष्यन्तीज्ज्योतिष्मन्तमजस्रमित्
३१ पुरीष्ष्यो सि विश्वभराऽ अथर्वा त्वा प्रथमो निरमन्थदग्ने ॥ त्वामे

Indira Gandhi National Centre for the Arts

ग्नेपुष्क॑रा॒दध्यथ॑र्वा॒ निर॑मन्थत ॥ मू॒र्ध्नो विश्व॑स्य वा॒घतः॑ ३२ तमु॑त्त्वा॒ दु
ध्यङ्ङृषिः॑ पु॒त्र ऽ ईधे॒ ऽ अथ॑र्वणः वृ॒त्र॒हणं॑ पुरन्द॒रम् ३३ तमु॑त्त्वा पा॒थ्यो
वृषा॒ समी॑धे दस्यु॒हन्त॑मम् ॥ ध॒न॒ञ्ज॒यꣳ रणे॑रणे ३४ सीद॑ होतः॒ स्व ऽ उ॑ लो॒
के चि॑कि॒त्वान्त्सा॒दया॑ य॒ज्ञꣳ सु॑कृ॒तस्य॒ योनौ॑ ॥ दे॒वा॒वीर्दे॒वान्ह॒विषा॑ यजा॒
स्यग्ने॑ बृ॒हद्यज॑माने॒ वयो॑ धाः ३५ निहोता॑ होतृ॒षद॑ने॒ विदा॑नस्त्वे॒षो दी॑दि॒
वाँ२॥ ऽ असदत्सु॒दक्षः॑ ॥ अद॑ब्धव्रतप्रमति॒र्वसि॑ष्ठः सहस्र॒म्भ॒रः शुचि॑जि
ह्वो॒ ऽ अ॒ग्निः ३६ सꣳसी॑दस्व स॒ꣳसी॑दस्व म॒हाँ२॥ ऽ अ॑सि॒ शोच॑स्व देव॒वी

नमः ॥ विधुममग्ग्ने ऽअरुषम्मियेद्ध्यसृजप्प्रशस्तदर्शतम् ३७ अपोदेवीः
। अपोदेवीरुपसृजमधुमतीरयुक्ष्मायप्प्रजाभ्यः ॥ तासामास्थानादुज्जि
हतामोषधयः सुपिप्पलाः । ३८ सन्ते । वायुर्मातरिश्वादधातूत्तानाया
हृदयंय्यद्विकस्तम् ॥ योदेवानाञ्चरसिप्प्राणथेनकस्मैदेवव्वषडस्तु तु
भ्यम् ३९ सुजातोज्ज्योतिषा । सहशर्म्मवरूथमासदत्स्वः ॥ व्वासोऽ
अग्ग्नेव्विश्वरूपर्ठ० सव्ययस्वव्विभावसो ४० उदुतिष्ठ । स्वद्ध्वरावानो
देव्याधिया ॥ दृशेचभासाबृहतासुशुक्कनिराग्ग्नेयाहिसुशस्तिभिः

संहि॰ ४१ऊर्द्ध्वऽऊषुणः। ऊर्द्ध्वऽऊषुणऽऊतयेतिष्ठादेवोनसविता॥ऊर्द्ध्वोवा- पू॰अ॰
७२ जस्यसनितायदुञ्जिभिर्वाघद्भिर्विह्वयामहे ४२ सजातः। सजातोगर्भो ११
असिरोदस्योरग्नेचारुर्विभृतऽऊषधीषु॥चित्रःशिशुःपरितमांस्य
क्तून्प्रमातृभ्योऽअधिकनिक्रदद्गाः ४३ स्थिरोभव। वीड्वङ्गऽआशुर्भ
वधाज्र्यर्वन्॥पृथुर्भवसुषदस्त्वमग्नेःपुरीषवाहणः ४४ शिवोभव
प्रजाभ्योमानुषीभ्यस्त्वमङ्गिरः॥माद्यावापृथिवीऽअभिशोचीर्मान्तरि ७२
क्षम्मावनस्पतीन् ४५ प्रैतु। वाजीकनिक्रदन्नानदद्रासभःपत्वा॥भर

Indira Gandhi National Centre for the Arts

न्नग्निम्पुरीष्यम्मापाद्यायुषस्पुरा ॥ व्वृषाग्निम्वृषणम्भरन्नपाङ्गर्ब्भर्ठं समुद्रि
येम् ॥ अग्नऽ आयाहिवीतये ४६ ऋतर्ठं सत्यमृतर्ठं सत्यमग्निम्पुरीष्यमङ्
ङ्गिरस्वद्भरामः ॥ ओषधयः प्प्रतिमोदद्ध्वमग्निमेतर्ठं शिवमायन्तमभ्यत्र यु
ष्माः ॥ व्यस्यन्विश्वाऽ अनिराऽ अमीवानिषीदन्नोऽ अपदुर्म्मतिञ्जहि
४७ ओषधयः प्प्रति । ओषधयः प्प्रतिगृभ्णीतपुष्प्पवतीः सुपिप्पलाः ॥ अ
यंवो गर्ब्भऽ ऋत्वियः प्प्रत्नर्ठं सधस्थमासदत् ४८ विपाजसा । पृथुना
शोशुचानो बाधस्वद्विषो रक्षसोऽ अमीवाः ॥ सुशर्म्मणो बृहतः शर्म्मणि

स्यामग्नेरहर्ठ॰सुहवस्यप्प्रणीतौ ४९ आपोहिष्ठामयोभुवस्तानऽऊर्ज्जे
दधातन। महेरणायचक्षसे ५० योवः॥शिवतमोरसस्तस्यभाजयते
हनः॥उशतीरिवमातरः ५१ तस्म्माऽअरम्। तस्म्माऽअरङ्गमामवो
यस्यक्षयायजिन्न्वथ। आपोजनयथाचनः ५२ मित्रःसर्ठ॰सृज्ज्य
॥पृथिवीम्भूमिञ्चज्ज्योतिषासह॥सुजातञ्जातवेदसमयक्ष्मायत्त्वा
सर्ठ॰सृजामिप्प्रजाब्भ्यः ५३ रुद्राःसर्ठ॰सृज्ज्य। पृथिवीम्बृहज्ज्योतिः
समीधिरे॥तेषाम्भानुरजस्रऽइच्छुक्कोदेवेषुरोचते ५४ सर्ठ॰सृष्टांवसु

भीरुद्दैहीरिँ कर्म्मण्ण्याम्मृदम्॥ हस्ताब्भ्याम्मृद्वीङ्कृत्वासिनीवालीकृणो
तुताम् ५५ सिनीवालीसुकपर्द्दा॥सुकुरीरास्वौपशा॥सातुब्भ्यमदिते
मुह्यौखान्दधातुहस्तयोः ५६ उषाङ्कृणोतु। शक्त्याबाहुब्भ्यामदितिर्द्धि
या॥मातापुत्रंय्यथोपस्थेसाग्निम्बिभर्त्तुगर्ब्भऽआ॥मखस्यशिरोसि
५७ वसवस्त्वा॥ कृण्वन्तुगायत्रेणछन्दसाङ्गिरस्वद्ध्रुवासिपृथिव्व्यसि
धारयामयिप्प्रजाꣳ रायस्प्पोषङ्गौपत्यꣳसुवीर्य्यꣳसजातान्न्यज
मानायरुद्द्रास्त्वाकृण्वन्तुत्रैष्टुभेनछन्दसाङ्गिरस्वद्ध्रुवास्यन्तरिक्षमन

संहि॰ सिधारयामयिप्प्रजा ँ रायस्पोषङ्गौपत्यर्ठ॰ सुवीर्य्यर्ठ॰ सजातान्यज यू॰अ॰
७४ मानायादित्यास्त्वाकृण्वन्तुजागतेनछन्दसाङ्गिरस्वद्ध्रुवासिद्यौरसि ११
धारयामयिप्प्रजा ँ रायस्पोषङ्गौपत्यर्ठ॰ सुवीर्य्यर्ठ॰ सजातान्यजे-
मानायविश्वेत्वादेवावैश्वानराः कृण्वन्त्वानुष्टुभेनछन्दसाङ्गिर
स्वद्ध्रुवासिदिशोसिधारयामयिप्प्रजा ँ रायस्पोषङ्गौपत्यर्ठ॰ सुवीर्य्यर्ठ॰
सजातान्यजेमानाय ५८ अदित्त्यैरास्त्ना। अदित्त्यैरास्नास्यदितिष्टेबि ७४
लङ्गृभ्णातु॥ कृत्त्वायसामहीमुखाम्मृन्मयीं य्योनिमग्नये॥ पुत्त्रेभ्यः

प्यायच्छुदर्दितिः श्रपयानिति ५९ वसवस्त्वा ॥ धूपयन्तुगायत्रेणछन्दसा
ङ्गिरस्वद्रुद्रास्त्वाधूपयन्तुत्रैष्टुभेनछन्दसाङ्गिरस्वदादित्यास्त्वाधूपयन्तु
जागतेनछन्दसाङ्गिरस्वद्विश्वेत्वादेवावैश्वानराधूपयन्त्वानुष्टुभेनछन्द
साङ्गिरस्वदिन्द्रस्त्वाधूपयतुवरुणस्त्वाधूपयतुविष्णुस्त्वाधूपयतु ६०
अदितिष्ट्वा ॥ देवीविश्वदेव्यावतीपृथिव्याःसधस्थेऽअङ्गिरस्वत्खन
त्ववटदेवानान्त्वापत्नीर्देवीर्विश्वदेव्यावतीः पृथिव्याःसधस्थेऽअं
ङ्गिरस्वद्दधतूखेधिषणास्त्वादेवीर्विश्वदेव्यावतीःपृथिव्याःसधस्थे

Indira Gandhi National Centre for the Arts

संहि० ऽअङ्गिरस्वद्भरन्नग्निमिन्धतामुखेघ्न्येघ्न्याद्देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थे ऽअङ्गिरस्वद्दधिरन्तु ॥ पृ० अ०

७५ धस्थेऽअङ्गिरस्वच्छुपयन्तूखेऽग्नास्त्वादेवीर्विश्वदेव्यावतीः पृथिव्याः ११

सधस्थेऽअङ्गिरस्वत्पचन्तूखेजनयस्त्वाछिन्नपत्राद्देवीर्विश्वदेव्याव-

तीः पृथिव्याःसधस्थेऽअङ्गिरस्वत्संचन्तूखे६१ मित्रस्यचर्षणीधृतः ॥ मित्र

स्यचर्षणीधृतोवोदेवस्यसानसि ॥ द्युम्नञ्चित्रश्रवस्तमम् ६२ देव

स्त्वा ॥ सवितोद्वपतुसुपाणिःस्वङ्गुरिः सुबाहुरुतशक्त्या ॥ अव्यथमा ७५

नापृथिव्यामाशादिशऽआपृण ६३ उत्थायबृहती ॥ भवोदुत्तिष्ठध्रुवात्त्व

त्वम्॥ मित्रैतान्तऽउखाम्परिददाम्म्यभित्त्याऽएषामाभेदि ६४ वसवस्त्वा
। छृन्दन्तु गायत्रेण छन्दसाङ्गिरस्वद्रुद्रास्त्वा छृन्दन्तु त्रैष्टुभेन छन्दसाङ्गि
रस्वदादित्यास्त्वा छृन्दन्तु जागतेन छन्दसाङ्गिरस्वद्विश्श्वेत्त्वा देवा वैश्श्वान
राऽआछृन्दन्त्वानुष्टुभेन छन्दसाङ्गिरस्वत् ६५ आकूतिमग्निम्प्रयुजꣳ
स्वाहा मनो मेधामग्निम्प्रयुजꣳ स्वाहा चित्तं विज्ञातमग्निम्प्रयुजꣳ स्वाहा
वाचो विधृतिमग्निम्प्रयुजꣳ स्वाहा प्रजापतये मनवे स्वाहाग्नये वैश्श्वान
राय स्वाहा ६६ विश्श्वो देवस्य॥ नेतुर्म्मर्त्तो वुरीत सख्यम्॥ विश्श्वो रायऽई

संहि॰ षुद्ध्यति द्युम्नं वृणीत पुष्यसे स्वाहा ६७ मास्त्र। भित्था मासुरिषोम्बधृष्ण्यु पू॰अ॰
७६ वीरयस्वसु॥ अग्निश्चेदङ्करिष्यथः ६८ इदंहस्वदेवि। पृथिविस्वस्तयऽआ ११
सुरीमायास्वुधयाकृतासि॥ जुष्टन्देवेभ्यऽइदमस्तुहव्यामरिष्टात्वमुदिहि
यज्ञेऽअस्मिन् ६९ इन्नःसर्पिसंसुतिः प्रत्कोहोतावरेण्यः॥सहसस्पु
त्रोऽअद्भुतः ७० शतम् ५००॥परस्याऽअधि॥संवतोवरा शँऽअभ्यातर॥
यत्राहमास्मिताशँऽअव ७१ परमस्याः परावतः॥परमस्याः परावतो ७६
रोहिदश्वऽइहागहि॥पुरीष्यःपुरुप्रियोग्नेत्वन्तरामृधः ७२ यदग्ने।य

दग्ग्नेकानिकानिचिदातेदारूणिदध्मसि॥सर्व्वन्तदस्तुतेघृतन्तज्जुषस्वयवि
ष्ठ्य ७३ यदत्ति॥यदत्त्युपजिह्विकायद्वम्म्रोऽअतिसर्प्पति॥सर्व्वन्तदस्तुतेघृ
तन्तज्जुषस्वयविष्ठ्य ७४ अहरहरप्प्रयावम्॥ अहरहरप्प्रयावम्भरन्तोऽश्वा
येवतिष्ठतेघासमस्म्मै॥रायस्प्पोषेणसमिषामदन्तोऽग्ग्नेमातेप्प्रतिवेशारिषा
म ७५ नाभापृथिव्व्याः॥समिधानेऽअग्ग्नौरायस्प्पोषायबृहतेहवामहे॥इ
रम्मदम्बृहदुक्थँय्यजत्त्रञ्जेतारमग्ग्निम्पृतनासुसासहिम् ७६ याः सेनाः
॥याःसेनाऽअभीत्त्वरीराव्व्याधिनीरुगणाऽउत॥येस्तेनायेचतस्करास्ताँ

संहि॰ स्तेऽ अग्ने विदधाम्म्यास्ये॒ ७७ दꣳष्ट्राभ्याम्मलिम्म्लून्॥ दꣳष्ट्राभ्याम्मलि पू॰अ॰
७७ म्म्लून् जम्भ्यैस्तस्कराँ२॥ऽउत॥ हनुभ्याꣳ स्तेनान्भगवस्ताँस्त्वङ्खादसुखादि ११
तान् ७८ येजनेषु। मलिम्म्लवस्तेनासस्तस्करावने॥ येकक्षेष्वघायवस्ताँ
स्तेदधामिजम्भयोः ७९ योऽअस्म्मभ्यम्। योअस्म्मभ्यमरातीयाद्यश्चनो
द्वेषतेजनः॥ निन्दाद्योऽअस्म्मान्धिप्प्साच्चसर्वन्तम्मस्म्मसाकुरु ८० सꣳ
शितम्मे॥ सꣳशितम्मेब्रह्मसꣳशितंवीर्यम्बलम्॥ सꣳशितङ्क्षत्रञ्जि- ७७
ष्णुयस्याहमस्म्मिपुरोहितः ८१ उदेषाम्॥ उदेषाम्बाहूऽअतिरमुद्वर्चोऽअ

थ्योबलम् ॥ क्षिणोमि ब्रह्मणामित्रानुन्नयामिस्वाँ २ ऽ अहम् ८३ अग्ने
पतेन्नस्य ॥ नोदेह्यनमीवस्यशुष्मिण ÷ ॥ प्रप्रदातारन्तारिष ऽ ऊर्ज्जं-
न्नोधेहिद्विपदेचतुष्पदे ८३ इतिसंहितायांएकादशोऽध्यायः ११ दृशा
नोरुक्म ः । दृशानोरुक्म ऽ उर्व्याव्यद्यौद्दुर्मर्षमायु÷श्रियेरुचान ः अग्नि
रमृतोऽ अभवद्वयोभिर्य्यदेनन्द्यौरजनयत्सुरेताः १ नक्तोषासासमनन
सा ॥ विरूपेधापयेतेशिशुमेकꣳसमीची ॥ द्यावाक्षामारुक्मोऽअन्तर्व्विभा
तिदेवाऽअग्निन्धारयन्द्रविणोदाः २ विश्वारूपाणि ॥ विश्वारूपाणिप्रति

संहि॰ मुञ्चतेकुधिः प्रासावीद्भद्रंद्विपदेचतुष्पदे॥विनाकमख्यत्सवितावरे- शु॰अ॰

७८ ण्योनुप्रयाणमुषसोविराजति ३ सुपर्णोसि॥गरुत्माँस्त्रिवृत्तेशिरोगाय १२

त्रञ्चक्षुर्बृहद्रथन्तरेपक्षौ॥स्तोमऽआत्माछन्दाᳬस्यङ्गानियजूᳬषिना

म॥सामतेतनूर्वामदेव्यंयज्ञायज्ञियम्पुच्छन्धिष्ण्याः शफाः॥सुपर्णोसि

गरुत्मान्दिवङ्गच्छस्वःपत ४ विष्णोः क्रमः॥विष्णोःक्रमोसिसपत्न

हागायत्रञ्छन्दऽआरोहपृथिवीमनुविक्रमस्वविष्णोःक्रमोस्यभिमाति ७८

हात्रैष्टुभञ्छन्दऽआरोहान्तरिक्षमनुविक्रमस्वविष्णोःक्रमोस्यरातीयतो

हुन्ताजागतुञ्छन्दऽआरोहदिवमनुविक्क्रमस्वविष्ण्णोः क्क्रमोसिश
त्त्रूयतोहन्तानुष्टुभञ्छन्दऽआरोहदिशोनुविक्क्रमस्व ५ अक्क्रन्ददु
ग्ग्निः॥ अक्क्रन्ददुग्निस्तनयन्निवद्यौः क्षामारेरिहद्वीरुधः समञ्ज
न्॥ सद्योजज्ञानोविहीमिद्धोऽअख्यदारोदसीभानुनोभात्यन्तः
६ अग्ग्नेभ्यावर्त्तिन्॥ अग्ग्नेभ्यावर्त्तिन्नभिमानिवर्त्तस्वायुषावर्च्चसा
प्प्रजयाधनेन॥ सन्न्यामेधयारय्य्यापोषेण ७ अग्ग्नेऽअङ्गिरः॥ श
तन्तेसन्त्वावृतः सहस्रन्तऽउपावृतः॥ अधापोरवस्यपोषेणपुनर्न्नो

नुष्टमाकृधिपुनर्न्नोरयिमाकृधि ८ पुनरूर्ज्जा॥न्निवर्त्तस्वपुनरग्नऽइ
षायुषा॥पुनर्न्नःपाह्यꣳहसः॥९॥सहरय्या॥निवर्त्तस्वाग्नेपिन्वस्व
धारया॥विश्वप्स्न्याविश्वतस्परि १० आत्वा॥हार्षमन्तरभूर्ध्रुवस्ति
ष्ठाविचाचलिः॥विशस्त्वासर्वावाञ्छन्तुमात्वद्राष्ट्रमधिभ्रशत् ११ उदुत्त
मम्॥उदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमꣳश्रथाय॥अथाव
यमादित्यव्रतेतवानागसोऽअदितयेस्याम १२ अग्नेबृहन्॥अग्नेबृह
न्नुषसामूर्ध्वोऽअस्थान्निर्ज्जगन्वान्तमसोज्ज्योतिषागात्॥अग्नि-

भानुनारुशतास्वर्द्धऽआजातोविश्वासद्मान्यप्राः १३ हुठंसःशुचि
षत्॥हुठंसःशुचिषद्वसुरन्तरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत्॥
नृषद्वरसदृतसद्व्योमसदब्जागोजाऽऋतजाऽअद्रिजाऽऋतंबृहत्
१४ सीदत्वम्। सीदत्वम्मातुरस्याऽउपस्थेविश्वान्यग्नेवयुनानिवि
द्वान्। मैनान्तपसामार्चिषाभिशोचीरन्तरस्याठंशुक्रज्ज्योतिर्विभाहि
१५ अन्तरग्ने॥रुचात्वमुखायाःसदनेस्वे॥तस्यास्त्वठंहरसातपञ्जा
तवेदःशिवोभव १६ शिवोभूत्वा॥मह्यमग्नेऽअथोसीदशिवस्त्वम्

संहि· ।।शिवाः कृत्वादिशः सर्व्वाः स्वंय्योनिमिहासदः १७ दिवस्परि।।प्प्रथ मू·अ·
८० मञ्जज्ञेऽअग्निरस्मद्द्वितीयम्परिंजातवेदाः।।तृतीयमप्प्सुनृमणा १२
ऽअजस्रमिन्धानऽएनञ्जरतेस्वाधीः १८ विद्माते।।अग्नेत्त्रेधात्त्रया
णिविद्मातेधामविभृतापुरुत्त्रा।।विद्मातेनामपरमङ्गुहायद्विद्मातमु
त्संय्यतेऽआजगन्थ १९ समुद्रेत्वा।।नृमणाऽअप्प्स्वन्तर्नृचक्षाऽईधेदि
वोऽअग्नऊधन्।।तृतीयेत्वारजसितस्थिवाꣳसमपामुपस्थेमहिषाऽ ८०
अवर्द्धन् २० अक्रन्ददग्निः।।अक्रन्ददग्निस्तनयन्निवद्यौः क्षामारे

रिहद्वीरुधःसमञ्जन्॥ सद्योजज्ञानोविहीमिद्धोऽअख्यदारोदसी-
भानुनाभात्यन्तः १२ श्रीणामुदारः॥ श्रीणामुदारोधरुणोरयीणा
म्मनीषाणाम्प्रार्प्पणःसोमगोपाः॥ वसुःसूनुःसहसोऽअप्सुराजा
विभात्यग्रऽउषसामिधानः २२ विश्वस्यकेतुः॥ विश्वस्यकेतुर्भुव
नस्यगर्भऽआरोदसीऽअपृणाज्जायमानः। वीडुञ्चिदद्रिमभिनत्परा
यञ्जनायदग्निमयजन्तपञ्च २३ उशिक्पावकः॥ उशिक्पावकोऽअ
रतिःसुमेधामर्त्तेष्वग्निरमृतोनिधायि॥ इयर्त्तिधूममरुषम्भरिभ्रदु

Indira Gandhi National Centre for the Arts

संहि॰ छुक्रेणशोचिषाद्यामिनक्षन् २४ दृशानोरुक्मः॥ दृशानोरुक्मऽउर्व्या पू॰अ॰
८१ व्यद्यौद्दुर्मर्षमायुः श्रियेरुचानः॥ अग्निरमृतोऽअभवद्वयोभिर्यदेनन्द्यौ १२
रजनयत्सुरेताः २५ यस्ते॥ अद्यकृणवद्भद्रशोचेऽपूपन्देवघृतवन्तमग्ने॥
प्रतन्नयप्रतरंवस्योऽअच्छाभिसुम्नन्देवभक्तंयविष्ठ २६ आतम्॥ आ
तम्भजसौश्रवसेष्वग्नऽउक्थऽउक्थऽआभजशस्यमाने॥ प्रियःसू
र्य्येप्रियोऽअग्नाभवात्युज्जातेनभिनददुज्जनित्वैः २७ त्वामग्ने॥ ८१
त्वामग्नेयजमानाऽअनुद्यून्विश्वावसुदधिरेवार्य्याणि॥ त्वयासह

द्रविणमिच्छमानाव्रजङ्गोमन्तमुशिजोविवव्रुः २८ अस्ताव्यग्निर्नराꣳ
सुशेवोवैश्वानरऽऋषिभिःसोमगोपाः॥ अद्वेषेद्यावापृथिवीहुवेम
देवाधत्तरयिमस्मेसुवीरम् २९ समिधाग्निम्॥ समिधाग्निन्दुवस्यत
घृतैर्बोधयतातिथिम्॥ आस्मिन्हव्याजुहोतना ३० उदुत्वा॥ उदुत्वा
विश्वेदेवाऽअग्नेभरन्तुचित्तिभिः॥ सनोभवशिवस्त्वꣳसुप्रतीकोवि
भावसुः ३१ प्रेत्॥ प्रेदग्नेज्योतिष्मान्याहिशिवेभिरर्चिभिष्ट्वम्॥ बृ
हद्भिर्भानुभिर्भासन्माहिꣳसीस्तन्वाप्रजाः ३२ अक्रन्ददग्निः॥ अ

Indira Gandhi National Centre for the Arts

 क्रन्ददग्निस्तनयन्निवद्यौःक्षामारेरिहद्वीरुधःसमञ्जन्॥सद्योजज्ञा 
 नोविहीमिद्धोऽअख्यदारोदसीभानुनाभात्यन्तः ३३ प्रप्रायम्॥प्रप्रा 
यमग्निर्भरतस्यशृण्वेवियत्सूर्य्योनरोचतेबृहद्भाः॥अभियःपूरुम्पृतना
सुतस्थौदीदायदैव्योऽअतिथिःशिवोनः ३४ आपोदेवीः॥आपोदेवीःप्र
तिगृभ्णीतभस्मैतत्स्योनेकृणुध्वꣳसुरभाऽउलोके॥तस्मैनमन्तांजनयः
सुपत्नीर्मातेवपुत्रम्बिभृताप्स्वेनत् ३५ अप्स्वग्ने॥अप्स्वग्नेसधि 
ष्टवसौषधीरनुरुध्यसे॥गर्ब्भेसञ्जायसेपुनः ३६ गर्ब्भोऽअसि॥गर्ब्भोअस्यो

षधीनाङ्गर्ब्भो वनस्प्पतीनाम्॥ गर्ब्भो विश्श्वस्य भूतस्याग्ग्ने गर्ब्भोऽअपामसि ३७
प्रसद्य भस्म्मना॥ प्रसद्य भस्म्मना योनिमपश्श्च पृथिवीमग्ग्ने॥ सꣳसृज्ज्य मा
तृभिष्ट्वञ्ज्योतिष्ष्मान्पुनरासदः ३८ पुनरासद्य। पुनरासद्य सदनमपश्श्च पृ
थिवीमग्ग्ने॥ शेषे मातुर्य्यथोपस्थेऽन्तरस्याꣳ शिवतमः ३९ पुनरूर्ज्जा॥ नि
वर्त्तस्व पुनरग्ग्नऽइषायुषा॥ पुनर्न्नः पाह्यꣳहसः ४०॥ सह रय्या निवर्त्तस्वाग्ग्ने पि
न्वस्व धारया॥ विश्श्वप्स्न्या विश्श्वतस्परि ४१ बोधा मे॥ऽअस्य वचसो य
विष्ठ मꣳहिष्ठस्य प्रभृतस्य स्वधावः॥ पायति त्वोऽअनु त्वो गृणाति वन्दारुष्टे

संहि· तन्वं वन्दे॒ऽअग्ने ४२ सबोधि॥ सूरिर्म्मघवा वसुपते वसुदावन्॥ युयो पू·अ·
८३ ध्यस्मद्द्वेषाᳬसि विश्वकर्म्मणे स्वाहा ४३ पुनस्त्वा॥ दित्या रुद्रा वसवः स १२
मिन्धताम्पुनर्ब्रह्माणो वसुनीथ यज्ञैः॥ घृतेन त्वन्तन्वं वर्द्धयस्व सत्याः
सन्तु यजमानस्य कामाः ४४ अपेत॥ अपेत वीत वि च सर्प्पतातो येऽत्र स्थ पु
राणा ये च नूतनाः॥ अदाद्यमोऽवसानम्पृथिव्याऽअक्रन्निमम्पितरो लोकम
स्मै ४५ सञ्ज्ञानमसि॥ कामधरणम्मयि ते कामधरणम्भूयात्॥ अग्नेर्ब्भ- ८३
स्मास्यग्ने पुरीषमसि चित स्थ परिचितऽऊर्द्ध्वचितः श्रयद्ध्वम् ४६ अय

ꣳसोऽअग्निर्य्यस्मिन्त्सोममिन्द्रः सुतन्दधेजठरेवावशानः ॥ सहस्रि
यम्वाजमत्यन्नसप्तिꣳससवान्त्सन्त्स्तूयसेजातवेदः ४७ अग्नेयत् ॥
अग्नेयत्तेदिविवर्च्चः पृथिव्यांयदोषधीष्वप्स्वायजत्र ॥ येनान्तरिक्ष
मुर्व्वाततन्त्थत्वेषः सभानुरर्णवोनृचक्षाः ४८ अग्नेदिवः ॥ अग्नेदिवोऽ
अर्णमच्छाजिगास्यच्छादेवाँ २ ॥ ऽऊचिषेधिष्ण्याये ॥ यारोचनेपरस्तात्सू
र्य्यस्ययाश्चावस्तादुपतिष्ठन्तऽआपः ४९ पुरीष्यासोऽअग्नयः ॥ प्रा
वणेभिः सजोषसः ॥ जुषन्तांयज्ञमद्रुहोनमीवाऽइषोमहीः ५० इडाम

Indira Gandhi National Centre for the Arts

संहि· ग्ने॥पुरुदꣳसꣳसनिङ्गो२शश्वत्तमꣳहूवमानायसाध॥स्यान्नःसूनुस्त शु·अ·
८४ नयोविजावाग्नेसातेसुमतिर्भूत्त्वस्मे ५१ अयन्ते॥अयन्तेयोनिर्ऋत्वि १२
योयतोजातोऽअरोचथाः॥तञ्जानन्नग्नऽआरोहाथानोवर्द्धयारयिम्
॥५२॥चिर्दसि॥चिर्दसितयादेवतयाङ्गिरस्वद्ध्रुवासीदपरिचिर्दसितयादेव
तयाङ्गिरस्वद्ध्रुवासीद ५३ लोकम्पृण॥छिद्रम्पृणाथोसीदध्रुवात्त्वम्॥इ
न्द्राग्निस्त्वाबृहस्पतिरस्मिन्योनावसीषदन् ५४ ताऽअस्य॥सूददोहसः ८४
सोमꣳश्रीणन्तिपृश्नयः॥जन्मन्देवानांविशस्त्रिष्वारोचनेदिवः ५५

इन्द्रंविश्वाः॥ इन्द्रंविश्वाऽअवीवृधन्त्समुद्रव्यचसङ्गिरः॥ रथी
तमठं रथीनांवाजानाꣳ सत्पतिम्पतिम् ५६ समितम् ॥ समित
ठं सङ्कल्पेथाꣳ सम्प्रियौरोचिष्णूसुमनस्यमानौ ॥ इषमूर्ज्जमभि
संवसानौ ५७ संवाम् ॥ संवाम्मनाꣳसिसंव्रतासमुचित्तान्याकर
म् ॥ अग्नेपुरीष्याधिपाभवत्त्वन्नऽइषमूर्ज्जंयजमानायधेहि ५८
अग्नेत्त्वम् ॥ अग्नेत्त्वम्पुरीष्योरयिमान्पुष्टिमाꣳऽअसि ॥ शिवाः
कृत्वादिशः सार्वाः स्वंयोनिमिहासदः ५९ भवतन्नः समनसौस

Indira Gandhi National Centre for the Arts

संहि चैतसावरेपसौ ॥ माय्यज्ञꣳहिꣳसिष्टम्मा य्यज्ञपतिञ्जातवेदसौशिवौ पू.अ.
८५ भवतमद्द्यनः ६० मातेवपुत्रम् ॥ मातेवपुत्रम्पृथिवीपुरीष्यमग्निꣳ १२
स्वेयोनावभारुखा ॥ तांविश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्वि
श्वकर्म्माविमुञ्चतु ६१ असुन्वन्तमयजमानम् ॥ असुन्वन्तमयज
मानमिच्छस्तेनस्येत्यामन्विहितस्करस्य ॥ अन्यमस्मदिच्छसातऽइ
त्यानमोदेविनिर्ऋतेतुभ्यमस्तु ६२ नमःसुतेनिर्ऋतेतिग्मतेजोयस्म ८५
यंविचृताबन्धमेतम् ॥ यमेनत्त्वंय्यम्म्यासंविदानोत्तमेनाकेऽअधि

रोहयैनम् ६३ यस्यास्ते ॥ घोरऽआसञ्जुहोम्येषाम्बन्धानामवसर्ज्ज
नाय॥ यान्त्वाजनोभूमिरितिप्रमन्दतेनिर्ऋतिन्त्वाहम्परिवेदविश्वतः
६४ यन्तेदेवीनिर्ऋतिराबबन्धपाशङ्ग्रीवास्वविचृत्यम्॥ तन्तेविष्या
म्यायुषोनमध्यादथैतम्पितुमद्धिप्रसूतः॥ नमोभूत्यैयेदञ्चकार ६५
निवेशनःसङ्गमनः॥ निवेशनःसङ्गमनोवसूनांविश्वारूपाभिचष्टेश
चीभिः॥ देवऽइवसवितासत्यधर्म्मेन्द्रोनतस्थौसमरेपथीनाम् ६६ सी
रायुञ्जन्ति॥ कवयोयुगावितन्वतेपृथक्॥ धीरादेवेषुसुम्नया ६७ यु

संहि. नक्तुसीरा ॥ सुनक्तुसीरा विमुगा तेनु हृङ्कु तेयोनौ वपतेहबीजम् ॥ गिरा पू.अ.
८६ चं मुष्टि ॰ सभेरा ऽअसन्नो नेदीयु ऽ इत्सृप्य ÷ पक्कमेयात् ६८ शुनर्ठ १२
स फालु विकृषन्तु भूमिं ठ· शुनङ्कीनाशा ऽ अभियन्तु वाहे ॰ ॥ शुनासी
राहविषानो शेमानास्फपिप्पुला ऽ ओषधीः कर्त्तनास्मे ६९ घृतेनुसीता
॥ घृतेनसीतामधुनासमज्यतां विश्वैर्देवैरनुमतामरुद्भिः ÷ ॥ ऊर्ज्जस्व
तीपयसापिन्वमानास्मान्त्सीतेपयसाभ्यावत्स्व ७० लाङ्गलुम्पवी ८६
रवत् ॥ लाङ्गलुम्पवीरवत्सुशेवठ· सोमुपित्सरु ॥ तदुद्वपतिगामविम्प्रफ

र्व्यञ्चपीवरीम्प्रस्त्थावद्रथवाहणम् ७१ कामङ्कामदुघे ॥ धुक्ष्वमित्रा
यवरुणायच ॥ इन्द्रायाश्विभ्याम्पूष्णेप्रजाभ्य ऽ ओषधीभ्यः ७२
विमुच्यध्वम् ॥ विमुच्यध्वमघ्न्यादेवयाना ऽ अगन्मतमसस्पारम-
स्य ॥ ज्योतिरापाम ७३ सजूरब्दः ॥ सजूरब्दो ऽ अयवोभिः सजूरु
षा ऽ अरुणीभिः ॥ सजोषसावश्विनादꣳसोभिः सजूः सूर ऽ एत
शेनसजूर्वैश्वानर ऽ इडयाघृतेनस्वाहा ७४ या ऽ ओषधीः ॥ या ऽ ओ
षधीः पूर्वाजातादेवेभ्यस्त्रियुगम्पुरा ॥ मनैनुबभ्रूणामहꣳ शतन्धा

मोनिसुप्तच॥७५ शुतंवे÷॥शुतंवोऽअम्बुधामानिसुहस्रमुतवोरुहः÷ 
॥अधाशतक्रत्वोयूयमिमम्मेऽअगुदङ्कृत ७६ ओषधीःप्प्रतिं॥ 
मोदद्धम्पुष्प्यवतीःप्प्रसूवरीः॥अश्श्वाऽइवसुजित्त्वरीर्व्वीरुधः÷पारयि
ष्ष्णव÷७७ ओषधीरितिं॥मातरुस्तद्वोदेवीरुपब्रुवे॥सुनेयुमश्श्वङ्गां-
वासंऽआत्त्मानुन्तवपूरुष ७८ अुश्श्वुत्थेवः÷॥अुश्श्वुत्थेवोनिुषदनम्पु
र्णेवोवसुतिष्कृता॥गोभाजुऽइत्किलासथुयत्सनवथुपूरुषम्॥७९ यु 
त्रौषधीः॥सुमग्मतुराजानुःसमिताविव॥व्विप्प्रुःसऽउच्यतेभिुषग्र-

क्षो ह्यामीवचातनः ८० अश्श्वावती ँ सोमावतीम् ॥ अश्श्वावती ँ सो
मावतीमूर्ज्जयन्तीमूदोजसम् ॥ आवित्सि सर्व्वाऽ ओषधीरस्म्मा
ऽ अरिष्टतातये ८१ उच्छुष्म्माऽ ओषधीनाङ्गावो गोष्ठादिवेरते ॥ धनं
सनिष्प्यन्तीनामात्त्मानन्तवपूरुष ८२ इष्कृतिर्न्नाम ॥ वोमा
ताथो यूयं स्त्थनिष्कृतीः ॥ सीराः पतत्त्रिणीस्त्थन यदामयतिनि
ष्कृथ ८३ अतिविश्श्वाः परिष्ठास्तेनऽ इवव्व्रजमक्क्रमुः ॥ ओषधीः
प्राचुच्च्यवुर्य्यत्किञ्चतन्न्वोरपः ८४ यदिमाः ॥ यदिमावाजयन्न्

संहि॰ हमोषधीर्हस्तऽआदधे ॥ आत्मायक्ष्मस्यनश्यतिपुराजीवगृभोय पू॰अ॰
८८ था ८५ यस्यौषधीः ॥ प्रसर्प्पथाङ्गमङ्गम्परुष्परुः ॥ ततोयक्ष्मंविबा १२
धध्वऽउग्रोमध्यमशीरिव ८६ साकंयक्ष्म ॥ साकंयक्ष्मप्रपतचाषे
णकिकिदीविना ॥ साकंवातस्यध्राज्यासाकन्नश्यनिहाकया ८७
अन्न्यावः ॥ अन्न्यावोऽअन्न्यामवत्वन्न्यान्न्यस्याऽउपावत ॥ ताः स
र्व्वाः संविदानाऽइदम्मेप्रावतावचः ८८ याःफलिनीः ॥ याःफलि ८८
नीर्य्याऽअफलाऽअपुष्प्यायाश्चपुष्प्पिणीः ॥ बृहस्प्पतिप्प्रसूतास्ता

Indira Gandhi National Centre for the Arts

नोमुञ्चन्त्वꣳहसः ८९ मुञ्चन्तुमा शपुत्थ्यादथोवरुण्यादुत ॥ अथो
यमस्यपड्वीशात्सर्वस्मादेवकिल्बिषात् ९० अवपतन्तीरवदन् ॥ अवप
तन्तीरवदन्दिवऽ ओषधयुस्परि । यंजीवमश्नवामहैनसरिष्यातिपू
रुषः ९१ याऽ ओषधीः ॥ याऽ ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः
॥ तासामसित्वमुत्तमारङ्कामायशꣳहृदे ९२ याऽ ओषधीः ॥ याऽ ओ
षधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु ॥ बृहस्पतिप्रसूताऽ अस्यैस
न्दत्तवीर्य्यम् ९३ याश्चेदम् ॥ याश्चेदमुपशृण्वन्तियाश्चदूरम्परागताः ॥

संहि· ॥ सर्व्वा÷सुङ्गत्यंवीरुधोस्यैसन्दत्तवीर्य्यम् ९४ मावः ॥ मावोरिषत्खन पू·अ·
८९ नितायस्म्मैचाहङ्खनामिवः ॥ द्विपाच्चतुष्प्यादुस्म्माकुर्ठं·सर्व्वमस्त्वना १२
तुरम् ९५ ओषधयुः सम् ॥ ओषधयुः समवदन्तुसोमेनसुहराज्ञा ॥ य
स्म्मैकृणोतिब्राह्मणस्तर्ठं·राजन्पारयामसि ९६ नाशयित्री बुलासु
स्यार्शस ऽउपुचितामसि ॥ अथोशुतस्ययक्ष्माणाम्पाकारोरसिनाशनी
९७ त्वाङ्गन्धर्व्वाः ॥ त्वाङ्गन्धर्व्वाऽअखनँस्त्वामिन्द्रुस्त्वाम्बृहुस्प्पतिः ॥ त्वा ८९
मोषधेसोमोराजाविद्वान्न्यक्ष्मादमुच्यत ९८ सहस्वमे ॥ सहस्वमेऽअ

रान्तीः सहस्वपृतनायतः॥ सहस्वसर्वम्पाप्मानꣳसहमानास्योषधे
९९ दीर्घायुस्ते॥ दीर्घायुस्तऽओषधेखनितायस्मैचत्वाखनाम्म्यहम्
॥ अथोत्त्वन्दीर्घायुर्भूत्त्वाशतवल्शाव्विरोहतात् १०० त्वमुत्तमास्योषधे
तवव्वृक्षाऽउपस्तयः॥ उपस्तिरस्तुसोस्माकंय्योऽअस्माँ२ऽअभिदासे
ति १०१ मामाहिꣳसीज्जनितायःपृथिव्यायोवादिवꣳसत्यधर्म्माव्यान
ट्॥ यश्चापश्चन्द्राःप्प्रथमोजजानकस्मैदेवायहविषाव्विधेम १०२ अब्भ्या
वर्त्तस्व॥ पृथिवियज्ञेनपयसासह॥ व्वपान्तेऽअग्निरिषितोऽअरोहत्॥ १०३

संहि॰ अग्ने॒यन्त्॒ ॥ अग्ने॒यत्तेम्सु॒क्रंय्यच्च॒न्द्रंय्यत्पू॒तंय्यच्चय॒ज्ञियम्॒ ॥ तद्दे॒वेब्भ्यो॒ पू॰अ॰
९० भरामसि १०४ इषमूर्ज्जम्॒ ॥ इ॒षमूर्ज्जम॒हमि॒त ऽ आद॒मृतस्य॒योनिम्म॒हि १२
षस्य॒धाराम्॒ ॥ आमा॒गोषु॒विशु॒त्त्वा॒तनूषु॒जह्लामिसे॒दिमा॒नरा॒ममीवाम्॒ १०५
अग्ने॒तवं ॥ अग्ने॒तवु॒श्श्रवो॒वयो॒महि॒भ्राजन्ते ऽ अ॒र्च्चयो॒विभावसो ॥ बृह
द्भानो॒शवसा॒वाजम॒क्त्थन्दधासि॒दा॒शुषेकवे १०६ पा॒व॒कवर्च्चाः ॥ पा॒व॒क
वर्च्चाः शु॒क्रवर्च्चा॒ ऽ अनूनवर्च्चा॒ ऽ उदियर्षि॒भा॒नुना ॥ पु॒त्त्रोमा॒तरा॒विचर॒ ९०
न्नुपावसिपृणा॒क्षिरोद॒सी ऽ उ॒भे १०७ ऊर्ज्जोनपात्॒ ॥ ऊर्ज्जोनपाज्जातवे

Indira Gandhi National

दः सुशस्तिभिर्म्मन्द्रस्वधीतिभिर्हितः ॥ त्वेऽइषः सन्दधुर्भूरिवर्प्प
सश्चित्रोतयोवामजाताः १०८ इरज्यन्नग्ने ॥ प्रथयस्वजन्तुभि
रस्मेरायोऽअमर्त्त्य ॥ सदर्शतस्यवपुषोविराजसिपृणक्षिसानसि
क्रतुम् १०९ इष्कर्त्तारमध्वरस्य ॥ इष्कर्त्तारमध्वरस्यप्रचेतसङ्क्षयन्तꣳ
राधसोमहः ॥ रातिंवामस्यसुभगाम्महीमिषन्दधासिसानसिꣳरयि
म् ११० ऋतावानम्महिषं ॥ विश्वदर्शतमग्निꣳसुम्नायदधिरेपुरोज
नाः ॥ श्रुत्कर्णꣳसप्रथस्तमन्त्वागिरादैव्यम्मानुषायुगा ॥१११॥ आ

प्प्यायस्व॥ समेतुतेविश्वतःसोमवृष्ण्यम्॥ भवावाजस्यसङ्गथे ११२
सन्ते॥ सन्तेपयांसिसमुयन्तुवाजाःसंवृष्ण्यान्यभिमातिषाहः॥
आप्यायमानोऽअमृतायसोमदिविश्रवांस्युत्तमानिधिष्व ११३
आप्यायस्व॥ मदिन्तमसोमविश्वेभिरंशुभिः॥ भवानःसप्रथस्त
मःसखावृधे ११४ आते॥ वत्सोमनोयमत्परमाच्चित्सधस्थात्॥ अग्ने
त्वाङ्कामयागिरा ११५ तुभ्यन्ताः॥ तुभ्यन्ताऽअङ्गिरस्तमविश्वाःसुक्षि
तयःपृथक्॥ अग्नेकामाययेमिरे ११६ अग्निःप्रियेषु॥ अग्निःप्रि

येषुधामेसुकामोभूतस्युभव्यस्य ॥ सुम्म्राडेकोविराजति ११७ इ
तिसंहितापाठेद्वादशोऽध्यायः १२ मयिगृह्णामि ॥ मयिगृह्णाम्म्य
ग्ग्रेऽअग्निर्ठ॑रायस्प्पोषायसुप्प्रजास्त्वायसुवीर्य्याय ॥ मामुदेव
ताः सचन्ताम् १ अपाम्पृष्ठम् ॥ अपाम्पृष्ठमसियोनिरग्ग्नेः समुद्र
मभितः पिन्वमानम् ॥ वर्द्धमानोमहाँ२ऽआचपुष्करेदिवोमात्रया
वरिम्णाप्प्रथस्व २ ब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचो
वेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्यविष्ठाः सतश्चयोनिमसत

संहि॰ श्च्चविवः ३ हिरण्यगर्ब्भःसमवर्त्तताग्ग्रेभूतस्यजातःपतिरेकऽआ पू॰अ॰

९२ सीत् ॥ सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवायहविषाविधेम ४ द्र १३

प्सश्च्चस्कन्द । पृथिवीमनुद्यामिमञ्चयोनिमनुयश्च्चपूर्व्वः ॥ समा

नंय्योनिमनुसञ्चरन्तन्द्रप्सञ्जुहोम्म्यनुसप्तहोत्राः ५ नमोस्तु

Indira Gandhi National Centre for the Arts

॥ सर्प्पेब्भ्योयेकेचपृथिवीमनु ॥ येऽअन्तरिक्षेयेदिवितेब्भ्यः सर्प्पे-

ब्भ्योनमः ॥ ६ ॥ याऽइषवः ॥ याऽइषवोयातुधानानांय्येवावनस्प ९२

तीँ१ रनु ॥ येवावटेषुशेरतेतेब्भ्यः सर्प्पेब्भ्योनमः ७ येवा । मीरोचनेदि

वो ये वा सूर्य्यस्य रश्मिषु ॥ येषामप्सु सदस्कृतन्तेभ्यः सर्प्पेभ्यो नमः
८ कृणुष्व पाजः ॥ कृणुष्व पाजः प्रसितिन्न पृथ्वीं याहि राजेवाम
वाँ२ ॥ऽ इभेन ॥ तृष्वीमनु प्रसितिन्द्रूणानोस्तासि विध्य रक्षसस्त
पिष्ठैः ॥९॥ तव भ्रमासः ॥ तव भ्रमास ऽआशुया पतन्त्यनुस्पृश धृ
षता शोशुचानः ॥ तपूंष्यग्ने जुह्वा पतङ्गानसन्दितो विसृज विष्व
ष्वगुल्काः ॥१०॥ प्रतिस्पशः ॥ प्रतिस्पशो विसृज तूर्णितमो भवा पा
युर्विशो ऽअस्या ऽअदब्धः ॥ यो नो दूरे ऽअघशंसो यो ऽअन्त्यग्ने

Indira Gandhi National Centre for the Arts

माकिष्टेव्यथिरादधर्षीत् ११ उदग्ने॥ तिष्ठप्प्रत्यातनुष्वन्न्यमित्राँ२
॥ऽ ओषतात्तिग्ग्महेते॥ योनोऽ अरातिँसमिधानचक्रेनीचातन्ध
क्ष्यतसन्नशुष्क्कम् १२ ऊर्द्ध्वोभव॥ ऊर्द्ध्वोभवप्प्रतिविद्ध्याद्ध्यस्म्मदाविष्कृ
णुष्वदैव्यान्न्यग्ग्ने॥ अवस्थिरातनुहियातुजूनाञ्जामिमजामिम्प्रमृ
णीहिशत्रून्॥ अग्ग्नेष्ट्वातेजसासादयामि १३ अग्ग्निर्म्मूर्द्धा॥ दिवः
ककुत्पतिः पृथिव्याअयम्॥ अपाँरेताँसिजिन्न्वति॥ इन्द्रस्य



त्वौजसासादयामि १४ भुवोयज्ञस्य॥ भुवोयज्ञस्यरजसश्चनेताय

त्रानियुद्भिःसचेशेशिवाभिः॥दिविमूर्द्धानन्दधिषेस्वर्षाञ्जिह्वामग्नेच
कृषेहव्यवाहम् १५ ध्रुवासि॥धरुणास्तृताविश्वकर्म्मणा॥मात्वासमुद्र
उद्वधीन्मासुपर्णोव्यथमानापृथिवीन्दृꣳह १६ प्रजापतिष्ट्वा॥सादयत्त्वपा
म्पृष्ठेसमुद्रस्येमन्॥व्यचस्वतीम्प्रथस्वतीम्प्रथस्वपृथिव्यसि १७ भूरसि॥
भूरसिभूमिरस्यदितिरसिविश्वधायाविश्वस्यभुवनस्यधर्त्री॥पृथिवीं
यच्छपृथिवीन्दृꣳहपृथिवीम्माहिꣳसीः १८ विश्वेस्मैप्राणाय॥विश्वे
स्मैप्राणायोपानायव्यानायोदानायप्रतिष्ठायैचरित्राय॥अग्निष्ट्वाभि

Indira Gandhi Nati
Centre for the Arts

संहि पीतुमुत्थ्यास्वस्त्याछृर्द्दिषाशान्तमेनुतयादेवनयाङ्गिरस्वद्ध्रुवासीद १९ का पू-अ-
९४ ण्डात्काण्डात्प्ररोहन्ती ॥ परुषः परुषस्परि ॥ एवानोदूर्वेप्प्रतनुसहस्रेणश १३
तेनेच २० याशतेनेन ॥ प्प्रतनोषिसहस्रेणविरोहसि ॥ तस्यास्तेदेवीष्टकेविधे
महविषावयम् २१ यास्ते ॥ ऽ अग्नेसूर्य्येरुचोदिवमातन्वन्तिरश्मिभिः
॥ ताभिर्न्नोऽ अद्यसर्व्वाभीरुचेजनायनस्कृधि २२ यावः ॥ यावोदेवाः सूर्य्ये
रुचोगोष्वश्वेषुयारुचः ॥ इन्द्राग्नीताभिः सर्व्वाभीरुचन्नोधत्तबृहस्प ९४
ते २३ विराड्ज्योतिः ॥ विराड्ज्ज्योतिरधारयत्स्वराड्ज्ज्योतिरधारयत् ॥ प्र

एकत्रिꣳशच्चमऽएकत्रिꣳशच्चमेत्रयस्त्रिꣳशच्चमेयज्ञेनकल्पन्ताम् २४
चतस्रश्च ॥ मेष्टौचमेष्टौचमेद्वादशचमेद्वादशचमेषोडशचमेषोडशचमेविꣳश १४३
तिश्चमेविꣳशतिश्चमेचतुर्विꣳशतिश्चमेचतुर्विꣳशतिश्चमेष्टाविꣳशतिश्चमे

ष्टाविर्ठ॰शतिश्चमे द्वात्रिर्ठ॰शच्चमे द्वात्रिर्ठ॰शच्चमे षड्त्रिर्ठ॰शच्चमे षड्त्रिर्ठ॰शच्च
मेचत्वारिर्ठ॰शच्चमेचत्वारिर्ठ॰शच्चमेचतुश्चत्वारिर्ठ॰शच्चमेचतुश्चत्वारिर्ठ॰शच्च
मेष्टाचत्वारिर्ठ॰शच्चमेयज्ञेनकल्पन्ताम् २५ त्र्यविश्च॥मेत्र्यवीचमेदित्यवाट्
मेदित्यौहीचमेपञ्चाविश्चमेपञ्चावीचमेत्रिवत्सश्चमेत्रिवत्साचमेतुर्य्यवाट्
मेतुर्य्यौहीचमेयज्ञेनकल्पन्ताम् २६ पष्ठवाट्॥मेपष्ठौहीचमऽउक्षाचमेवशा
चमऽऋषभश्चमेवेहच्चमेनड्वाँश्चमेधेनुश्चमेयज्ञेनकल्पन्ताम् २७ वाजाय
स्वाहा॥प्रसवायस्वाहापिजायस्वाहाक्रतवेस्वाहावसवेस्वाहाहर्प्पतयेस्वा

सहि॰ हान्यैमुग्धायवैनꣳशिनायस्वाहाविनꣳशिनऽआन्त्यायनायस्वाहान्त्याय पू॰अ॰
१४४ भौवनायस्वाहाभुवनस्यपतयेस्वाहाधिपतयेस्वाहाप्रजापतयेस्वाहा॥इय १८
न्तेराण्मित्रायन्तासियमनऽऊर्जेत्वावृष्ट्यैत्वाप्रजानान्त्वाधिपत्याय २८
आयुर्यज्ञेनकल्पताम्प्राणोयज्ञेनकल्पताञ्चक्षुर्यज्ञेनकल्पताꣳश्रो
त्रंयज्ञेनकल्पतांवाग्यज्ञेनकल्पताम्मनोयज्ञेनकल्पतामात्मायज्ञेन
कल्पताम्ब्रह्मायज्ञेनकल्पताञ्ज्योतिर्यज्ञेनकल्पताꣳस्वर्यज्ञेनकल्प १४४
ताम्पृष्ठंयज्ञेनकल्पतांयज्ञोयज्ञेनकल्पताम॥स्तोमश्चयजुश्चऽऋक्चसा

Indira Gandhi National Centre for the Arts

मेचबृहच्चरथन्तरञ्च॥स्वर्द्देवाऽअगन्मामृताऽअभूमप्प्रजापतेःप्प्रजाऽअ
भूमवेट्स्वाहा २९ वाजस्यनु॥प्प्रसवेमातरम्महीमदितिन्नामवचसाकरामहे
॥यस्यामिदंव्विश्वम्भुवनमाविवेशतस्यान्नोदेवःसविताधर्मसाविषत् ३०
विश्वेअद्य॥मरुतोविश्वऽऊतीविश्वेभवन्त्वग्नयःसमिद्धाः॥विश्वेनोदे
वाऽअवसागमन्तुविश्वमस्तुद्रविणंवाजोऽअस्मे ३१ वाजोनः॥सप्तप्प्र
दिशश्चतस्रोवापरावतः॥वाजोनोविश्वैर्द्देवैर्द्धनसाताविहावतु ३२ वाजो
नः॥वाजोनोऽअद्यप्प्रसुवातिदानंवाजोदेवाँ२॥ऽऋतुभिःकल्पयाति॥

संहि· वाजोहिमासर्व्ववीरञ्जजान विश्वाऽआशा वाजंयतिर्ज्जयेयम् ॥ ३३ वाजः सू·अ·
१४५ पुरस्तात् ॥ वाजः पुरस्तादुतमध्यतोनो वाजोदेवाहूविषावर्द्धयाति ॥ वाजोहि १८
मासर्व्ववीरञ्चकारसर्व्वाऽआशा वाज पतिर्भ्भवेयम् ३४ सम्मा ॥ सृजामिप
यसापृथिव्याः सम्मासृजाम्म्यद्भिरोषधीभिः ॥ सोहंवाजंᳯसनेयमग्ग्ने
३५ पयः पृथिव्याम् ॥ पयः पृथिव्याम्पयऽओषधीषुपयोदिव्यन्तरिक्षेप
योधाः ॥ पयस्वतीः प्प्रदिशः सन्तुमह्यम् ३६ देवस्यत्वा ॥ सवितुः प्प्रसवे १४५
श्श्विनोर्ब्बाहुब्भ्याम्पूष्ष्णोहस्ताब्भ्याम् ॥ सरस्वत्यैवाचोयन्तुर्य्यन्त्रेणाग्ग्नेः

साम्म्राज्ज्येनाभिषिञ्चामि ३७ ऋताषाडृतधामा॥ ऋताषाडृतधामाग्नि
र्गन्धर्वस्तस्यौषधयोप्प्सरसो मुदो नाम॥ स न ऽ इदम्ब्रह्म क्षत्रम्पातु तस्मै
स्वाहा वाट्ताभ्यः स्वाहा ३८ सꣳहितो विश्वसामा॥ सूर्य्यो गन्धर्वस्तस्य मरी
चयोप्प्सरस ऽ आयुवो नाम॥ स न ऽ इदम्ब्रह्म क्षत्रम्पातु तस्मै स्वाहा वाट्
ताभ्यः स्वाहा ३९ सुषुम्णः सूर्य्यरश्मिः॥ सुषुम्णः सूर्य्यरश्मिश्चन्द्रमा ग
न्धर्वस्तस्य नक्षत्राण्यप्प्सरसो भेकुरयो नाम॥ स न ऽ इदम्ब्रह्म क्षत्रम्पा
तु तस्मै स्वाहा वाट्ताभ्यः स्वाहा ४० इषिरो विश्वव्यचा वातः॥ इषिरो विश्वव्यचा

संहि· चाद्यानोगन्धर्वस्तस्यापोऽअप्सरसऽऊर्ज्जोनाम॥सनऽइदम्ब्रह्मक्षत्र पू·अ·
१४६ म्पातुतस्मैस्वाहावाट्ताभ्यःस्वाहा ४१ भुज्युःसुपर्णः॥भुज्युःसुपर्णोय १८
ज्ञोगन्धर्वस्तस्यदक्षिणाऽअप्सरसस्तावानाम॥सनऽइदम्ब्रह्मक्षत्र-
म्पातुतस्मैस्वाहावाट्ताभ्यःस्वाहा ४२ प्रजापतिर्विश्वकर्म्मा॥मनोगन्ध
र्वस्तस्यऽऋक्सामान्यप्सरसऽएष्टयोनाम॥सनऽइदम्ब्रह्मक्षत्रम्पातु
तस्मैस्वाहावाट्ताभ्यःस्वाहा ४३ सनः॥सनोभुवनस्यपतेप्रजापतेयस्यत १४६
ऽउपरिगृहायस्यवेह॥अस्मैब्रह्मणेस्मैक्षत्रायमहिशर्म्मयच्छस्वाहा ४४

समुद्रोसि। समुद्रोसिनभस्वानार्द्रदानुः शम्भूर्म्मयोभूरभिमावाहिस्वा
हामारुतोसिमरुतांगणः शम्भूर्म्मयोभूरभिमावाहिस्वाहावस्यूरसिदु
वस्वाञ्छम्भूर्म्मयोभूरभिमावाहिस्वाहा ४५ यास्ते॥ऽअग्नेसूर्य्येरुचोदिवं
मातन्वन्तिरश्मिभिः॥ताभिर्न्नोऽअद्यसर्व्वाभिरुचेजनायनस्कृधि ४६ या
वोदेवाःसूर्य्येरुचोगोष्वश्वेषुयारुचः॥इन्द्राग्नीताभिःसर्व्वाभी
रुचन्नोधत्तबृहस्पते ४७ रुचन्नः॥रुचन्नोधेहिब्राह्मणेषुरुचꣳराजस्कृ
नस्कृधि॥रुचंविश्येषुशूद्रेषुमयिधेहिरुचारुचम् ४८ तत्त्वा॥यामिब्रह्मणे

Indira Gandhi National Centre for the Arts

णाव्वन्दमानस्तदाशास्ते यजमानो हविर्भिः ॥ अहेडमानो व्वरुणेह बोध्युरु 
शꣳस मान आयुः प्रमोषीः ४९ स्वर्ण ॥ स्वर्णघर्म्मः स्वाहा स्वर्णार्क्कः 
स्वाहा स्वर्णशुक्रः स्वाहा स्वर्णज्ज्योतिः स्वाहा स्वर्णसूर्य्यः स्वाहा ५० अ
ग्निय्युनज्मि ॥ अग्निय्युनज्मि शवसा घृतेन दिव्यꣳ सुपर्णव्वयसा बृ
हन्तम् ॥ तेन व्वयङ्गमेम ब्रध्नस्य विष्टपꣳ स्वो रुहाणा अधि नाकमुत्तमम्
५१ शतम् १००० ॥ इमौ ते ॥ पक्षावजरौ पतत्रिणौ याभ्याꣳ रक्षाꣳस्यपहꣳ 
स्यग्ने ॥ ताभ्याम्पतेम सुकृतामु लोकं य्यत्र ऋषयो जग्मुः प्रथमजाः पुरा

पाः ५२ इन्दुर्दक्षः ॥ श्येनऽऋतावा हिरण्यपक्षः शकुनो भुरण्युः
॥ महान्त्सधस्थे ध्रुवऽआनिषत्तो नमस्तेऽअस्तु मा मा हिंसीः ५३ दि
वो मूर्द्धासि पृथिव्या नाभिरूर्ग्गपामोषधीनाम् ॥ विश्वायुः शर्म्मस
प्रथा नमस्पथे ५४ विश्वस्य मूर्द्धन् ॥ विश्वस्य मूर्द्धन्नधि तिष्ठसि श्रि
तः समुद्रे ते हृदयमप्स्वायुरपो दत्तोदधिम्भिन्त ॥ दिवस्पर्जन्यादन्त
रिक्षात्पृथिव्यास्ततो नो वृष्ट्याव ५५ इष्टो यज्ञः ॥ इष्टो यज्ञो भृगुराशीर्दा
वसुभिः ॥ तस्य नऽइष्टस्य प्रीतस्य द्रविणेहागमेः ५६ इष्टोऽअग्निः ॥

संहि· ॥ इष्टो ऽअग्निराहुतः पिपर्त्तु न ऽइष्टꣳ हविः ॥ स्वगेदन्देवेभ्यो नमः ५७ पू·अ·

१४८ यदाकूतात् ॥ यदाकूतात्समसुस्रोद्धृदो वा मनसो वा सम्भृतञ्चक्षुषो वा १९

॥ तदनुप्रेत सुकृतामु लोकं यत्र ऽऋषयो जग्मुः प्रथमजाः पुराणाः ॥

५८ एतꣳ सधस्थ ॥ एतꣳ सधस्थ परि ते ददामि यमावहाच्छेवधिञ्जातवे

दाः ॥ अन्वागन्ता यज्ञपतिर्वो ऽअत्र तꣳ स्म जानीत परमे व्योमन् ५९

एतञ्जानाथ ॥ परमे व्योमन्देवाः सधस्था विद रूपमस्य ॥ यदागच्छात्पथि १४८

भिर्देवयानैरिष्टापूर्त्ते कृणवाथाविरस्मै ६० उद्बुध्यस्व ॥ उद्बुध्यस्वाग्ने-

प्रतिजागृहित्वमिष्टापूर्त्तेसᳪंसृजेथामयञ्च ॥ अस्म्मिन्त्सधस्थेऽ अ
ध्युत्तरस्मिन्विश्श्वेदेवायजमानश्चसीदत ६१ येनवहसि । सहस्रंयेना
ग्नेसर्व्ववेदसम् ॥ तेनेमंयज्ञन्नोनयस्स्वर्द्देवेषुगन्तवे ६२ प्रस्तरेणपरिधिना
॥ स्रुचावेद्याचबर्हिषा ॥ ऋचेमंयज्ञन्नोनयस्स्वर्द्देवेषुगन्तवे ६३ यद्दत्तम् ॥
यद्दत्तंयत्परादानंयत्पूर्त्तंयाश्चदक्षिणाः ॥ तदग्निर्वैश्श्वकर्म्मणः स्व
र्द्देवेषुनोदधत् ६४ यत्रधाराः ॥ यत्रधाराऽअनपेतामधोर्घृतस्यचयाः ॥
तदग्निर्वैश्श्वकर्म्मणः ॥ स्वर्द्देवेषुनोदधत् ६५ अग्निरस्मि ॥ अग्निरस्मि

संहि. जन्मनाजातवेदा घृतम्मेचक्षुरमृतम्मऽआसन् ॥ अर्कस्त्रिधातूरज- पू.अ.
१४९ सोविमानोजस्रोधर्म्मोहविरऽस्मिनाम ६६ ऋचोनाम ॥ ऋचोनामा- १९
स्मियजूंषिनामास्मिसामानिनामास्मि ॥ येऽअग्नयःपाञ्चज
न्याऽअस्याम्पृथिव्यामधि ॥ तेषामसित्वमुत्तमःप्रनोजीवातवेसुव ६७
वार्त्रहत्यायशवसेपृतनाषाह्यायच ॥ इन्द्रत्वावर्तयामसि ६८ सहदा
नुम्पुरुहूत ॥ क्षियन्तमहस्तमिन्द्रसम्पिणक्कुणारुम् ॥ अभिवृत्रंवर्द्ध १४९
मानम्पियारुमपादमिन्द्रतवसाजघन्थ ६९ विनः ॥ विनऽइन्द्रमृधोज

हिनीचार्षछपृतन्यतः ॥ योऽअस्माँ२ ॥ऽअभिदासत्यधरङ्गमयातमेः
७० मृगोन ॥ भीमःकुचरोगिरिष्ठाः परावतऽआजेगन्थापरस्याः ॥ सृकᳬ
सᳬ शायपविमिन्द्रतिग्मंविशत्रून्ताढि विमृधोनुदस्व ॥ ७१ ॥ वैश्वानरो
नः ॥ वैश्वानरोनऽऊतयऽआप्रयातुपरावतः ॥ अग्निर्न्नःसुष्टुतीरूप
७२ पृष्टोदिवि ॥ पृष्टोऽअग्निः पृथिव्यांपृष्टोविश्वाऽओषधीराविवेश
॥ वैश्वानरःसहसापृष्टोऽअग्निःसनोदिवासरिषस्पातुनक्तम् ७३
अश्यामतम् ॥ अश्यामतङ्कामग्नेतवोतीऽअश्यामरयिᳬरयिवःसु

संहि· वीरम्॥ अश्यामवाजमभिवाजयन्तोऽश्यामद्युम्नमजराजरन्ते ७४ व्वय पू·अ·
१५० न्तै॥ ऽअघ्नरेरिमाहिकामसुत्तानहस्तानमसोपसद्य॥ यजिष्ठेनमनसा- १९
यक्षिदेवानस्रेधतामन्मनाविप्रोऽअग्ने ७५ धामच्छदग्निः॥ धामच्छद्
ग्निरिन्द्रोब्रह्मादेवोबृहस्पतिः॥ सचेतसोविश्वेदेवायज्ञम्प्रावन्तुनः
शुभे ७६ त्वंयविष्ठ॥ दाशुषोनॄःपाहिशृणुधीगिरः॥ रक्षातोकमुतत्मना
७७ इतिसंहितापाठेअष्टादशोऽध्यायः १८ ॥ हरिः ओम्॥ स्वाद्वी १५०
त्वा॥ स्वादुनातीव्रान्तीव्रेणामृतामृतेन॥ मधुमतीम्मधुमतासृजामिस

र्ठ·सोमैन ॥ सोमौस्यभ्विह्योम्पञ्च्यस्वसर्रस्वत्यैपञ्च्यस्वेन्द्रायसुत्रा
म्णौपञ्च्यस्व १ परीतः ॥ परीतोषिञ्चतासुतर्ठ·सोमोयऽउत्तमर्ठ·हविः
॥ दधन्वायोनर्य्योऽअप्स्वन्तरासुषावसोममद्रिभिः २ वायोःपूतः
॥ पवित्रेणप्प्रत्यङ्कोमोऽअतिद्रुतः ॥ इन्द्रस्ययुज्ज्यःसखा ॥ वायोः
पूतःपवित्रेणप्प्राङ्कसोमोऽअतिद्रुतः ॥ इन्द्रस्ययुज्ज्यःसखा ३ पुना
तिते ॥ परिस्रुतर्ठ·सोमर्ठ·सूर्य्यस्यदुहिता ॥ वारेणशश्वतातना ४ ब्र
ह्मक्षत्रम् ॥ ब्रह्मक्षत्रम्पवतेतेजऽइन्द्रियर्ठ·सुरयासोमः सुतऽआ

संहि· सुतोमदाय॥ शुक्रेणदेवदेवताः पिपृग्धिरसेनान्नंयजमानायधे पू·अ·
१५१ हि ५ कुविदङ्ग॥ यवमन्तोयवंचिद्यथान्दान्त्यनुपूर्वंवियूय॥ इहेहै १९
षाङ्कृणुहिभोजनानियेबर्हिषोनमऽउक्तिंयजन्ति॥ उपयामगृहीतो
स्यश्विभ्यान्त्वासरस्वत्यैत्वेन्द्रायत्वासुत्राम्णऽएषतेयोनिस्तेजसे
त्वावीर्य्यायत्वाबलायत्वा ६ नानाहि॥ वान्देवहितꣳसदस्कृतम्मास
ꣳसृक्षाथाम्परमेव्योमन्॥ सुरात्वमसिशुष्मिणीसोमऽएषमामाहि १५१
ꣳसीःस्वांयोनिमाविशन्ती ७ उपयामगृहीतोसि॥ उपयामगृहीतो-

स्याश्विनन्तेजः सारस्वतंवीर्य्यमैन्द्रम्बलम् ॥ एषतेयोनिर्म्मोदाय
त्वानन्दायत्वामहसेत्वा ८ तेजोसि ॥ तेजोसितेजोमयिधेहिवीर्य्यम
सिवीर्य्यम्मयिधेहिबलमासिबलम्मयिधेह्योजोस्योजोमयिधेहिम
न्युरसिमन्युम्मयिधेहिसहोसिसहोमयिधेहि९याव्याघ्रम् ॥ याव्याघ्रंविषू
चिकोभौवृकञ्चरक्षति ॥ श्येनम्पतत्रिणꣳसिꣳहꣳसेम्पात्वꣳहसः
१० यदापिपेष ॥ मातरम्पुत्रः प्रमुदितोधयन् ॥ एतत्तदग्नेऽअनृणोभ
वाम्यहतौपितरौमया ॥ सम्पृचस्थसम्माभद्रेणपृङ्क्तविपृचस्थवि

Indira Gandhi National Centre for the Arts

मा पाप्मनो पृङ्क्तः ॥ ११ ॥ देवा यज्ञम् ॥ देवा यज्ञमतन्वत भेष-
जम्भिषजाश्विना ॥ वाचा सरस्वती भिषगिन्द्रायेन्द्रियाणि दधतः
१२ दीक्षायै रूपम् ॥ दीक्षायै रूपꣳ शष्पाणि प्रायणीयस्य तोक्मा-
नि ॥ क्रयस्य रूपꣳ सोमस्य लाजाः सोमाꣳशवो मधु १३ आतिथ्य-
रूपम्मासरम् ॥ आतिथ्यरूपम्मासरम्महावीरस्य नग्नहुः ॥ रूपमु-
पसदामेतत्तिस्रो रात्रीः सुरासुता १४ सोमस्य रूपम् ॥ सोमस्य रूप-
ङ्क्रीतस्य परिस्रुत्परि षिच्यते ॥ अश्विभ्यान्दुग्धम्भेषजमिन्द्रायैन्द्रꣳ

सरस्वत्या १५ आसन्दीरूपम् ॥ आसन्दीरूपꣳ राजासन्द्यैवेद्यै
कुम्भीसुराधानी ॥ अन्तरऽउत्तरवेद्यारूपङ्कारोतरोभिषक् १६ वे
द्यावेदिः ॥ वेद्यावेदिः समाप्यतेबर्हिषाबर्हिरिन्द्रियम् ॥ यूपेनयूप
ऽआप्यतेप्रणीतोऽअग्निरग्निना १७ हविर्द्धानंयत् ॥ हविर्द्धानं
यदश्विनाग्नीध्रंयत्सरस्वती ॥ इन्द्रायैन्द्रꣳ सदस्कृतम्पत्नीशा
लङ्गार्हपत्यः १८ प्रैषेभिः प्रैषान् ॥ प्रैषेभिः प्रैषानाप्नोत्याप्रीभिरा-
प्रीर्यज्ञस्य ॥ प्रयाजेभिरनुयाजान्वषट्कारेभिराहुतीः १९ पशुभिः पशू

ira Gandhi National
Centre for the Arts

संहि॰ न्॥पशुभिः॒पशूनाप्नोतिपुरोडाशैर्ह॒वीꣳष्या॥ छन्दोभिः॒सामि पू॰भ॰
१५३ धेनीर्याज्याभिर्वषट्कारान्२०धानाः॒करम्भः॒सक्तवः॒परीवापः॒ १९
पयोदधि॥सोमस्यरुपꣳहविषऽआमिक्षावाजिनम्मधु२१धानाना
ꣳरूपम्॥धानानाꣳरूपङ्कुवलम्परीवापस्यगोधूमाः॥सक्तूनाꣳरूप
म्बदरमुपवाकाःकरम्भस्य२२पयसोरूपम्॥पयसोरूपंयद्यवादु
ध्नोरूपङ्कर्कन्धूनि॥सोमस्यरूपंवाजिनꣳसौम्यस्यरूपमामिक्षा॥ १५३
२३आश्रावय॥आश्रावयेतिस्तोत्रियाःप्रत्याश्रावोऽअनुरूपः॥

वित्त्रेणपुनीहि॥ माशुक्क्रेणदेवदीद्द्यत्॥ अग्नेक्रत्वाक्रतूँ२ऽरनु४०
यत्तेपवित्त्रमर्चिष्ष्यग्नेविततमन्तरा॥ ब्रह्मतेनपुनातुमा४१ पवमानः
सः॥ पवमानःसोऽअद्द्यनःपवित्त्रेणविचर्षणिः॥ यःपोतासपुनातु
मा४२ उभाभ्यान्देव॥ सवितःपवित्त्रेणसवेनच॥ मांपुनीहिविश्श्व-
तः४३ वैश्श्वदेवीपुनती॥ देव्व्यागाद्यस्यामिमाबह्व्यस्तन्न्वोवीतपृष्ठाः॥
तयामदन्तःसधमादेषुव्वयꣳस्यामपतयोरयीणाम् ४४ येसमानाःस
मनसःपितरोयमराज्ज्ये॥ तेषांल्लोकःस्वधानमोयज्ञोदेवेषुकल्प्यताम्४५

Indira Gandhi National
Centre for the Arts

संहि॰ येसमानाः॥येसमानाःसमनसोजीवाजीवेषुमामकाः॥ तेषाछंश्री पू॰अ॰
१५६ र्म्मयिकल्प्यतामस्मिँल्लोकेशतᳪंसमाः ४६ द्वेसृती॥ऽअश्रृणवम्पितॄ १९
णामहन्देवानामुतमर्त्यानाम्॥ताब्भ्यामिदंविश्श्वमेजत्समेतियदन्तरापित
रम्मातरञ्च ४७ इदᳪंहविः॥इदᳪंहविःप्रजननम्मेऽअस्तुदशवीरᳪंस
र्वगणᳪंस्वस्तये॥आत्मसनिप्प्रजासनिपशुसनिलोकसन्न्यभयसनि
॥अग्निःप्रजाम्बहुलाम्मेकरोत्वन्नम्पयोरेतोऽअस्म्मासुधत्त ४८ उदी १५६
रताम्॥उदीरतामवरऽउत्परासऽउन्मध्यमाःपितरःसोम्म्यासः॥अ

Indira Gandhi National
Centre for the Arts

यजेति धाय्या रूपम्प्रगाथा येयजामहाः २४ अर्द्धऽऋचैरुक्थाना
म्॥ अर्द्धऽऋचैरुक्थानाꣳ रूपम्पदैराप्नोति निविदः प्रणवैः शस्त्रा
णाꣳ रूपम्पयसा सोमऽआप्यते २५ अश्विभ्याम्प्रातःसवनम्॥ अश्वि
भ्याम्प्रातःसवनमिन्द्रेणैन्द्रम्माध्यन्दिनम्॥ वैश्वदेवꣳ सरस्वत्या तृतीय
माप्तꣳ सवनम्॥ २६ वायव्यैर्वायव्यानि॥ वायव्यैर्वायव्यान्याप्नोति
सतेन द्रोणकलशम्॥ कुम्भीभ्यामम्भृणौ सुते स्थालीभिः स्थालीराप्नो
ति २७ यजुर्भिराप्यन्ते॥ यजुर्भिराप्यन्ते ग्रहा ग्रहैः स्तोमाश्च विष्टुतीः

संहि ॥ छन्दोभिरुक्थाशस्त्राणिसाम्नावभृथऽआप्यंते २८ इडाभिर्भ- पू. अ.
१५४ क्षान् ॥ इडाभिर्भक्षानाप्नोतिसूक्तवाकेनाशिषः ॥ शंयुनापत्नीसंया १९
जान्त्समिष्टयजुषासंस्थाम् २९ व्रतेनदीक्षाम् ॥ व्रतेनदीक्षामाप्नो
तिदीक्षयाप्नोतिदक्षिणाम् ॥ दक्षिणाश्रद्धामाप्नोतिश्रद्धयासत्य-
माप्यते ३० एतावद्रूपम् ॥ एतावद्रूपंयज्ञस्ययद्देवैर्ब्रह्मणाकृतम् ॥ त
देतत्सर्वमाप्नोतियज्ञेसौत्रामणीसुते ३१ सुरावन्तम्बर्हिषदम् ॥ सुराव १५४
न्तम्बर्हिषदꣳसुवीरंयज्ञꣳहिन्वन्तिमहिषानमोभिः ॥ दधानाःसोमं

न्दिविदेवतासुमदेमेन्द्रंय्यजमानाःस्वुर्काः ३२ यस्ते॥ यस्तेरसःस-
म्भृतऽओषधीषुसोमस्यशुष्मःसुरायासुतस्य॥ तेनजिन्वयजमानम्म
देनसरस्वतीमश्विनाविन्द्रमग्निम् ३३ यमश्विना॥ नमुचेरासुरादधि
सरस्वत्यसुनोदिन्द्रियाय॥ इमन्तꣳशुक्रम्मधुमन्तमिन्दुꣳसोमꣳरा
जानमिहभक्षयामि ३४ यदत्र॥ यदत्ररिप्तꣳरसिनःसुतस्ययदिन्द्रो
ऽअपिबच्छचीभिः॥ अहन्तदस्यमनसाशिवेनसोमꣳराजानमिहभक्ष
यामि ३५ पितृभ्यःस्वधायिभ्यः॥ स्वधानमःपितामहेभ्यःस्वधायि-

संहि॰ भ्यः स्वधानमः ॥ प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः ॥ अक्ष पू॰अ॰

१५५ न्पितरोमीमदन्त पितरो तीतृपन्त पितरः पितरः शुन्धध्वम् ३६ पुनन्तुमा १९

पितरः सोम्यासः पुनन्तुमा पितामहाः पुनन्तु प्रपितामहाः ॥ पवि

त्रेण शतायुषा ॥ पुनन्तुमा पितामहाः ॥ पुनन्तु प्रपितामहाः ॥ पवित्रे

Indira Gandhi National Centre for the Arts

ण शतायुषा विश्वमायुर्व्यश्नवै ३७ अग्नऽआयूंषि ॥ पवसऽआ

सुवोर्ज्जमिषञ्च नः ॥ आरेबाधस्व दुच्छुनाम् ३८ ॥ पुनन्तुमा ॥ देवजनाः १५५

पुनन्तु मनसा धियः ॥ पुनन्तु विश्वा भूतानि जातवेदः पुनीहिमा ३९ प

सुंय्यऽईयुरवृकाऽऋतज्ञास्तेनोवन्तु पितरो हवेषु ४९ अङ्गिरसोनः
॥ पितरोनवंग्ग्वाऽअथर्वाणोभृगवःसोम्म्यासः ॥ तेषांव्वयꣳसुमतौ
यज्ञियानामपिभद्रेसौमनसेस्याम ५० येनः ॥ येनःपूर्व्वेपितरःसो-
म्म्यासोनूहिरेसोमपीथंव्वसिष्ठाः ॥ तेभिर्य्यमꣳसꣳरराणोहवीꣳष्यु
शन्नुशद्भिःप्रतिकाममत्तु ५१ त्वꣳसोम ॥ त्वꣳसोमप्रचिकितोमनी
षात्वꣳरजिष्ठमनुनेषिपन्थाम् ॥ तवप्प्रणीतीपितरोनऽइन्द्रोदेवेषुरत्न
मभजन्तधीराः ५२ त्वयाहि ॥ त्वयाहिनःपितरःसोमपूर्व्वेकर्म्माणिच-

Indira Gandhi National Centre for the Arts

 

रूः पवमानधीराः ॥ त्वन्त्वन्नवातःपरिधीँ१ऽरपोर्णुवीरेभिरश्वै
 र्म्मघवाभवानः ५३ त्वꣳसोम ॥ पितृभिः संविदानोनुद्यावापृथिवी 
ऽआततन्थ ॥ तस्मैतऽइन्द्रोहविषाविधेमवयꣳस्यामपतयोरयीणा
म् ५४ बर्हिषदः पितरः ॥ बर्हिषदःपितरऽऊत्यर्वागिमावोहव्याचकृ
माजुषध्वम् ॥ तऽआगतावसाशन्तमेनाथानः शंय्योररपोदधात ५५
आहम् ॥ आहम्पितॄन्त्सुविदत्राँ२॥ऽअवित्सिनपातञ्चविक्रमणञ्च 
विष्णोः ५६ बर्हिषदोयेस्वधयासुतस्यभजन्तपित्वस्तऽइहागमिष्ठाः

॥उपहूताः पितरः॥ सोम्म्यासो बर्हिष्ष्येषु निधिषु प्रियेषु॥ तऽ आ-
गमन्तु तऽ इह श्रुवन्त्वधि ब्रुवन्तु तेवन्त्वस्म्मान् ५७ आयन्तु॥ नः पि
तरः सोम्म्यासो ग्निष्वात्ताः पथिभिर्देवयानैः॥ अस्मिन्न्यज्ञे स्वध
यामदन्तोधि ब्रुवन्तु तेवन्त्वस्म्मान् ५८ अग्निष्वात्ताः पितरः॥ अग्नि-
ष्वात्ताः पितरऽ एह गच्छत सदः सदः सदत सुप्प्रणीतयः॥ अत्ता हवी
ᳪषि प्प्रयतानि बर्हिष्ष्यथा रयिᳪ सर्व्ववीरन्दधातन ५९ येऽ अग्निष्वा
त्ताः॥ येऽअग्निष्वात्ता येऽ अनग्निष्वात्ता मध्ध्ये दिवः स्वधया मादयन्ते॥

संहि॰ तेऽग्ने॑ स्वरा॒डसु॑नीतिमे॒तां य॑था॒व॒शं त॒न्वं॑ कल्पयाति ६० अ॒ग्नि॒ष्वा॒ पू॰ अ॰

१५८ त्ता॒नृ॒तु॒म॑ते॑ ॥ अ॒ग्नि॒ष्वा॒त्ता॒नृ॒तु॒म॑तो॒ हवाम॒हे नाराश॒ꣳसे सो॑मपी॒थं य॒ आशुः॑ ॥ १९

आ॒शुः॑ ॥ ते नो॒ विप्रा॑सः सु॒हवा॑ भवन्तु व॒यꣳ स्या॑म॒ पत॑यो रयी॒णाम् ६१

आच्या॒ जानु॑ ॥ द॒क्षि॒ण॒तो नि॒षद्ये॒मं य॒ज्ञम॒भि गृ॑णीत॒ विश्वे॑ ॥ मा हि॑ꣳसिष्ट

ष्ट पितरः॒ केन॑ चिन्नो॒ यद्व॒ आगः॑ पुरु॒षता॒ करा॑म ६२ आसी॑नासो अरु॒-

णीना॑म् ॥ आसी॑नासो अरु॒णीना॑मु॒पस्थे॑ र॒यिं ध॑त्त दा॒शुषे॒ मर्त्या॑य ॥ पु॒ १५८

त्रेभ्यः॑ पितर॒स्तस्य॒ वस्वः॒ प्रय॑च्छत॒ त इ॒होर्ज॑न्दधात ६३ यम॑ग्ने ॥

कव्यवाहनत्त्वंचिन्मन्न्यसेरयिम्॥ तन्नोगीर्ब्भिः श्श्रवाय्यन्देवत्राप
नयायुजम् ६४ योऽअग्निः॥ कव्यवाहनः पितॄन्यक्षदृतावृधः॥ प्रे
दुहव्यानिवोचतिदेवेब्भ्यश्चपितृब्भ्यऽआ ६५ त्वमग्ग्ने॥ त्वमग्ग्नऽईडितः
कव्यवाहनावाड्ढव्यानिसुरभीणिकृत्त्वी॥ प्रादाःपितृब्भ्यःस्वधयातेऽअ
क्षन्नद्धित्वन्देवप्प्रयताहवीᳬंषि ६६ येचे॥ येचेहपितरोयेचनेहयाँश्चविद्म
याँ२॥ ऽउँचनप्प्रविद्म॥ त्वंवेत्थयतितेजातवेदः स्वधाभिर्य्यज्ञᳬंसु
कृतञ्जुषस्व ६७ इदम्पितृब्भ्योनमोऽअस्त्वद्ययेपूर्व्वासोयऽउपरासऽई

संहि· युः॥ येपार्थिवेरजस्यानिषत्तायेवानूनꣳ सुवृजनासुविक्षु ६८ अधायथा पू·अ·
१५९ नः पितरः परासः प्रत्नासोऽअग्नऽऋतमाशुषाणाः॥ शुचीदयन्दीधिति १९
मुक्थशासः क्षामाभिन्दतोऽअरुणीरपव्रन् ६९ उशन्तस्त्वा॥ उशन्तस्त्वा
निधीमह्युशन्तः समिधीमहि॥ उशन्नुशतऽआवहपितॄन्हविषेऽअत्तवे
७० अपांफेनेन॥ अपांफेनेननमुचेः शिरऽइन्द्रोदवर्तयः। विश्वायद
जयस्पृधः ७१ सोमोराजा॥ सोमोराजामृतꣳ सुतऽऋजीषेणाजहा- १५९
न्मृत्युम्॥ ऋतेनसत्यमिन्द्रियंविपानꣳ शुक्रमन्धसऽइन्द्रस्येन्द्रियमि

Indira Gandhi National Centre for the Arts

दम्पयोमृतम्मधु ७२ अश्व्याः क्षीरम् ॥ अश्व्याः क्षीरंव्यपिबत्कुङ्ङाङ्गि-
रसोधिया ॥ ऋतेनसत्यमिन्द्रियंविपानꣳ शुक्रमन्धस इन्द्रस्येन्द्रि
यमिदम्पयोमृतम्मधु ॥ ७३ ॥ सोमम् अद्भ्यः ॥ सोमम् अद्भ्योव्यपिब-
च्छन्दसाहꣳसः शुचिषत् ॥ ऋतेनसत्यमिन्द्रियंविपानꣳ शुक्रमन्ध
स इन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ७४ ॥ ११०० ॥ कण्डि ॥ ० ॥ अन्ना
त्परिस्रुतः ॥ अन्नात्परिस्रुतोरसम्ब्रह्मणाव्यपिबत्क्षत्रम्पयः सोमं
प्रजापतिः ॥ ऋतेनसत्यमिन्द्रियंविपानꣳ शुक्रमन्धस इन्द्रस्ये-

संहि॰ न्द्रियमिदम्पयोमृतम्मधु ७५ रेतोमूत्रम्॥रेतोमूत्रंविजहातियो पू॰ अ॰
१६० निम्प्रविशदिन्द्रियम्॥गर्भोजरायुणावृतउल्बञ्जहातिजन्मना॥ १९
ऋतेनसत्यमिन्द्रियंविपानꣳशुक्रमन्धसुऽइन्द्रस्येन्द्रियमिदम्पयोमृ
तम्मधु ७६ दृष्ट्वारूपे॥व्याकरोत्सत्यानृतेप्रजापतिः॥अश्रद्धामनृते
ऽदधाच्छ्रद्धाꣳसत्येप्रजापतिः॥ऋतेनसत्यमिन्द्रियंविपानꣳशुक्रम
न्धसुऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ७७ वेदेनरूपे॥व्यपिबत्सु- १६०
तासुतौप्रजापतिः॥ऋतेनसत्यमिन्द्रियंविपानꣳशुक्रमन्धसुऽइ॰

न्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ७८ दृष्ट्वापरिस्रुतः ॥ दृष्ट्वापरिस्रु
तोरसꣳ शुक्रेणशुक्रंव्यपिबत्पयः सोमम्प्रजापतिः ॥ ऋतेनसत्यमि
न्द्रियंविपानꣳ शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ७९
सीसेनतन्त्रम् ॥ सीसेनतन्त्रम्मनसामनीषिणऽऊर्ण्णासूत्रेणकव
योवयन्ति ॥ अश्विनायज्ञꣳ सवितासरस्वतीन्द्रस्यरूपंवरुणोभि-
षज्यन् ८० तदस्य ॥ रूपममृतꣳ शचीभिस्तिस्रोदधुर्देवताः सꣳ
रराणाः ॥ लोमानिशष्पैर्बहुधानतोक्मभिस्त्वगस्यमाꣳसमभवन्न

संहि· लाजाः॥८१॥तदश्विनाभिषजारुद्रवर्तनीसरस्वतीवयतिपेशोऽ शु·अ·
१६१ अन्तरम्॥अस्थिमज्जानम्मासरैःकारोतरेणदधतोगवान्त्वचि ८२ १९
सरस्वतीमनसा॥पेशलंवसुनासत्याभ्यांवयतिदर्शतंवपुः॥रसम्परि
स्रुतानरोहितन्नग्नहुर्धीरस्तसरन्नवेम ८३ पयसाशुक्रम्॥पयसाशु-
क्रममृतञ्जनित्रꣳसुरयामूत्राज्जनयन्तरेतः॥अपामतिन्दुर्मतिं-
म्बाधमानाऽऊवध्यंवातꣳसब्वन्तदारात्॥८४इन्द्रःसुत्रामाहृदये १६१
नसत्यम्पुरोडाशेनसविताजजान॥यकृत्क्लोमानंवरुणोभिषज्यन्मतं

स्नेवायव्यैर्न्नमिनातिपित्तम् ८५ आन्त्राणिस्थालीः ॥ आन्त्राणि
स्थालीर्म्मधुपिन्वमानागुदाःपात्राणिसुदुघानधेनुः ॥ श्येनस्यपत्र
न्नप्लीहाशचीभिरासन्दीनाभिरुदरन्नमाता ८६ कुम्भोवनिष्टुः ॥ कु-
म्भोवनिष्टुर्ज्जनिताशचीभिर्य्यस्मिन्नग्रेयोन्याङ्गर्ब्भोऽअन्तः ॥ प्ला
शिर्व्यक्तःशतधारऽउत्सोदुहेनकुम्भीस्वधाम्पितृब्भ्यः ८७ मुखꣳसत् ॥ मुखꣳसदस्यशिरऽइत्सतेनजिह्वापवित्रमश्विनासन्त्सरस्वती ॥
चप्यन्नपायुर्ब्भिषगस्यवालोवस्तिर्न्नशेपोहरसातरस्वी ८८ अश्विब्भ्या-

ञ्चक्षुः॥अश्विभ्याञ्चक्षुरमृतङ्ग्रहाभ्याञ्छागेनतेजोहविषाशृतेन॥

पक्ष्माणिगोधूमैःकुवलैरुतानिपेशोनशुक्लमसितंवसाते ८९ अविर्न्न
॥मेषोनसिर्व्वीर्य्यायप्राणस्यपन्थाऽअमृतोग्रहाभ्याम्॥सरस्वत्युपवाकै
र्व्यानन्नस्यानिबर्हिर्बदरैर्ज्जजान ९० इन्द्रस्यरूपम्॥इन्द्रस्यरूपमृषभोबलायक
र्णाभ्याꣳश्रोत्रममृतङ्ग्रहाभ्याम्॥यवानबर्हिर्भ्रुविकेसराणिकर्क्कन्धू
यज्ञेमधुसारघम्मुखात् ९१ आत्मन्नुपस्थे॥आत्मन्नुपस्थेनवृकस्य 
लोममुखेश्मश्रूणिनव्याघ्रलोम॥केशानशीर्षन्यशसेश्रियैशि-

रवासिꣳहःस्वलोमत्विषिरिन्द्रियाणि ९२ अङ्गान्यात्मन् ॥ अङ्गा

न्यात्मन्भिषजातदश्विनात्मानमङ्गैःसमधात्सरस्वती॥ इन्द्रस्यरू

पꣳशतमानमायुश्चन्द्रेणज्ज्योतिरमृतन्दधानाः ९३ सरस्वतीयोन्याम्

॥सरस्वतीयोन्याङ्गर्भमन्तरश्विभ्याम्पत्नीसुकृतम्बिभर्ति ॥ अपाꣳ

रसेनवरुणोनसाम्नेन्द्रꣳश्रियैजनयन्नप्सुराजा ९४ तेजःपशूनाम्

॥ तेजःपशूनाꣳहविरिन्द्रियावत्परिस्रुतापयसासारघम्मधु॥ अश्विभ्या

न्दुग्धम्भिषजासरस्वत्यासुतासुताभ्याममृतःसोमइन्दुः ९५ इ०सं०एकोनविं०१९

संहि क्षत्रस्य योनिः ॥ क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसि ॥ मा त्वा हिꣳसीन्मा यू॰ अ॰
१६३ मा हिꣳसीः १ निषसाद ॥ धृतव्रतो वरुणः पस्त्यास्वा ॥ साम्राज्याय- २०
सुक्रतुः मृत्योः पाहि विद्योत्पाहि २ देवस्य त्वा ॥ सवितुः प्रसवेऽश्विनो
र्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥ अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसाया
भिषिञ्चामि सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभिषिञ्चामीन्द्रस्ये
न्द्रियेण बलाय श्रियै यशसेऽभिषिञ्चामि ३ कोऽसि ॥ कतमोऽसि कस्मै त्वा १६३
काय त्वा ॥ सुश्लोक सुमङ्गल सत्यराजन् ४ शिरो मे ॥ शिरो मे श्रीर्य-

Indira Gandhi National Centre for the Arts

शोमुखन्त्विषिः केशाश्चश्मश्श्रूणि॥राजामेप्प्राणोऽअमृतꣳसम्म्रा
ट्चक्षुर्व्विराट्छ्रोत्रम् ५ जिह्वामे॥भद्रंवाङ्महोमनोमन्न्युःस्वराड्भामः॥मोदाः
प्प्रमोदाऽअङ्गुलीरङ्गानिमित्त्रम्मेसहः ६ बाहूमे॥बाहूमेबलमिन्द्रियꣳ
हस्तौमेकर्म्मव्वीर्य्यम्॥आत्माक्षत्त्रमुरोमम ७ पृष्ठीर्म्मे॥राष्ट्रमुदरमꣳ
सौग्ग्रीवाश्चश्श्रोणी॥ऊरूऽअरत्नीजानुनीव्विशोमेङ्गानिसर्व्वतः ८ ना
भिर्म्मे॥चित्तंव्विज्ञानम्पायुर्म्मेपचितिर्ब्भसत्॥आनन्दनन्दावाण्डौमेभ
गः सौभाग्ग्यम्पसः॥जङ्घाब्भ्याम्पद्भ्यान्धर्म्मोस्मिव्विशिराजाप्प्रतिष्ठि-

संहि· तः ९ प्रतिक्षत्रे ॥ प्रतितिष्ठामिराष्ट्रे प्रत्यश्वेषु प्रतितिष्ठामिगोषु ॥ पू·अ·
१६४ प्रत्यङ्गेषु प्रतितिष्ठाम्यात्मन्प्रतिप्राणेषु प्रतितिष्ठामिपुष्टे प्रतिद्या २०
वापृथिव्योः प्रतिष्ठामियज्ञे १० त्रयादेवाः ॥ त्रयादेवाऽएकादशत्रय
स्त्रिंशाः सुराधसः ॥ बृहस्पतिपुरोहितादेवस्यसवितुः सवे ॥ देवा
देवैरवन्तुमा ११ प्रथमाद्वितीयैः ॥ प्रथमाद्वितीयैर्द्वितीयास्तृतीयैस्तृतीयाः
सत्येनसत्यंयज्ञेनयज्ञोयजुर्भिर्यजूंषिसामभिः सामान्यृग्भिर्ऋ १६४
चः पुरोनुवाक्याभिः पुरोनुवाक्यायाज्याभिर्याज्यावषट्कारैर्वषट्का

राऽ आहुतिभिराहुतयो मे कामान्त्समर्द्धयन्तु भूः स्वाहा १२ लोमा
निप्प्रयतिः ॥ लोमानिप्प्रयतिर्म्मम त्वङ्म ऽ आनतिरागतिः ॥ माꣳ
सम्म ऽ उपनतिर्व्वस्वस्थि मज्जा म ऽ आनतिः १३ यद्देवाः ॥ यद्देवा देवहे
डनन्देवासश्चकृमा वयम् ॥ अग्निर्म्मा तस्मादेनसो विश्वान्मुञ्चत्व
ꣳहसः १४ यदि दिवा ॥ यदि दिवा यदि नक्तमेनाꣳसि चकृमा वयम् ॥
वायुर्म्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः १५ यदि जाग्रत् ॥
यदि जाग्रद्यदि स्वप्न ऽ एनाꣳसि चकृमा वयम् ॥ सूर्य्यो मा तस्मादेनं

Indira Gandhi National Centre for the Arts

संहि· सोधिश्श्वान्न्मुञ्चत्वर्ठ॰·हसः १६ यद्ग्रामे ॥ यद्ग्रामेयदरण्ण्येयत्सभायां पू·अ·
१६५ य्यदिन्द्रिये ॥ यच्छूद्रेयदर्य्येयदेनश्चकृमावयंय्यदेकस्याधिधर्म्मणि त २०
स्यावयजनमसि १७ यदापः ॥ यदापोऽअग्घ्न्याऽइतिवरुणेतिशपामहे
ततोवरुणनोमुञ्च ॥ अवभृथनिचुम्पुणनिचेरुरसिनिचुम्पुणः ॥ अवदे
वैर्देवकृतमेनोयक्ष्यवमर्त्यैर्म्मर्त्यकृतम्पुरुराव्णोदेवरिषस्पाहि १८ समुद्रे
ते । समुद्रेतेहृदयमप्स्वन्तः सन्त्वाविशन्त्वोषधीरुतापः ॥ सुमित्रिया १६५
नऽआपऽओषधयः सन्तुदुर्म्मित्रियास्तस्मैसन्तुयोस्मान्द्वेष्टियञ्च

घृयान्द्विषम्मः १९ द्रुपदादिवमुमुचानः स्विन्नः स्नातोमलादिव ॥
पूतम्पवित्रेणेवाज्ज्यमापः शुन्धन्तुमैनेसः २० उद्वयम् ॥ उद्वयन्तमसस्प
रिस्वः पश्यन्तउत्तरम् ॥ देवन्देवत्त्रासूर्य्यमगन्म्मज्ज्योतिरुत्तमम् २१ अ
पोऽअद्य ॥ अपोऽअद्यान्न्वचारिषᳯरसेनसमसृक्ष्महि ॥ पयस्वानग्न
ऽआगमन्तम्मासᳯसृजवर्च्चसाप्प्रजयाचधनेनच २२ एधोसि ॥ एधी-
ष्येधिषीमहिसमिदसितेजोसितेजोमयिधेहि ॥ समाववर्तिपृथिवीस
मुषाः समुसूर्य्यः ॥ समुविश्श्वमिदञ्जगत् ॥ वैश्वानरज्ज्योतिर्भूया-

संहि॰ संविभून्कामान्व्यश्नवैभूःस्वाहा २३ अग्न्यादधामि ॥ समिधमग्ने पू॰ अ॰
१६६ व्रतयतेत्वयि ॥ व्रतञ्चश्रद्धाञ्चोपैमीन्धेत्वादीक्षितोऽअहम् २४ यत्रब्र २०
ह्म ॥ चक्षत्रञ्चसम्यञ्चौचरतः सह ॥ तंल्लोकम्पुण्यम्प्रज्ञेषंयत्र
देवाः सहाग्निना २५ यत्रेन्द्रः ॥ यत्रेन्द्रश्चवायुश्चसम्यञ्चौचर-
तः सह ॥ तंल्लोकम्पुण्यम्प्रज्ञेषंयत्रसेदिर्न्नविद्यते २६ अंशु ॥ शुनाते
॥ अंशुः पृच्यताम्परुषापरुः ॥ गन्धस्तेसोममवतुमदायरसोऽअ १६६
च्युतः २७ सिञ्चन्तिपरि ॥ षिञ्चन्त्युत्सिञ्चन्तिपुनन्तिच ॥ सुरायैब-

श्चौमदै किन्त्वोद्यंदतिकिन्त्वः २८ धानावन्तङ्करम्भिणमु॥ धानावन्तङ्करम्भिणमपू
पवन्तमुक्थिनम्॥ इन्द्र प्रातर्ज्जुषस्वनः २९ बृहदिन्द्राय॥ गायतमरुतोवृत्त्रहन्तम
म्॥ येनज्ज्योतिरजनयन्नृतावृधोदेवन्देवायजागृवि ३० अद्ध्वर्य्योऽअद्रिभिः॥
सुतꣳसोमम्पवित्रऽआनय॥ पुनाहीन्द्रायपातवे ३१ यो भूतानाम्॥ यो भूताना
मधिपतिर्य्यस्मिँल्लोकाऽअधिश्रिताः॥ यऽईशेमहतोमहाँस्तेनगृह्णामित्वाम
हम्मयिगृह्णामित्वामहम् ३२ उपयामगृहीतोस्यश्विभ्यान्त्वासरस्वत्यैत्वेन्द्राय
त्वासुत्राम्णऽएषते योनिरश्विभ्यान्त्वासरस्वत्यैत्वेन्द्रायत्वासुत्रा-

संहि· म्मणौ ३३ प्राण पामे ॥ ऽ अपानपाश्चक्षुष्पाः श्रोत्रपाश्चमे ॥ भू·अ·
१६७ वाचोमेविश्वभेषजोमनसोसिविलायकः ३४ अश्विनकृतस्यते ॥ २०
अश्विनकृतस्यतेसरस्वतिकृतस्येन्द्रेणसुत्राम्णाकृतस्य ॥ उप
हूतऽउपहूतस्यभक्षयामि ३५ समिद्धऽइन्द्रः ॥ समिद्धऽइन्द्रऽउष-
सामनीकेपुरोरुचापूर्वकृद्वावृधानः ॥ त्रिभिर्देवैस्त्रिंशता वज्र-
बाहुर्जघानवृत्रंविदुरौववार ३६ नराशंसः प्रति ॥ नराशंसः १६७
प्रतिशूरोमिमानस्तनूनपात्प्रतियज्ञस्यधाम ॥ गोभिर्वपावान्मधु-

Indira Gandhi National Centre for the Arts

नासमञ्जन्हिरण्ययैश्चन्द्रीयजति प्रचेताः ३७ ईडितोदेवैः॥ ई
डितोदेवैर्हरिवाँ२ अभिष्टिराजुह्वानोहविषाशर्धमानः॥ पुरन्द-
रोगोत्रभिद्वज्रबाहुरायातुयज्ञमुपनोजुषाणः ३८ जुषाणोबर्हिः
॥ जुषाणोबर्हिर्हरिवान्न इन्द्रः प्राचीनꣳसीदत्प्रदिशापृथिव्याः॥
उरुप्रथाः प्रथमानꣳस्योनमादित्यैरक्तंवसुभिः सजोषाः ३९ इन्द्र
न्दुरः॥ कवष्योधावमानावृषाणंयन्तुजनयः सुपत्नीः॥ द्वारोदे-
वीरभितोविश्रयन्ताꣳसुवीरावीरम्प्रथमानामहोभिः ४० उषासा-

संहि· नक्ता ॥ बृहती बृहन्तम्पयस्वती सुदुघे शूरमिन्द्रम् ॥ तन्तुन्ततम्पेशसा पू·अ·
१६८ संवयन्ती देवानान्देवंय्यजतः सुरुक्मे ४१ दैव्या मिमाना ॥ मनुषः पुरु २०
त्रा होतारा विन्द्रम्प्रथमा सुवाचा ॥ मूर्द्धन्यज्ञस्य मधुना दधाना प्राचीन
ञ्ज्योतिर्हविषा वृधातः ४२ तिस्रो देवीः ॥ तिस्रो देवीर्हविषा वर्द्धमाना
ऽइन्द्रञ्जुषाणा जनयो न पत्नीः ॥ अच्छिन्नन्तन्तुम्पयसा सरस्वतीडा दे
वी भारती विश्वतूर्त्तिः ४३ त्वष्टा दधत् ॥ त्वष्टा दधच्छुष्ममिन्द्राय वृष्णो- १६८
पाको चिष्टुर्य्यशसे पुरूणि ॥ वृषा यजन्वृषणम्भूरिरेता मूर्द्धन्यज्ञस्य

समेनक्कुदेवान् ४४ वनस्पतिरवसृष्टः॥ वनस्पतिरवसृष्टोनपाशैन्
स्त्मन्यो समञ्जञ्छमितानदेवः॥ इन्द्रस्यहव्यैर्ज्जठरम्पृणानः स्व-
दातियज्ञम्मधुनाघृतेन॥ ४५ ॥स्तोकानामिन्दुम्॥स्तोकानामि
न्दुम्प्रतिशूरऽ इन्द्रोवृषायमाणोवृषभस्तुराषाट्॥ घृतप्रुषामनसा-
मोदमानाः स्वाहादेवाऽअमृतामादयन्ताम् ४६ आयात्वि॥ आयात्वि
न्द्रोवसऽउपनऽइहस्तुतः सधमादस्तुशूरः॥ वावृधानस्तविषीर्य्य
स्यपूर्व्वीर्द्यौर्न्नक्षत्रमभिभूतिपुष्यात् ४७ आनः॥ आनऽइन्द्रोदूरा-

संहि· दानऽआसादभिष्टिकृदवसेयासदुग्ग्रः॥ओजिष्ठेभिन्नृपतिर्व्वज्ज्र- पू·अ·
१६९ बाहुः सङ्गे समत्सुतुर्व्वणिः पृतन्न्यून् ४८ आनः॥आनऽइन्द्रोहरिभि· २०
र्य्यात्वच्छार्व्वाचीनोवसेराधसेच॥तिष्ठातिवज्ज्रीमघवाविरप्प्शीमंय
ज्ञमनुन्नोव्वाजसातौ ४९ त्रातारमिन्द्रम्॥त्रातारमिन्द्रमवितारमिन्द्रꣳ·
हवेहवेसुहवꣳशूरमिन्द्रम्॥ह्वयामिशक्रम्पुरुहूतमिन्द्रꣳस्वस्तिनो-
मघवाधात्विन्द्रः ५० इन्द्रः सुत्रामा॥इन्द्रः सुत्रामास्ववाँ२ऽ॥ऽअ १६९
वोभिः सुमृडीकोभवतुविश्ववेदाः॥बाधतान्द्वेषोऽअभयङ्कृणोतु

सुवीर्य्यस्यपतयः स्याम ५१ तस्यैव्वयम् ॥ तस्यैव्वयर्ठ॰सुमतौयज्ञियस्यापिभद्रेसौमनसेस्याम ॥ससुत्रामास्ववाँ२ऽ ॥इन्द्रोऽ अस्म्मेऽआराच्चिद्वेषःसनुऽ तर्य्युयोतु ५२ आमन्द्रैः ॥आमन्द्रैरिन्द्रहरिभिर्य्याहि मयूररोमभिः ॥मात्वाकेचिन्नियमन्विन्नपाशिनोतिधन्न्वेवताँ२ऽ इहि ५३ एवेत् ॥एवेदिन्द्रंवृषणंवज्ज्रबाहुंवसिष्ठासोऽ अब्भ्यर्च्चन्त्यर्क्कैः ॥सनस्तुतोवीरवद्धातुगोमद्यूयम्पातस्वस्तिभिः सदानः ५४ समिद्धोऽ अग्निः ॥समिद्धोऽ अग्निरश्श्विनातप्तोघर्म्मोविराड्सुतः ॥दुहेधेनुः

संहि· सरस्वतीसोमꣳशुक्रमिहेन्द्रियम् ५५ तनूपाभिषजा ॥ सुतेश्विनो शू·अ·
१७० भासरस्वती ॥ मध्वारजाꣳसीन्द्रियमिन्द्रायपथिभिर्वहान् ५६ इन्द्राये २०
न्दुम् ॥ इन्द्रायेन्दुꣳसरस्वतीनराशꣳसेनननग्नहुम् ॥ अधातामश्विना
मधुभेषजम्भिषजासुते ५७ आजुह्वानासरस्वती ॥ न्द्रायेन्द्रियाणिवीर्य्य
म् ॥ इडाभिरश्विनाविषꣳसमूर्ज्जꣳसꣳरयिन्दधुः ५८ अश्विनान
मुचेः ॥ सुतꣳसोमꣳशुक्रम्परिस्रुता ॥ सरस्वतीतमाभरद्बर्हिषेन्द्राय १७०
पातवे ५९ कवष्योन ॥ व्यचस्वतीरश्विभ्यान्नदुरोदिशः ॥ इन्द्रोनरोद

सीऽउभेदुहेकामान्त्सरस्वती ६० उषासानक्तम् ॥ उषासानक्तमश्विना
दिवेन्द्रꣳ सायमिन्द्रियैः ॥ सञ्जानानेसुपेशसासमञ्जातेसरस्वत्या ६१
पातन्नः ॥ पातन्नोऽअश्विनादिवापाहिनक्तꣳ सरस्वती ॥ दैव्याहो-
ताराभिषजापातमिन्द्रꣳ सचासुते ६२ तिस्रस्त्रेधा ॥ सरस्वत्याश्विना
भारतीडा ॥ तीव्रम्परिस्रुतासोममिन्द्रायसुषुवुर्म्मदम् ६३ अश्विनाभे
षजम् ॥ अश्विनाभेषजम्मधुभेषजन्नः सरस्वती ॥ इन्द्रेत्वष्टायशः
श्रियꣳ रूपꣳ रूपमधुः सुते ६४ ऋतुथेन्द्रः ॥ ऋतुथेन्द्रोवनस्पतिः

संहि- शाशमानः परिस्त्रुता ॥ कीलालमश्विभ्याम्मधुदुहेधेनुःसरस्वती ६५ पू॰अ॰
१७१ गोभिर्न ॥ सोमममश्विना मासरेण परिस्त्रुता ॥ समधातंसरस्वत्यास्वा २०
हेन्द्रेसुतम्मधु ६६ अश्विनाहविः ॥ अश्विनाहविरिन्द्रियन्नमुचेर्धिया
सरस्वती ॥ आशुक्रमासुराद्वसुमघमिन्द्रायजज्ञिरे ॥ ६७ यमश्विना ॥
यमश्विनासरस्वतीहविषेन्द्रमवर्द्धयन् ॥ सबिभेदबलम्मघन्नमुचावा
सुरेसचा ६८ तमिन्द्रम् ॥ तमिन्द्रम्पशवःसचाश्विनोभासरस्वती ॥ दधा १७१
नाऽअभ्यनूषतहविषायज्ञऽइन्द्रियैः ६९ यऽइन्द्रे ॥ यऽइन्द्रऽइन्द्रियन्दधुः

सविताबरुणोभगः॥ससुत्रामाहविष्पतिर्य्यजमानायसश्चत
७०सविताबरुणः॥सविताबरुणोदधद्यजमानायदाशुषे॥आदत्तन
मुचेर्वसुसुत्रामाबलमिन्द्रियम् ७१बरुणःक्षत्रम्॥वरुणःक्षत्रमिन्द्रिय
म्भगेनसविताश्रियम्॥सुत्रामायशसाबलन्दधानायज्ञमाशत ७२अ
श्विनागोभिः॥अश्विनागोभिरिन्द्रियमश्वेभिर्वीर्य्यम्बलम्॥हवि-
षेन्द्रं·सरस्वतीयजमानमवर्द्धयन् ७३ तानासत्या॥सुपेशसाहिरण्य
वर्तनीनरा॥सरस्वतीहविष्मतीन्द्रकर्म्मसुनोवत ७४ताभिषजा॥

संहि· सुकर्म्मणासासुदुघासरस्वती॥सुवृत्त्रहाशतक्क्रतुरिन्द्रायदधुरिन्द्रि पू·अ·
१७२ यम् ७५ युवꣳसुरामम्॥युवꣳसुराममश्श्विनानमुचावासुरेसचा॥वि २०
पिपानाऽसरस्वतीन्द्रङ्कर्म्मस्वावतम् ७६ पुत्त्रमिवपितरौ॥पुत्त्रमिवपि-
तरावश्श्विनोभेन्द्रावथुःकाव्यैर्द्दꣳसनाभिः॥यत्सुसमंव्यपिबःशची
भिःसरस्वतीत्वामघवन्नभिष्ण्णक् ७७ यस्मिन्नश्श्वासः॥यस्मिन्न
श्श्वासऽऋषभासऽउक्षणोवशामेषाऽअवसृष्टासऽआहुताः॥कीला १७२
लपेसोमपृष्ठायवेधसेहृदामतिञ्जनयचारुमग्नये ७८ अहाव्यग्ने॥

हविरस्येतेस्रुचीवघृतञ्चम्मूवीवसोमः ॥ वाजसनिꣳरयिमस्मेसु
वीरम्प्रशस्तन्धेहियशसम्बृहन्तम् ७९शतम् १२०० ॥ अश्विनातेजसा ॥ चक्षुः
प्राणेनसरस्वतीवीर्य्यम् ॥ वाचेन्द्रोबलेनेन्द्रायदधुरिन्द्रियम् ८० गोमदूषुणास
त्या ॥ गोमदूषुणासत्याश्वावद्यातमश्विना ॥ वर्त्तीरुद्रानृपाय्यम् ८१ न
यत् ॥ नयत्परोनान्तरऽआदधर्षद्वृषण्वसू ॥ दुःशꣳसोमर्त्योरिपुः ८२
तानः ॥ तानऽआवोढमश्विनारयिम्पिशङ्गसन्दृशम् ॥ धिष्ण्यावरि
वोविदम् ॥ ८३ ॥ पावकानः ॥ पावकानःसरस्वतीवाजेभिर्वाजिनीवती

संहि· ।।यज्ञंवष्टुधियावसुः ८४ चोदयित्रीसूनृतानाम् ।। चोदयित्रीसूनृ- पू·अ·
१७३ तानाञ्चेतन्तीसुमतीनाम् ।। यज्ञन्दधेसरस्वती ८५ महोऽअर्ण्णः ।। २०
महोऽअर्ण्णःसरस्वतीप्रचेतयतिकेतुना ।। धियोविश्वाविराजति
८६ इन्द्रायाहि ।। चित्रभानोसुताऽइमेत्वायवः ।। अण्वीभिस्तनापू
तासः ८७ इन्द्रायाहि ।। धियेषितोविप्रजूतः सुतावतः ।। उपब्रह्मा-
णिवाघतः ८८ इन्द्रायाहि ।। इन्द्रायाहितूतुजानऽउपब्रह्माणिहरिवः १७३
।। सुतेदधिष्वनश्चनः ८९ अश्विनापिबताम् ।। अश्विनापिबताम्म-

धुसरस्वत्यासजोषसा॥ इन्द्रः सुत्रामा वृत्रहा जुषन्तांᳬ सोम्य-
म्मधु॥९०॥ ॥इतिवाजसनेयसंहितापाठे विंशोऽध्यायः॥२०॥

इतिवाजसनेयसंहितापूर्वविंशतिःसमाप्ता.

Indira Gandhi National
Centre for the Arts

॥श्रीगणेशायनमः॥ हरिःॐम्॥ इमम्मेवरुणश्श्रुधीहवमद्याचमृडय॥
त्वामवस्युराचके॥१॥ तत्त्वा॥ यामिब्रह्मणावन्दमानस्तदाशास्तेयजमानो
हविर्भिः॥ अहेडमानोवरुणेहबोध्युरुशꣳसमानऽआयुःप्रमोषीः॥२॥ त्वन्नः
॥त्वन्नोऽअग्नेवरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः॥ यजिष्ठोवह्नितमः
शोशुचानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत्॥ ३ ॥ सत्वम्॥ सत्व
न्नोऽअग्नेवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ॥ अवयक्ष्वनोवरुणꣳ
रराणोवीहिमृडीकꣳसुहवोनऽएधि॥४॥ महीमूषु॥ मातरꣳसुव्रतानां

संहि· मृतस्यपत्नीमवसेहुवेम ॥ तुविक्षत्रामजरन्तीमुरूचीᳬ सुशर्म्माणम उ·अ·
१ दितिर्ठ·सुप्रणीतिम् ॥ ५ ॥ सुत्रामाणम्पृथिवीम् ॥सुत्रामाणम्पृथि २१
वीन्द्यामनेहसर्ठ·सुशर्म्माणमदितिर्ठ·सुप्रणीतिम् ॥ दैवीन्नावᳬ स्वरित्राम
नागसमस्रवन्तीमारुहेमास्वस्तये ॥ ६ ॥ सुनावमारुहेयम् ॥ सुनावमारु
हेयमस्रवन्तीमनागसम् ॥ शतारित्राᳬ स्वस्तयै ॥ ७॥ आनः ॥ आनोमि
त्रावरुणाघृतैर्ग्गव्यूतिमुक्षतम् ॥ मद्ध्वारजाᳬसिसुक्रतू ॥ ८ ॥ प्रबाहवा ॥ १
सिसृतञ्जीवसेनऽआनोगव्यूतिमुक्षतइत्तेन ॥ आमाजनैश्श्रवयतंय्युवा

नाम्श्रुतम्मैमित्त्रावरुणाहवेमा ॥९॥ शन्नः ॥ शन्नोभवन्तुव्वाजिनोहवेषु
देवतातामितद्रवःस्वर्काः ॥ जम्भयन्तोहिंवृकंरक्षाᳪसिसनेम्म्यस्म
द्युयवन्नमीवाः ॥ १० ॥ व्वाजेवाजेवत ॥ व्वाजिनोनोधनेषुव्विप्प्राऽअमृताऽ
ऋतज्ञाः ॥ अस्यमद्ध्वः पिबतमादयद्ध्वन्तृप्तायातपथिभिर्द्देवयानैः ॥११
॥ समिद्धोऽअग्निः ॥ समिधासुसमिद्धोव्वरेण्यः ॥ गायत्त्रीछन्दऽइन्द्रिय
न्त्र्यविर्गौर्व्वयोदधुः ॥ १२ ॥ तनूनपाच्छुचिव्रतः ॥ तनूनपाच्छुचिव्रतस्त
नूपाश्चसरस्वती ॥ उष्णिहाछन्दऽइन्द्रियन्दित्यवाड्गौर्व्वयोदधुः ॥ १३ ॥

सं॑हि॰ इडा॑भिर॒ग्निः॑॥ इ॒डाभि॑र॒ग्निरी॒ड्यः सोमो॑दे॒वो ऽअम॑र्त्यः ॥ अ॒नु॒ष्टुप्छन्द॑ ऽ उ॰अ॰
२ इ॒न्द्रि॒यम्प॒ञ्चावि॒र्गौर्वयो॑दधुः॥ १४ ॥ सु॒ब॒र्हिर॒ग्निः॑॥ पू॒ष॒ण्वान्स्तीर्ण॑ २१
ब॒र्हिरम॑र्त्यः॥ बृ॒ह॒तीछन्द॑ ऽ इ॒न्द्रि॒यन्त्रि॒व॒त्सो गौर्वयो॑दधुः॥ १५ ॥ दुरो॑दे॒
वीः॑॥ दु॒रो॑दे॒वीर्दिशो॑म॒ही ब्र॒ह्मादे॒वोबृ॒ह॒स्पतिः॑ ॥ प॒ङ्क्तिश्छन्द॑ ऽ इ॒हेन्द्रि॒
यन्तु॑र्य॒वाड्गौर्वयो॑दधुः ॥ १६ ॥ उ॒षसा॒नक्ता॑सु॒पेश॑सा॒ धि॒ष्ण्यै॑दे॒वा ऽअम॑
र्त्याः ॥ त्रि॒ष्टुप्छन्द॑ ऽ इ॒हेन्द्रि॒यम्प॑ष्ठ॒वाड्गौर्वयो॑दधुः ॥ १७ ॥ दैव्या॒ होता॑ २
रा॥ भि॒षजेन्द्रे॑ण स॒युजा॑ यु॒जा ॥ जग॑तीछन्द॑ ऽ इ॒न्द्रि॒यम॑न॒ड्वान्गौर्वयो॑दधुः

॥ १८ ॥ तिस्रऽइडा॥ तिस्रऽइडासरस्वतीभारतीमरुतोविशः ॥ विराड्
छन्दऽइहेन्द्रियन्धेनुर्गौर्न्नवयोदधुः ॥ १९ ॥ त्वष्टातुरीपः॥ त्वष्टातुरीपोऽअद्भुत
ऽइन्द्राग्नीपुष्टिवर्द्धना ॥ द्विपदाछन्दऽइन्द्रियमुक्षाग्गौर्न्नवयोदधुः ॥ २० ॥
शमितानः ॥ शमितानोवनस्पतिःसविताप्रसुवन्भगम् ॥ ककुप्छन्दऽ
इहेन्द्रियंवशावेहद्वयोदधुः ॥ २१ ॥ स्वाहायज्ञम् ॥ स्वाहायज्ञंवरुणःसुक्ष
त्रोभेषजङ्करत् ॥ अतिछन्दाऽइन्द्रियम्बृहदृषभोगौर्वयोदधुः ॥ २२ ॥ वस
न्तेनऽऋतुनादेवावसवस्त्रिवृतास्तुताः ॥ रथन्तरेणतेजसाहविरिन्द्रेवयो

Indira Gandhi National Centre for the Arts

संहि दधुः ॥ २३ ॥ ग्रीष्मेण ऋतुना ॥ देवा रुद्राः पञ्चदशे स्तुताः ॥ बृहता य उ.अ.
३ शसा बलꣳ हविरिन्द्रे वयो दधुः ॥ २४ ॥ वर्षाभिर्ऋतुनादित्या स्तोमे सप्तद २१
शे स्तुताः ॥ वैरूपेण विशौजसा हविरिन्द्रे वयो दधुः ॥ २५ ॥ शारदेन ऋतु
ना ॥ देवा एकविꣳश ऋभव स्तुताः ॥ वैराजेन श्रिया श्रियꣳ हविरि
न्द्रे वयो दधुः ॥ २६ ॥ हेमन्तेन ऋतुना ॥ देवास्त्रिणवे मरुत स्तुताः ॥ बले
न शक्वरीः सहो हविरिन्द्रे वयो दधुः ॥ २७ ॥ शैशिरेण ऋतुना ॥ देवास्त्रय ३
स्त्रिꣳशे ऽमृता स्तुताः ॥ सत्येन रेवतीः क्षत्रꣳ हविरिन्द्रे वयो दधुः ॥ २८ ॥

होतायक्षत् ॥ होतायक्षत्समिधाग्निमिडस्पदेऽश्विनेन्द्रꣳ सरस्वतीमजो
धूम्रोनगोधूमैः कुवलैर्भेषजम्मधुशष्पैर्न्नतेजऽइन्द्रियम्पयः सोमः प
रिस्रुताघृतम्मधुव्यन्त्वाज्ज्यस्य होतर्य्यज ॥ २९ ॥ होतायक्षत्तनूनपात्सर
स्वतीम् ॥ होतायक्षत्तनूनपात्सरस्वतीमविर्म्मेषोनभेषजम्पथामधुमताभ
रन्नश्विनेन्द्रायवीर्य्यम्बदरैरुपवाकाभिर्भेषजन्तोक्मभिः पयः सोमः परि
स्रुताघृतम्मधुव्यन्त्वाज्ज्यस्य होतर्य्यज ॥ ३० ॥ होतायक्षन्नराशꣳसन्न
ग्नहुम्पतिꣳ सुरयाभेषजम्मेषः सरस्वतीभिषग्रथोनचन्द्र्यश्विनोर्व्वपाः

संहि॰ इन्द्रस्यवीर्य्यम्बदरैरुपवाकाभिर्भेषजन्तोक्मभिःपयःसोमःपरिस्रुता उ॰अ॰
४ घृतम्मधुव्यन्त्वाज्ज्यस्यहोतर्य्यजे ॥ ३१ ॥ होतायक्षदिडेडितऽ ॥ होताय २१
क्षदिडेडितऽआजुह्वानःसरस्वतीमिन्द्रम्बलेनवर्द्धयन्नृषभेणगवेन्द्रियम-
श्विनेन्द्रायभेषजंय्यवैःकर्कन्धुभिर्म्मधुलाजैर्न्नमासरम्पयःसोमःपरिस्रु
ताघृतम्मधुव्यन्त्वाज्ज्यस्यहोतर्य्यजे ॥ ३२ ॥ होतायक्षद्बर्हिरूर्णम्म्रदाः
॥ होतायक्षद्बर्हिरूर्णम्म्रदाभिषङ्नासत्याभिषजाश्विनाश्वाशिशुमती ४
भिषग्धेनुःसरस्वतीभिषग्दुहऽइन्द्रायभेषजम्पयःसोमःपरिस्रुताघृ-

Indira Gandhi National Centre for the Arts

तम्मधुव्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ३३ ॥ होतायक्षद्दुरोदिशःकवष्योनव्य
चस्वतीरश्विभ्यान्नदुरोदिशइन्द्रोनरोदसीदुघेदुहेधेनुःसरस्वत्यश्विनेन्द्रा
यभेषजꣳशुक्रन्नज्ज्योतिरिन्द्रियम्पयःसोमःपरिस्रुताघृतम्मधुव्यन्त्वा
ज्ज्यस्यहोतर्य्यज ॥ ३४ ॥ होतायक्षत्सुपेशसोषेनक्तन्दिवाश्विनासमञ्जा
तेसरस्वत्यात्विषिमिन्द्रेनभेषजꣳश्येनोनरजसाहृदाश्रियानमासरम्पयः
सोमःपरिस्रुताघृतम्मधुव्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ३५ ॥ होतायक्षद्दैव्या
होतारा ॥ भिषजाश्विनेन्द्रन्नजागृविदिवानक्तन्नभेषजैःशूषꣳसरस्वती

संहि· भिषग्वसी सैनद्दुहऽइन्द्रियम्पयःसोमः परिस्रुतो घृतम्मधुव्यन्त्वाज्ज्य उ·अ·
५ स्युहोतुर्य्यज ॥ ३६ ॥ होतायक्षत्तिस्रोदेवीः ॥ होतायक्षत्तिस्रोदेवीर्न्नभे २१
षजन्नयस्त्रिधातवोपसोरूपमिन्द्रेहिरण्ययमश्विनेडानभारतीवाचा
सरस्वतीमहऽइन्द्रायदुहऽइन्द्रियम्पयःसोमःपरिस्रुतोघृतम्मधुव्या
न्त्वाज्ज्यस्यहोतुर्य्यज ॥ ३७ ॥ होतायक्षत्सुरेतसमृषभम् ॥ होताय-
क्षत्सुरेतसमृषभन्नर्य्यापसन्त्वष्टारमिन्द्रमश्विनाभिषजन्नसरस्वतीमो ५
जोनजूतिरिन्द्रियंवृकोनरभसोभिषग्यशाःसुरयाभेषजꣳश्रियानमा

सरम्पयः सोमः परिस्रुतो घृतम्मधु व्यन्त्वाज्ज्यस्य होतर्य्यज ॥ ३८ ॥
होता यक्षद्वनस्पतिꣳ शमितारम् ॥ होता यक्षद्वनस्पतिꣳ शमितारꣳ
शतक्रतुम्भीमन्नमुन्न्युꣳ राजानंव्याघ्रन्नमसाश्विनाभामꣳ सरस्वती
भिषगिन्द्राय दुदुहऽइन्द्रियम्पयः सोमः परिस्रुतो घृतम्मधु व्यन्त्वाज्ज्यस्य
होतर्य्यज ॥ ३९ ॥ होता यक्षदग्निꣳ स्वाहा ॥ होता यक्षदग्निꣳ स्वाहाज्ज्य
स्यस्तोकानाꣳ स्वाहा मेदसाम्पृथक्स्वाहा च्छागमश्विभ्याꣳ स्वाहा मेषꣳ स
रस्वत्यै स्वाहऽऋषभमिन्द्राय सिꣳहाय सहसऽइन्द्रियꣳ स्वाहाग्निम्भेष

संहि· जꣳस्वाहासोममिन्द्रियꣳस्वाहेन्द्रꣳसुत्रामाणꣳसवितारंवरुणम्भि उ·अ·
६ षजाम्पतिꣳस्वाहावनस्पतिम्प्रियम्पाथोनभेषजꣳस्वाहादेवाऽआज्य २१
पाजुषाणोऽअग्निर्भेषजम्पयः सोमःपरिस्रुताघृतम्मधुव्यन्त्वाज्यस्यहोत
र्य्यज॥ ४०॥होतायक्षदश्विनौछागस्य॥वपायामेदसोजुषेताꣳहविर्हो
तर्य्यज॥होतायक्षत्सरस्वतीम्मेषस्यवपायामेदसोजुषताꣳहविर्होतर्य्य
ज॥होतायक्षदिन्द्रमृषभस्यवपायामेदसोजुषताꣳहविर्होतर्य्यज॥ ४१॥ ६
होतायक्षदश्विनौसरस्वतीम्॥होतायक्षदश्विनौसरस्वतीमिन्द्रꣳसुत्रा

मोणामिमे सोमाः सुरामाणश्छागैर्न मेषैर्ऋषभैः सुताः शष्पैर्न तोक्म-
भिर्ल्लाजैर्म्महस्वन्तो मदा मासरेण परिष्कृताः शुक्राः पयस्वन्तोऽमृताः प्र-
स्थिता वो मधुश्चुतस्तानश्विना सरस्वतीन्द्रः सुत्रामा वृत्रहा जुषन्ताꣳ सो
म्यम्मधु पिबन्तु मदन्तु व्यन्तु होतर्य्यज ॥ ४२ ॥ होता यक्षदश्विनौ छाग-
स्य ॥ हविष ऽआत्तामद्य मध्यतो मेद ऽउद्भृतम्पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृ
भो घस्तान्नूनङ्घासे ऽअज्राणां यवसप्रथमानाꣳ सुमत्क्षराणाꣳ शत-
रुद्रियाणामग्निष्वात्तानाम्पीवोपवसनानाम्पार्श्वतः श्रोणितः शिताम

 तःउत्सादुतोऽङ्गादङ्गादवत्तानाङ्कुरेतऽएवाश्विनाजुषेताᳪं हुविर्होतुर्य्यजे 
 ॥ ४३ ॥ होतायक्षुत्सरस्वती मेषस्य हविषऽआवयदद्यमद्ध्युतोमेदऽउद्धृत 
म्पुराद्वेषोभ्यःपुरापौरुषेय्याग्गृभोघसन्नूनङ्घासेऽअज्ज्राणांय्यवसप्रथमा
नाᳪंसुमत्क्षराणाᳪंशतरुद्रियाणामग्निष्वात्तानाम्पीवोपवसनाम्पार्श्वतः
श्रोणितः शितामतऽउत्सादुतोऽङ्गादङ्गादवत्तानाङ्कुरदेवऽ॰सरस्वतीजुषताᳪं हु
विर्होतुर्य्यजे॥ ४४ ॥ होतायक्षदिन्द्रमृषभस्यहविषऽआवयदद्यमद्ध्युतो 
मेदऽउद्धृतम्पुराद्वेषोभ्यःपुरापौरुषेय्याग्गृभोघसन्नूनङ्घासेऽअज्ज्राणांय्य

Indira Gandhi National Centre for the Arts

वेसम्म्रथमानाꣳसुमत्क्षराणाꣳज्ञातरुद्रियाणामग्निष्वात्तानाम्पीवोप
वसनानाम्पार्श्वतःश्रोणितःशितामतउत्सादतोऽङ्गादङ्गादवत्तानाङ्करद्
देवमिन्द्रोजुषताꣳहविर्होतर्यज ॥ ४५ ॥ होतायक्षद्वनस्पतिमभिहिपि
ष्टतमयारभिष्ठयारशनयाधित ॥ यत्राश्विनोश्छागस्यहविषःप्रिया-
धामानियत्रसरस्वत्यामेषस्यहविषःप्रियाधामानियत्रेन्द्रस्यऋषभस्य
हविषःप्रियाधामानियत्राग्नेःप्रियाधामानियत्रसोमस्यप्रियाधामानि
यत्रेन्द्रस्यसुत्राम्णःप्रियाधामानियत्रसवितुःप्रियाधामानियत्रव

संहि· रुणस्यप्प्रियाधामानियक्षद्वनस्पतेः प्प्रियापाथाᳪंसियक्षद्देवानामा- उ·अ·
८ ज्ज्यपानाम्प्रियाधामानियक्षदग्नेर्होतुः प्प्रियाधामानितक्षत्तान्स्तुत्वैवोप २१
स्तुत्वैवोपावस्रक्षद्भभीयसः इवक्रत्वीकरद्देवन्देवोवनस्पतिर्ज्जुषताᳪं हवि
र्होतुर्य्यज ॥ ४६ ॥ होतायक्षदग्निᳪंस्विष्टकृतम् ॥ होतायक्षदग्निᳪंस्वि-
ष्टकृतमयाडग्निरश्विनोश्छागस्यहविषः प्प्रियाधामान्ययाट्सरस्वत्यामेष·
स्यहविषः प्प्रियाधामान्ययाडिन्द्रस्यऽऋषभस्यहविषः प्प्रियाधामान्य ८
याडग्नेः प्प्रियाधामान्ययाट्सोमस्यप्प्रियाधामान्ययाडिन्द्रस्यसुत्राम्णः

प्रियाधामान्ययाट्सवितुः प्रियाधामान्ययाड्वरुणस्य प्रियाधामान्य-
याड्वनस्पतेः प्रियापाथांस्ययाड्देवानामाज्यपानांप्रियाधामानि
यक्षदग्नेर्होतुः प्रियाधामानियक्षत्स्वम्महिमानमायजतामेज्याऽइषः
कृणोतुसोऽअध्वराजातवेदाजुषतांहविर्होतर्यज ॥ ४७ ॥ देवम्बर्हिः स
रस्वतीसुदेवमिन्द्रेऽअश्विना ॥ तेजोनचक्षुरक्ष्योर्बर्हिषादधुरिन्द्रियंव-
सुवनेवसुधेयस्यव्यन्तुयज ॥ ४८ ॥ देवीर्द्वारः देवीर्द्वारोऽअश्विनाभिष
जेन्द्रेसरस्वती ॥ प्राणन्नवीर्य्यन्नसिद्वारोदधुरिन्द्रियंवसुवनेवसुधेयस्य-

संहि॰ व्यन्तुयज ॥ ४९ ॥ देवीऽउषासौ ॥ देवीऽउषासावश्विनासुत्रामेन्द्रे सरस्व उ॰अ॰
१ ती ॥ बलन्नवाचमास्यऽउषाब्ध्यान्दधुरिन्द्रियंवसुवनेवसुधेयस्यव्यन्तुयज ॥ २१
॥ ५० ॥ देवीजोष्ट्रीदेवीजोष्ट्रीसरस्वत्यश्विनेन्द्रमवर्द्धयन् ॥ श्रोत्रन्नकर्ण्णयोर्य्य
शोजोष्ट्रीब्ध्यान्दधुरिन्द्रियंवसुवनेवसुधेयस्यव्यन्तुयज ॥ ५१ ॥ देवीऽऊ
र्ज्जाहुती ॥ देवीऽऊर्ज्जाहुतीदुधेसुदुघेन्द्रेसरस्वत्यश्विनाभिषजोवतः ॥
शुक्रन्नज्ज्योतिस्तनयोराहुतीधत्तऽइन्द्रियवसुवनेवसुधेयस्यव्यन्तुयज १
॥ ५२ ॥ देवादेवानाम् ॥ देवादेवानाम्भिषजाहोताराविन्द्रमश्विना ॥ वषट्कृ

रैः सरस्वती त्विषिन्न हृदये मतिर्ठहोतृभ्यान्दधुरिन्द्रियं वसुवने वसुधेय
स्य व्यन्तु यज ॥ ५३ ॥ देवीस्तिस्रः ॥ देवीस्तिस्रस्तिस्रो देवीरश्विनेडा स
रस्वती । शूषन्न मध्ये नाभ्यामिन्द्राय दधुरिन्द्रियं वसुवने वसुधेयस्य व्यन्तु
यज ॥ ५४ ॥ देवऽइन्द्रः ॥ देवऽइन्द्रो नराशंसस्त्रिवरूथः सरस्वत्याश्विभ्यामीयते रथः । रेतो न रूपममृतञ्जनित्रमिन्द्राय त्वष्टादधदिन्द्रियाणि व
सुवने वसुधेयस्य व्यन्तु यज ॥ ५५ ॥ देवो देवैः ॥ देवो देवैर्वनस्पतिर्हिरण्य
पर्णोऽअश्विभ्याᳪं सरस्वत्या सुपिप्पलऽइन्द्राय पच्यते मधु ॥ ओजो न जूति

संहि० ऋषभोनभामंवनस्पतिन्नोदधदिन्द्रियाणिवसुवनैवसुधेयस्यव्यन्तुय उ०अ०
१० जे॥५६॥देवम्बर्हिः॥देवम्बर्हिर्वारितीनामध्वरेस्तीर्णमश्विभ्यामूर्णम्म्र २१
दाःसरस्वत्यास्योनमिन्द्रतेसदः॥ईशायैमन्युꣳराजानम्बर्हिषादधुरिन्द्रियं
वसुवनेवसुधेयस्यव्यन्तुयजे॥५७॥देवोऽअग्निःस्विष्टकृद्देवान्यक्षद्यथा
यथꣳहोताराविन्द्रमश्विनावाचावाचꣳसरस्वतीमग्निꣳसोमꣳस्विष्टकृ
त्स्विष्टऽइन्द्रःसुत्रामासविताव्वरुणोभिषगिष्टोदेवोव्वनस्पतिःस्विष्टादेवा १०
ऽआज्यपाःस्विष्टोऽअग्निरग्निनाहोताहोत्रेस्विष्टकृद्यशोनदधदिन्द्रियमू

Indira Gandhi National

र्ज्जमपचितिꣳ स्वधां वसुवनं वसुधेयस्य व्यन्तु यज ॥५८॥ अग्निमद्य हो-
तारमवृणीतायं यजमानः पचन्पक्तीः पचन्पुरोडाशान्बध्नन्नश्विभ्या-
ञ्छागꣳ सरस्वत्यै मेषमिन्द्राय ऋषभꣳ सुन्वन्नश्विभ्याꣳ सरस्वत्याऽइन्द्रा
य सुत्राम्णे सुरासोमान्त्सूपस्थाऽअद्य ॥५९॥ सूपस्थाऽअद्य देवो वनस्प
तिरभवदश्विभ्याञ्छागेन सरस्वत्यै मेषेणेन्द्राय ऋषभेणाक्षँस्तान्मेदस्तः
प्रति पचतागृभीषतावीवृधन्त पुरोडाशैरपुरश्विना सरस्वतीन्द्रः सुत्रामा
सुरासोमाँस्त्वामद्य ॥६०॥ त्वामद्यऽऋषऽआर्षेयऽऋषीणान्नपादवृणीता

संहि॰ यंय्यजमानो बहुभ्यऽआसङ्गं तेभ्यऽएष मे देवेषु वसु वार्यायक्ष्यतऽइति उ॰अ॰
११ ता या देवा देवदानान्यदुस्तान्यस्माऽआ च शास्स्वा च गुरस्वेषितश्च होतर- २२
सि भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहि ॥ ६१ ॥ इति वाज
सनेयसंहितायां एकविंशोऽध्यायः ॥ २१ ॥ ॥ तेजोसि शुक्रममृतमायु-
ष्पाऽआयुर्म्मे पाहि ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो ह-
स्ताभ्यामाददे ॥ १ ॥ इमामगृभ्णन् ॥ इमामगृभ्णन्रशनामृतस्य पूर्वऽआयु ११
षि विदथेषु कव्या ॥ सानोऽअस्मिन्त्सुतऽआबभूवऽऋतस्य सामन्त्सरमारप

न्ती॥ २ ॥अग्निधाऽअसि॥अग्निधाऽअसिभुवनमसियन्तासिधर्त्ता॥
सत्वमग्निंवैश्वानरꣳसप्रथसङ्गच्छस्वाहाकृतः॥ ३ ॥स्वगात्वा॥देवेभ्यः
प्रजापतयेब्रह्मन्नश्वम्भन्त्स्यामिदेवेभ्यःप्रजापतयेतेनराध्यासम्॥त
म्बधानदेवेभ्यःप्रजापतयेतेनराध्नुहि॥ ४ ॥प्रजापतयेत्वा॥प्रजापतये
त्वाजुष्टम्प्रोक्षामीन्द्राग्निभ्यान्त्वाजुष्टम्प्रोक्षामिवायवेत्वाजुष्टम्प्रोक्षामिवि
श्वेभ्यस्त्वादेवेभ्योजुष्टम्प्रोक्षामिसर्वेभ्यस्त्वादेवेभ्योजुष्टम्प्रोक्षामि॥योऽ
अर्वन्तञ्जिघांꣳसतितमभ्यमीतिवरुणः॥परोमर्त्तःपरःश्वा॥ ५ ॥अग्न

Indira Gandhi National Centre for the Arts

येस्वाहा॥ अग्नयेस्वाहासोमायस्वाहापाम्मोदायस्वाहासवित्रेस्वाहावा
यवेस्वाहाविष्णवेस्वाहेन्द्रायस्वाहाबृहस्पतयेस्वाहामित्रायस्वाहावरु
णायस्वाहा॥६॥हिङ्कारायस्वाहा॥हिङ्कारायस्वाहाहिङ्कृतायस्वाहाक्र
न्दतेस्वाहावक्रन्दायस्वाहाप्रोथतेस्वाहाप्रप्रोथायस्वाहागन्धायस्वा-
हाघ्रातायस्वाहानिविष्टायस्वाहोपविष्टायस्वाहासन्दितायस्वाहावल्ग-
तेस्वाहासीनायस्वाहाशयानायस्वाहास्वपतेस्वाहाजाग्रतेस्वाहाकूजं- १२
तेस्वाहाप्रबुद्धायस्वाहाविजृम्भमाणायस्वाहाविचृतायस्वाहासꣳहाना

य॒स्वाहो॑पस्थिताय॒स्वाहा॒यनाय॒स्वाहा॒प्रायणाय॒स्वाहा॑॥ ७ ॥ य॒तेस्वाहा॑
य॒तेस्वाहा॒धाव॑ते॒स्वाहो॑द्द्रावाय॒स्वाहो॑द्द्रुताय॒स्वाहा॑शूकाराय॒स्वाहा॒शूकृ॑ताय॒-
स्वाहा॒निष॑ण्णाय॒स्वाहो॒त्थि॑ताय॒स्वाहा॑ज॒वाय॒स्वाहा॒बला॑य॒स्वाहा॑वि॒वर्त॑-
मानाय॒स्वाहा॒विवृ॑त्ताय॒स्वाहा॑वि॒धून्वा॒नाय॒स्वाहा॒विधू॑ताय॒स्वाहा॒शुश्रू॑षमा-
णाय॒स्वाहा॑शृ॒ण्व॒तेस्वाहे॒क्षमा॑णाय॒स्वाहे॑क्षि॒ताय॒स्वाहा॒वीक्षि॑ताय॒स्वाहा॑
नि॒मे॒षाय॒स्वाहा॒यद॑त्ति॒तस्मै॒स्वाहा॒यत्पिब॑ति॒तस्मै॒स्वाहा॒यन्मू॑त्रंक॒रोति॒
तस्मै॒स्वाहा॑कु॒र्व॒तेस्वाहा॑कृ॒ताय॒स्वाहा॑॥ ८ ॥ तत्स॑वि॒तुः॥ तत्स॑वि॒तु

 वरेण्यम्भर्गो देवस्यधीमहि ॥ धियोयोनः प्रचोदयात् ॥ ९ ॥ हिर 
ण्यपाणिमूतये ॥ सवितारमुपह्वये ॥ सचेत्तादेवतापदम् ॥ १० ॥ देव-
स्यचेततः ॥ देवस्यचेततोमहीम्प्रसवितुर्हवामहे ॥ सुमतिꣳसत्यराध
सम् ॥ ११ ॥ सुष्टुतिꣳसुमितीवृधः सुष्टुतिꣳसुमतीवृधोरातिꣳसवि
तुरीमहे ॥ प्रदेवायमतीविदे ॥ १२ ॥ रातिꣳसत्पतिम् ॥ रातिꣳसत्प
तिम्महेसवितारमुपह्वये ॥ आसवन्देववीतये ॥ १३ ॥ देवस्यसवितुः ॥ १३
देवस्यसवितुर्म्मतिमासवंविश्वदेव्यम् ॥ धियाभगम्मनामहे ॥ १४ ॥

अग्निꣳ स्तोमेन ॥ बोधय समिधानोऽ अमर्त्यम् ॥ हव्या देवेषु नो दधत् ॥
१५ ॥ स हव्यवाट् ॥ स हव्यवाडमर्त्यऽ उशिग्दूतश्चनोहितः ॥ अग्निर्धिया
समृण्वति ॥ १६ ॥ अग्निन्दूतम्पुरो दधे हव्यवाहमुप ब्रुवे ॥ देवाँ२ऽ आसा
दयादिह ॥ १७ ॥ अजीजनो हि पवमान सूर्य्यं विधारे शक्मना पयः ॥ गोजी
रया रꣳहमाणः पुरन्ध्या ॥ १८ ॥ विभूर्म्मात्रा ॥ प्रभूः पित्राश्वोसि हयोस्य
त्योसि मयोस्यर्वासि सप्तिरसि वाज्यसि वृषासि नृमणाऽ असि ॥ ययुर्न्नामा
सि शिशुर्न्नामास्यादित्यानाम्पत्वान्विहि देवाऽ आशापालाऽ एतन्देवेभ्योश्व

म्मेधायुष्प्राणोऽस्मितर्ठ·रक्षन्तुहरान्तिरिहरमतामिहधृतिरिहस्वधृतिःस्वाहा
॥१९॥ कायस्वाहा॥ कायस्वाहाकस्मैस्वाहाकतमस्मैस्वाहास्वाहाधि·
माधीतायस्वाहामनःप्रजापतयेस्वाहाचित्तंविज्ञातायदित्यैस्वाहादित्यैम
ह्यैस्वाहादित्यैसुमृडीकायैस्वाहासरस्वत्यैस्वाहासरस्वत्यैपावकायैस्वाहा
सरस्वत्यैबृहत्यैस्वाहापूष्णेस्वाहापूष्णेप्रपथ्यायस्वाहापूष्णेनरन्धिषायस्वाहा
त्वष्ट्रेस्वाहात्वष्ट्रेतुरीपायस्वाहात्वष्ट्रेपुरुरूपायस्वाहाविष्णवेस्वाहाविष्णवेनि
भूयपायस्वाहाविष्णवेशिपिविष्टायस्वाहा॥२०॥ विश्वोदेवस्य॥नेतु



Indira Gandhi National Centre for the Arts

र्म्मर्तोवुरीतसख्यम्॥ विश्वोरायऽइषुध्यतिद्युम्नंवृणीतपुष्यसेस्वा-
हा॥२१॥आब्रह्मन्॥आब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामाराष्ट्रे
राजन्यःशूरऽइषव्योतिव्याधीमहारथोजायतान्दोग्ध्रीधेनुर्वोढानड्वाना-
शुःसप्तिःपुरन्धिर्योषाजिष्णूरथेष्ठाःसभेयोयुवास्ययजमानस्यवीरो-
जायतान्निकामेनिकामेनःपर्ज्जन्योवर्षतुफलवत्योनऽओषधयःपच्यन्तां
य्योगक्षेमोनःकल्पताम्॥२२॥प्राणायस्वाहा॥पानायस्वाहाव्यानाय-
स्वाहाचक्षुषेस्वाहाश्रोत्रायस्वाहावाचेस्वाहामनसेस्वाहा॥२३॥प्राच्यैदि-

संहि· शे। स्वाहार्वाच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहार्वाच्यै दिशे स्वाहा प्रती उ·अ·
१५ च्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोदीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोर्ध्वायै दिशे· २२
स्वाहार्वाच्यै दिशे स्वाहावाच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा ॥ २४ ॥ अद्भ्यः
स्वाहा वार्भ्यः स्वाहोदकाय स्वाहा तिष्ठन्तीभ्यः स्वाहा स्रवन्तीभ्यः स्वाहा स्यन्द
मानाभ्यः स्वाहा कूप्याभ्यः स्वाहा सूद्याभ्यः स्वाहा धार्याभ्यः स्वाहार्णवा
य स्वाहा समुद्राय स्वाहा सरिराय स्वाहा ॥ २५ ॥ वाताय स्वाहा ॥ धूमाय स्वाहा १५
भ्राय स्वाहा मेघाय स्वाहा विद्योतमानाय स्वाहा स्तनयते स्वाहावस्फूर्जते स्वा

हा वर्षते स्वाहाववर्षते स्वाहोग्रं वर्षते स्वाहा शीघ्रं वर्षते स्वाहोद्गृह्णते स्वाहो
द्गृहीताय स्वाहा प्रुष्णते स्वाहा शीकायते स्वाहा प्रुष्वाभ्यः स्वाहा ह्रादुनीभ्यः
स्वाहा नीहाराय स्वाहा ॥ २६ ॥ अग्नये स्वाहा ॥ अग्नये स्वाहा सोमाय स्वा
हेन्द्राय स्वाहा पृथिव्यै स्वाहान्तरिक्षाय स्वाहा दिवे स्वाहा दिग्भ्यः स्वाहा
शाभ्यः स्वाहोर्व्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा ॥ २७ ॥ नक्षत्रेभ्यः स्वाहा ॥
नक्षत्रियेभ्यः स्वाहाहोरात्रेभ्यः स्वाहार्धमासेभ्यः स्वाहा मासेभ्यः स्वाहऽ
ऋतुभ्यः स्वाहार्तवेभ्यः स्वाहा संवत्सराय स्वाहा द्यावापृथिवीभ्यां स्वाहा

संहि॰ चन्द्रायस्वाहासूर्य्यायस्वाहारश्मिभ्यःस्वाहावसुभ्यःस्वाहारुद्रेभ्यःस्वा उ॰अ॰
१६ हादित्येभ्यःस्वाहामरुद्भ्यःस्वाहाविश्वेभ्योदेवेभ्यःस्वाहामूलेभ्यःस्वाहाश॥ २२
खाभ्यःस्वाहावनस्पतिभ्यःस्वाहापुष्पेभ्यःस्वाहाफलेभ्यःस्वाहौषधीभ्यः
स्वाहा ॥ २८ ॥ शतम् ॥ १३०० पृथिव्यैस्वाहा ॥ पृथिव्यैस्वाहान्तरिक्षायस्वा
हादिवेस्वाहासूर्य्यायस्वाहाचन्द्रायस्वाहानक्षत्रेभ्यःस्वाहाद्भ्यःस्वाहौष
धीभ्यःस्वाहावनस्पतिभ्यःस्वाहापरिप्लवेभ्यःस्वाहाचराचरेभ्यःस्वाहास १६
रीसृपेभ्यःस्वाहा ॥ २९ ॥ असवेस्वाहा ॥ असवेस्वाहावसवेस्वाहाविभुवेस्वाहाविवस्वते

स्वाहा गणश्रिये स्वाहा गणपतये स्वाहाभिभुवे स्वाहाधिपतये स्वाहा शूषाय स्वाहा सꣳसर्पाय स्वाहा चन्द्राय स्वाहा ज्योतिषे स्वाहा मलिम्लुचाय स्वाहा दिवापतयते स्वाहा॥ ३०॥ मधवे स्वाहा॥ मधवे स्वाहा माधवाय स्वाहा शुक्राय स्वाहा शुचये स्वाहा नभसे स्वाहा नभस्याय स्वाहेषाय स्वाहोर्ज्याय स्वाहा सहसे स्वाहा सहस्याय स्वाहा तपसे स्वाहा तपस्याय स्वाहाꣳहसस्पतये स्वाहा॥ ३१॥

वाजाय स्वाहा॥ प्रसवाय स्वाहापिजाय स्वाहा क्रतवे स्वाहा स्वः स्वाहा मूर्ध्ने स्वाहा व्यश्नुविने स्वाहान्त्याय स्वाहान्त्याय भौवनाय स्वाहा भुवनस्यपतये स्वा

संहि हाधिपतयेस्वाहाप्रजापतयेस्वाहा ॥ ३२ ॥ आयुर्यज्ञेन ॥ कल्पताᳪंस्वा उ॰अ॰
१७ हाप्राणोयज्ञेनकल्पताᳪंस्वाहापानोयज्ञेनकल्पताᳪंस्वाहाव्यानोयज्ञेनक २३
ल्पताᳪंस्वाहोदानोयज्ञेनकल्पताᳪंस्वाहासमानोयज्ञेनकल्पताᳪंस्वाहाचक्षु
र्यज्ञेनकल्पताᳪंस्वाहाश्रोत्रंयज्ञेनकल्पताᳪंस्वाहावाग्यज्ञेनकल्पताᳪंस्वाहामनोय
ज्ञेनकल्पताᳪंस्वाहात्मायज्ञेनकल्पताᳪंस्वाहाब्रह्मायज्ञेनकल्पताᳪंस्वाहाज्योति
र्यज्ञेनकल्पताᳪंस्वाहास्वर्यज्ञेनकल्पताᳪंस्वाहापृष्ठय्यज्ञेनकल्पताᳪंस्वाहायज्ञोयज्ञे १७
नकल्पताᳪंस्वाहा ॥ ३३ ॥ एकस्मैस्वाहाद्वाभ्याᳪंस्वाहाशतायस्वाहैकशता

यस्वाहैकशतायस्वाहाव्युष्ट्यैस्वाहास्वर्ग्गायस्वाहा॥३४ इतिश्रीवाजसनेयसंहिता
यांदीर्घपाठेद्वाविंशोऽध्यायः॥२२॥ ॥हिरण्यगर्ब्भऽसम्॥ हिरण्य
गर्ब्भःसमवर्त्तताग्रैभूतस्यजातःपतिरेकआसीत्॥सदाधारपृथिवीन्द्या
मुतेमाङ्कस्मैदेवायहविषाविधेम॥१॥उपयामगृहीतोसि॥प्रजापतये
त्वाजुष्टङ्गृह्णाम्म्येषतेयोनिःसूर्य्यस्तेमहिमा॥यस्तेहन्त्संवत्सरेमहिमास
म्बभूवयस्तेवायावन्तरिक्षेमहिमासम्बभूवयस्तेदिविसूर्य्येमहिमासम्बभूव
तस्मैतेमहिम्नेप्रजापतयेस्वाहादेवेभ्यः॥२॥यःप्राणतोनिमिषतोम

संहि॰ हित्वैकऽइद्राजाजगतोबभूव॥ यऽईशेऽअस्यद्विपदश्चतुष्पदः कस्मै उ॰अ॰
१८ देवायहविषाविधेम॥ ३ ॥उपयामगृहीतोसि॥ प्रजापतयेत्वाजुष्टङ्गृह्णा २३
म्येषतेयोनिश्चन्द्रमास्तेमहिमा॥ यस्तेरात्रौसंवत्सरेमहिमासम्बभूवयस्तेपृ
थिव्यामग्नौमहिमासम्बभूवयस्तेनक्षत्रेषुचन्द्रमसिमहिमासम्बभूवत-
स्मैतेमहिम्नेप्रजापतयेदेवेभ्यःस्वाहा॥ ४ ॥युञ्जन्तिब्रध्नमरुषञ्चरन्त
म्परितस्थुषः॥ रोचन्तेरोचनादिवि॥ ५ ॥युञ्जन्त्यस्य॥युञ्जन्त्यस्यका- १८
म्याहरीविपक्षसारथे॥ शोणाधृष्णूनृवाहसा॥ ६ ॥यद्वातः॥यद्वातोऽअ

Indira Gandhi National Centre for the Arts

पोऽअगेनीगन्प्रियामिन्द्रस्यतन्त्वम् ॥ एतꣳस्तौतरनेनपथापुनरश्वमा
वर्त्तयासिनः ॥ ७ ॥ वसवस्त्वा ॥ अञ्जन्तुगायत्रेणछन्दसारुद्रास्त्वाञ्जन्तुत्रै
ष्टुभेनछन्दसादित्यास्त्वाञ्जन्तुजागतेनछन्दसा ॥ भूर्भुवःस्वर्लाजीऽ३ञ्छाचीऽ३न्य
व्येगव्यऽएतदन्नमत्तदेवाऽएतदन्नमद्धिप्रजापते ॥ ८ ॥ कःस्वित् ॥ कःस्विदे-
काकीचरतिकऽउस्विज्जायतेपुनः ॥ किꣳस्विद्धिमस्यभेषजङ्किम्वावपनम्म
हत् ॥ ९ ॥ सूर्य्यऽएकाकी ॥ चरतिचन्द्रमाजायतेपुनः ॥ अग्निर्हिमस्यभेषज
म्भूमिरावपनम्महत् ॥ १० ॥ कास्वित् ॥ कास्विदासीत्पूर्वचित्तिःकिꣳस्विदासीद्बृहद्

संहि यः॥ कास्विदासीत्पिलिप्पिला कास्विदासीत्पिशङ्गिला॥ ११॥ द्यौरासीत् उ·अ·
१९ ॥ द्यौरासीत्पूर्वचित्तिरश्वऽआसीद्बृहद्वयः॥ अविरासीत्पिलिप्पिला रात्रि २३
रासीत्पिशङ्गिला॥ १२॥ वायुष्ट्वा॥ पचतैरवत्वसितग्रीवश्छागैर्न्न्यग्रोधश्च
मसैः शल्मलिर्वृद्ध्या॥ एषस्यराथ्योवृषा पड्भिश्चतुर्भिरेदगन्ब्रह्माकृष्ण-
श्चनोवतु नमोग्नये॥ १३॥ सꣳशितोरश्मिना॥ रथः सꣳशितोरश्मि
नाहयः॥ सꣳशितोऽअप्स्वप्सुजाब्ब्रह्मासोमपुरोगवः॥ १४॥ स्वयंवाजि १९
न्॥ स्वयंवाजिँस्तन्वङ्कल्पयस्वस्वयंयजस्वस्वयञ्जुषस्व॥ महिमातेन्न्येनन-

नसुन्नशौ ॥ १५ ॥ नवै ॥ नवाऽउऽएतन्म्म्रियसेनरिष्ष्यसिदेवाँ२ँ ॥ इदेषिपु-
थिभिः सुगेभिः ॥ यत्त्रासंतेसुकृतोयत्त्रतेययुस्तत्त्रत्वादेवऽसविताद्धातु ॥
१६ ॥ अग्निः पशुः अग्निः पशुरासीत्तेनायजन्तसऽएतंल्लोकमजयद्यस्म्मि-
न्नग्निः सतेलोकोभविष्ष्यतितञ्जेष्ष्यसिपिबैताऽअपः ॥ वायुः पशुरासी
त्तेनायजन्तसऽएतंल्लोकमजयद्यस्म्मिन्वायुः सतेलोकोभविष्ष्यतितञ्जेष्ष्य
सिपिबैताऽअपः ॥ सूर्य्यः पशुरासीत्तेनायजन्तसऽएतंल्लोकमजयद्यस्म्मि-
न्त्सूर्य्यः सतेलोकोभविष्ष्यतितञ्जेष्ष्यसिपिबैताऽअपः ॥ १७ ॥ प्राणायु-

संहि स्वाहा॥ प्राणायस्वाहाव्यानायस्वाहा॥ अम्बे॑ अम्बिकेम्बालिकेनमानयति उ॰अ॰
२० कश्चन॥ससस्त्यश्वकःसुभद्रिकाङ्काम्पीलवासिनीम्॥१८॥गणानान्त्वा॥ २३
गणपतिꣳहवामहेप्रियाणान्त्वाप्रियपतिꣳहवामहेनिधीनान्त्वानिधिपतिꣳ
हवामहेवसोमम॥आहमजानिगर्भधमात्वमजासिगर्भधम्॥१९॥ता
उभौचतुरःपदःसम्प्रसारयावस्वर्गेलोकेप्रोर्णुवाथांवृषावाजीरेतोधारेतो
दधातु॥२०॥उत्सक्थ्याअवगुदन्धेहिसमञ्जिञ्चारयावृषन्॥यस्त्रीणा- २०
ञ्जीवभोजनः॥२१॥यकासकौ॥शकुन्तिकाहलगितिवञ्चति आहन्तिग

भेपसो निगल्गलीतिधारका ॥ २२ ॥ यको सकौ ॥ शकुन्तकऽ आहल-
गितिवञ्चति ॥ विवक्षतऽइवतेमुखमध्वर्यो मानस्त्वमभिभाषथाः ॥ २३ ॥
माताचते ॥ तेपिताचतेऽग्रंवृक्षस्यरोहतः ॥ प्रतिलामीतितेपितागभेमु
ष्टिमतंसयत् ॥ २४ ॥ माताचते ॥ तेपिताचतेऽग्रेवृक्षस्यक्रीडतः ॥ विवक्षत
ऽइवतेमुखंब्रह्मन्मात्वंवदोबहु ॥ २५ ॥ ऊर्ध्वामेनाम् ॥ ऊर्ध्वामेनामुच्छ्रापय
यगिरौभारंहरन्निव ॥ अथास्यैमध्यमेधतांशीतेवातेपुनन्निव ॥ २६ ॥
ऊर्ध्वमेनम् ॥ ऊर्ध्वमेनमुच्छ्रयतात् गिरौभारंहरन्निव ॥ अथास्यमध्यमेजतु-

Indira Gandhi National Centre for the Arts

संहि॰ शीतेवातेपुनन्निव ॥ २७ ॥ यदस्याः ॥ यदस्याऽअंहुभेद्याः कृधु स्थूलमु उ॰अ॰
२१ पातसत् ॥ मुष्काविदस्याऽएजतोगोशफेशकुलाविव ॥ २८ ॥ यद्देवासः यद्दे २३
वासोललामगुम्प्रविष्टीमिनमाविषुः ॥ सक्थ्नादेदिश्यतेनारीसत्यस्याक्षिभु
वोयथा ॥ २९ ॥ यद्धरिणः ॥ यद्धरिणोयवमत्तिनपुष्टम्पशुमन्यते ॥ शूद्रायद
दर्य्यजारानपोषायधनायति ॥ ३० ॥ यद्धरिणोयवमत्तिनपुष्टम्बहुमन्यते ॥
शूद्रोयदर्य्यायैजारोनपोषमनुमन्यते ॥ ३१ ॥ दधिक्राव्णोऽअकारिषञ्जि- २१
ष्णोरश्वस्यवाजिनः ॥ सुरभिनोमुखाकरत्प्रणऽआयूंषितारिषत् ॥ ३२ ॥

गायत्री त्रिष्टुप् ॥ गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्यासह ॥ बृहत्युष्णिहा क-
कुप्सूचिभिः शम्म्यन्तुत्वा ॥ ३३ ॥ द्विपदायाः ॥ द्विपदायाश्चतुष्पदास्त्रिप
दायाश्चषट्पदाः ॥ विच्छन्दायाश्चसच्छन्दाः सूचिभिः शम्म्यन्तुत्वा ॥ ३४ ॥ म
हानाम्न्योरेवत्यः ॥ महानाम्न्योरेवत्योविश्वाआशाः प्रभूवरीः ॥ मैघी
र्विद्युतोवाचः सूचिभिः शम्म्यन्तुत्वा ॥ ३५ ॥ नार्य्यस्तेपत्न्योलोमविचिन्व
न्तुमनीषया ॥ देवानाम्पत्न्योदिशः सूचिभिः शम्म्यन्तुत्वा ॥ ३६ ॥ रजताह
रिणीः ॥ सीसायुजोयुज्यन्तेकर्म्मभिः ॥ अश्वस्यवाजिनस्त्वचिसिमाः शा

Indira Gandhi National Centre for the Arts

संहि म्म्यन्तुशाम्म्यन्तीः॥ ३७ ॥कुविदङ्ग॥यवमन्तोयवंचिद्यथादान्त्यनुपूर्वंवि- उ॰अ॰
२२ यूय॥इहेहैषाङ्कृणुहिभोजनानियेबर्हिषोनमऽउक्तिंयजन्ति॥ ३८ ॥ कस्त्वा॥ २३
कस्त्वाच्छ्यतिकस्त्वाविशास्तिकस्तेगात्राणिशम्म्यति॥ कऽउतेशमिताकविः॥
३९॥ऋतवस्ते॥ ऋतवस्तऽऋतुथापर्वशमितारोविशासतु॥संवत्सरस्यतेज-
साशमीभिःशम्म्यन्तुत्वा॥ ४० ॥ अर्द्धमासाःपरूंषितेमासाऽआच्छ्यन्तुश-
म्म्यन्तःअहोरात्राणिमरुतोविलिष्टंसूदयन्तुते॥ ४१ ॥दैव्याऽअध्वर्यवः॥ २२
स्त्वाच्छ्यन्तुविचशासतु॥गात्राणिपर्वशस्तेसिमाः।कृण्वन्तुशाम्म्यन्तीः॥

Indira Gandhi National Centre for the Arts

४२ ॥ द्यौस्ते ॥ पृथिव्यन्तरिक्षंवायुश्छिद्रंपृणातुते ॥ सूर्य्यस्तेनक्षत्रैःसहलो
कङ्कृणोतुसाधुया ॥ ४३ ॥ शान्ते ॥ शन्तेपरेभ्योगात्रेभ्यःशमस्त्ववरेभ्यः ॥ शमस्थ
भ्योमज्जभ्यःशम्वस्तुतन्वैतव ॥ ४४ ॥ कःस्वित् ॥ कःस्विदेकाकीचरतिकऽउ
स्विज्जायतेपुनः ॥ किंस्विद्धिमस्यभेषजङ्किम्वावपनम्महत् ॥ ४५ ॥ सूर्य्यऽए
काकी ॥ चरतिचन्द्रमाजायतेपुनः ॥ अग्निर्हिमस्यभेषजम्भूमिरावपनम्महत् ॥
४६ ॥ किꣳस्वित् ॥ किꣳस्वित्सूर्य्यसमञ्ज्योतिःकिꣳसमुद्रसमꣳसरः ॥ किꣳ
स्वित्पृथिव्यैवर्षीयःकस्यमात्रानविद्यते ॥ ४७ ॥ ब्रह्मसूर्य्यसमम् ॥ ब्रह्मसूर्य्य

समञ्ज्योतिर्द्यौःसमुद्रसमꣳसरः॥इन्द्रःपृथिव्यैवर्षीयान्गोस्तुमात्रानवि 
द्यते॥४८॥पृच्छामित्वा॥चितयेदेवसखयदित्वमत्रमनसाजगन्थ॥येषुवि- 
ष्णुस्त्रिषुपदेष्वेष्टस्तेषुविश्वम्भुवनमाविवेशा३॥४९॥अपितेषु॥त्रिषुप
देष्वस्मियेषुविश्वम्भुवनमाविवेश॥सद्यःपर्य्येमिपृथिवीमुतद्यामेकेनाङ्गे
नदिवोअस्यपृष्ठम्॥५०॥केष्वन्तः॥पुरुषआविवेशकान्यन्तःपुरुषेअ
र्प्पितानि॥एतद्ब्रह्मन्नुपवल्हामसित्वाकिꣳस्विन्नःप्रतिवोचास्यत्र॥५१॥ 
पञ्चस्वन्तः॥पुरुषआविवेशतान्यन्तःपुरुषेअर्प्पितानि॥एतत्त्वात्रप्रतिम

न्वानोऽअस्मिन्नमायया भवस्युत्तरोमत् ॥ ५२ ॥ कास्वित् ॥ कास्विदासी-
त्पूर्वचित्तिः किंस्विदासीद्बृहद्वयः ॥ कास्विदासीत्पिलिप्पिला कास्विदासीत्पि-
शङ्गिला ॥ ५३ ॥ द्यौरासीत् ॥ द्यौरासीत्पूर्वचित्तिरश्वऽआसीद्बृहद्वयः ॥ अ-
विरासीत्पिलिप्पिला रात्रिरासीत्पिशङ्गिला ॥ ५४ ॥ काऽईम् ॥ काऽईमरे पिशङ्गि-
ला काऽईङ्कुरुपिशङ्गिला ॥ कऽईमास्कन्दमर्षति कऽईम्पन्थां विसर्प्पति ॥ ५५ ॥
अजारे ॥ पिशङ्गिला श्वावित्कुरुपिशङ्गिला ॥ शशऽआस्कन्दमर्षत्यहिः पन्थां
विसर्प्पति ॥ ५६ ॥ कत्यस्य ॥ विष्ठाः कत्यक्षराणि कति होमासः कतिधा समि-

संहि न्हः॥ यज्ञस्यत्वाविदथापृच्छमत्रकतिहोतारऽऋतुशोयजन्ति ॥ ५७ ॥ षडस्य उ.अ.
२४ ॥ विष्वाऽशतमक्षराण्यशीतिर्होमाःसमिधोहतिस्रः॥ यज्ञस्यतेविदथाप्रब्रु २३
वीमिसप्तहोतारऽऋतुशोयजन्ति ॥ ५८ ॥ कोऽअस्य॥ वेदभुवनस्यनाभिङ्को-
द्यावापृथिवीऽअन्तरिक्षम् ॥ कःसूर्य्यस्यवेदबृहतोजनित्रङ्कोवेदचन्द्रमसंयत
तोजाः॥ ५९ ॥ वेदाहम्॥ वेदाहमस्यभुवनस्यनाभिंवेदद्यावापृथिवीऽअन्तरिक्ष
म्॥ वेदसूर्य्यस्यबृहतोजनित्रमथोवेदचन्द्रमसंयतोजाः ॥ ६० ॥ पृच्छामित्वा २४
॥ पृच्छामित्वापरमन्तम्पृथिव्याःपृच्छामियत्रभुवनस्यनाभिः॥ पृच्छामित्वावृ-

ष्णो ऽअश्वस्य रेतः पृच्छामि व्वाचः परमं व्योम ॥ ६१ ॥ इयं वेदिः ॥ इयं वेदिः
परो ऽअन्तः पृथिव्या ऽअयं यज्ञो भुवनस्य नाभिः ॥ अयꣳ सोमो वृष्णो ऽअ
श्वस्य रेतो ब्रह्मायं व्वाचः परमं व्योम ॥ ६२ ॥ सुभूः स्वयम्भूः ॥ प्रथमो ऽन्त-
र्म्महत्यर्णवे ॥ दधे ह गर्ब्भमृत्वियं यतो जातः प्रजापतिः ॥ ६३ ॥ होता यक्षत्
॥ होता यक्षत्प्रजापतिꣳ सोमस्य महिम्नः ॥ जुषतां पिबतु सोमꣳ होतर्यज ॥
६४ ॥ प्रजापते न ॥ त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव ॥ यत्कामास्ते जु
हुमस्तन्नो ऽअस्तु वयꣳ स्याम पतयो रयीणाम् ॥ ६५ ॥ ॥ इति श्रीवाजसने

Indira Gandhi National Centre for the Arts

संहि यीसंहितायांदीर्ग्घपाठेत्रयोविंशोऽध्यायः ॥२३॥ ॥ अश्वस्तूपरः ॥अ उ.अ.
२५ श्वस्तूपरोगोमृगस्तेप्राजापत्याः कृष्णग्ग्रीवऽआग्नेयोरराटेपुरस्तात्सारस्व- २४
तीमेष्यधस्ताद्धन्वोराश्विनावधोरामौबाह्वोःसौमापौष्णःश्यामोनाभ्याᳪं
सौर्य्ययामौश्वेतश्चकृष्णश्चपार्श्वयोस्त्वाष्ट्रौलोमशसक्थौसक्थ्योर्व्वायव्यः
श्वेतःपुच्छऽइन्द्रायस्वपस्यायवेहद्वैष्णवोवामनः ॥१॥ रोहितोधूम्ररोहि
तः॥कर्कन्धुरोहितस्तेसौम्याबभ्रुररुणबभ्रुःशुकबभ्रुस्तेवारुणाःशितिरन्ध्रोन्यतःशि २५
तिरन्ध्रःसमन्तशितिरन्ध्रस्तेसावित्राःशितिबाहुरन्यतःशितिबाहुःसमन्त

Indira Gandhi National Centre for the Arts

शितिबाहुस्ते बार्हस्पत्याः पृषती क्षुद्रपृषती स्थूलपृषती ता मैत्रावरुण्यः ॥
२ ॥ शुद्धवालः सर्वशुद्धवालो मणिवालस्त आश्विनाः श्येतः श्येताक्षोऽरुण
स्ते रुद्राय पशुपतये कर्णा यामा अवलिप्ता रौद्रा नभोरूपाः पार्जन्याः ॥ ३ ॥ पृ
श्निस्तिरश्चीनपृश्निः ॥ पृश्निस्तिरश्चीनपृश्निरूर्ध्वपृश्निस्ते मारुताः फल्गूर्लोहि
तोर्णी पलक्षी ताः सारस्वत्यः प्लीहाकर्णः शुण्ठाकर्णोऽध्यालोहकर्णस्ते त्वा
ष्ट्राः कृष्णग्रीवः शितिकक्षोऽञ्जिसक्थस्त ऐन्द्राग्नाः कृष्णाञ्जिरल्पाञ्जि
र्महाञ्जिस्त उषस्याः ॥ ४ ॥ शिल्पा वैश्वदेव्यः ॥ शिल्पा वैश्वदेव्यो रोहि-

Indira Gandhi National Centre for the Arts

संहि· ण्यस्त्र्यवयोवाचेविज्ञाताऽअदित्यैसरूपाधात्रेवत्सतर्य्योदेवानाम्पत्नीभ्यः उ·अ·
२६ ॥ ५ ॥ कृष्णग्ग्रीवाऽआग्नेयाः ॥ शितिभ्रवोवसूनाꣳरोहितारुद्राणाꣳश्वे २४
ताऽअवरोकिणऽआदित्यानान्नभोरूपाः पार्ज्जन्न्याः ॥ ६ ॥ उन्नतऽऋषभः ॥
उन्नतऽऋषभोवामनस्तऽऐन्द्रावैष्णवाऽउन्नतः शितिबाहुः शितिपृष्ठस्तऽऐ
न्द्राबार्हस्पत्याः शुकरूपावाजिनाः कल्म्माषाऽआग्निमारुताः श्यामाः पौ-
ष्णाः ॥ ७ ॥ एताऽऐन्द्राग्नाः ॥ एताऽऐन्द्राग्ना द्विरूपाऽअग्नीषोमीयावाम २६
नाऽअनड्वाहऽआग्नावैष्णवावशामैत्रावरुण्योन्न्यतऽ एन्न्योमैत्र्यः ॥ ८ ॥

कृष्णग्ग्रीवाऽ आग्ग्नेयाः ॥ कृष्णग्ग्रीवाऽ आग्ग्नेयाबब्भ्रवः सौम्म्याः श्वेता
वायव्याऽ अविज्ञाताऽ अदित्यैस्सरूपा धात्रेवत्सतर्य्यो देवानाम्पत्नीभ्यः ॥
९ ॥ कृष्णा भौमाः ॥ कृष्णा भौमा धूम्म्राऽ आन्तरिक्षा बृहन्तो दिव्याः शबला वै
द्युताः सिध्मास्तारकाः ॥ १० ॥ धूम्म्रान्वसन्ताय ॥ धूम्म्रान्वसन्ताया ल
भते श्वेतान्ग्रीष्माय कृष्णान्वर्षाभ्योरुणाञ्छरदे पृषतो हेमन्ताय पिशङ्गा
ञ्छिशिराय ॥ ११ ॥ त्र्यवयो गायत्र्यै ॥ पञ्चावयस्त्रिष्टुभे दित्यवाहो जगत्यै त्रिव
त्साऽ अनुष्टुभे तुर्य्यवाहऽ उष्णिहे ॥ १२ ॥ पष्ठवाहो विराजे ॥ पष्ठवाहो विराजऽ

Indira Gandhi National Centre for the Arts

संहि उक्षाणोबृहत्याऽऋषभाःककुभेनड्वाहःपङ्क्त्यैधेनवोतिच्छन्दसे॥१३॥कृ उ॰अ
२७ ष्णग्ग्रीवाऽआग्नेयाःकृष्णग्ग्रीवाऽआग्नेयाबभ्रवःसौम्म्याऽउपध्वस्ताः २४
सावित्रावत्सतर्य्यःसारस्वत्यःश्यामाःपौष्णाःपृश्नयोमारुताबहुरूपावैश्व
देवाबभ्रवोद्यावापृथिवीयाः॥१४॥उक्ताःसञ्चराः॥उक्ताःसञ्चराऽएताऽऐ
न्द्राग्नाःकृष्णावारुणाःपृश्नयोमारुताःकायास्तूपराः॥१५॥अग्नयेनी
कवते॥प्रथमजानालभतेमरुद्भ्यःसान्तपनेभ्यःसवात्यान्मरुद्भ्योगृहमेधि २७
भ्योबष्किहान्मरुद्भ्यःक्रीडिभ्यःसꣳसृष्टान्मरुद्भ्यःस्वतवद्भ्योनुसृष्टान्

॥१६॥ उक्षाः सञ्चराः॥ उक्षाः सञ्चरा एता ऐन्द्राग्नाः प्राशृङ्गा माहे
न्द्रा बहुरूपा वैश्वकर्मणाः॥१७॥ धूम्रान्बभ्रुनीकाशान्॥ पितृणां सो
मवतां बभ्रून्धूम्रनीकाशान्पितृणां बर्हिषदां कृष्णान्बभ्रुनीकाशान्पि
तृणामग्निष्वात्तानां कृष्णाः पृषन्तस्त्रैयम्बकाः॥१८॥ उक्षाः सञ्चराः
॥ उक्षाः सञ्चरा एताः शुनासीरीयाः श्वेता वायव्याः श्वेताः सौर्याः॥१९
॥ वसन्ताय कपिञ्जलान्॥ वसन्ताय कपिञ्जलानालभते ग्रीष्माय कलविङ्कान्व
र्षाभ्यस्तित्तिरीञ्छरदे वर्त्तिका हेमन्ताय ककराञ्छिशिराय विककरान्॥२०॥

 समुद्रायशिशुमारान्॥ समुद्रायशिशुमारानालभतेपर्ज्जन्न्यायमण्डूकां 
२८ नुद्भ्योमत्स्यान्मित्रायकुलीपयान्वरुणायनाक्रान्॥२१॥सोमायहꣳसान् २४
॥सोमायहꣳसानालभतेवायवेबलाकाऽइन्द्राग्निभ्याङ्कुञ्चान्मित्रायमद्गू
न्वरुणायचक्रवाकान्॥२२॥अग्नयेकुटरून्॥अग्नयेकुटरूनालभतेवन-
स्पतिभ्यऽउलूकानग्नीषोमाभ्याञ्चाषानश्विभ्याम्मयूरान्मित्रावरुणाभ्याङ्कु
पोतान्॥२३॥सोमायलबान्॥सोमायलबानालभतेत्वष्ट्रेकौलीकान्गोषा २८
दीर्देवानाम्पत्नीभ्यःकुलीकादेवजामिभ्योग्नयेगृहपतयेपारुष्णान्॥२४॥

अह्ने पारावतान् ॥ अह्ने पारावतानालभते रात्र्यै सीचापूरहोरात्रयोः सन्धिभ्यो जतू
र्मासेभ्यो दात्यौहान्त्संवत्सराय महतः सुपर्णान् ॥ २५ ॥ भूम्या ऽ आखून् ॥ भूम्या ऽ
आखूनालभतेऽन्तरिक्षाय पाङ्क्तान्दिवे कशान्दिग्भ्यो नकुलान्बभ्रुकानवान्तर-
दिशाभ्यः ॥ २६ ॥ वसुभ्य ऽ ऋश्यान् ॥ वसुभ्य ऽ ऋश्यानालभते रुद्रेभ्यो रुरू
नादित्येभ्यो न्यङ्कून्विश्वेभ्यो देवेभ्यः पृषतान्त्साध्येभ्यः कुलुङ्गान् ॥ २७ ॥
ईशानाय परस्वतः ॥ ईशानाय परस्वत ऽ आलभते मित्राय गौरान्वरुणाय महि
षान्बृहस्पतये गवयांस्त्वष्ट्र ऽ उष्ट्रान् ॥ २८ ॥ प्रजापतये पुरुषान् ॥ प्रजापतये पुरु

Indira Gandhi National Centre for the Arts

संहि· षान्हस्तिनऽआलभंतेवाचेप्लुषींश्चक्षुषेमशकाञ्छ्रोत्रायभृङ्गाः ॥ २९ ॥ शा उ·अ·
२९ तम् ॥ १४०० ॥ प्रजापतयेच ॥ वायवेचगोमृगोवरुणायारण्योमेषोयमायकृष्णो २४
मनुष्यराजायमर्कटःशार्दूलायरोहिदृषभायगवयीक्षिप्रश्येनायवर्तिकानीलङ्गोः
कृमिःसमुद्रायशिशुमारोहिमवतेहस्ती ॥ ३० ॥ मयुःप्राजापत्यः ॥ मयुःप्रा
जापत्यऽउलोहलिक्ष्णोवृषदंशस्तेधात्रेदिशाङ्कङ्कोधुङ्क्षाग्नेयीकलविङ्को-
लोहिताहिःपुष्करसादस्तेत्वाष्ट्रावाचेक्रुञ्चः ॥ ३१ ॥ सोमायकुलङ्गः ॥ सोमा २९
यकुलङ्गऽआरण्योजोनकुलःशकातेपौष्णाःक्रोष्टामायोरिन्द्रस्यगौरमृ-

Indira Gandhi National Centre for the Arts

गः पिद्वोन्यङ्कुः ककुटस्तेनुमत्यै प्रतिश्रुत्कायै चक्रवाकः ॥ ३२ ॥ सौरी
बलाका ॥ शार्गः सृजयः शयाण्डकस्ते मैत्राः सरस्वत्यै शारिः पुरुषवाक्
श्वाविद्भौमी शार्दूलो वृकः पृदाकुस्ते मन्यवे सरस्वते शुकः पुरुषवाक् ॥ ३३ ॥
सुपर्णः पार्जन्यः ॥ सुपर्णः पार्जन्यऽआतिर्वाहसो दर्विदा ते वायवे बृह
स्पतये वाचस्पतये पैङ्गराजोलजऽआन्तरिक्षः प्लवो मद्गुर्मत्स्यस्ते नदीपतये द्यावापृ
थिवीयः कूर्मः ॥ ३४ ॥ पुरुषमृगश्चन्द्रमसः ॥ पुरुषमृगश्चन्द्रमसो गोधा काल
का दार्वाघाटस्ते वनस्पतीनां कृकवाकुः सावित्रो हंसो वातस्य नाक्रो मकरः

Indira Gandhi National
Centre for the Arts

संहि॰ कुलीपयस्तेकूपारस्यह्रियैशल्यकः॥ ३५॥ एणण्यन्ह्नः॥ एणण्यन्ह्नोम उ॰अ॰
३० ण्डूकोमूषिकातित्तिरिस्तेसर्प्पाणांल्लोपाशऽआश्विनःकृष्णोरात्र्याऽ २४
ऋक्षोजतूःसुषिलीकातऽइतरजनानाञ्जहकावैष्णवी॥ ३६॥ अन्यवा-
पोर्द्धमासानाम्॥ अन्यवापोर्द्धमासानामृश्योमयूरःसुपर्णस्तेगन्धर्वाणा
मपामुद्रोमासाङ्कश्यपोरोहित्कुण्डृणाचीगोलत्तिकातेप्सरसाम्मृत्यवे-
सितः॥ ३७॥ वर्षाहूर्ऋतूनाम्॥ वर्षाहूर्ऋतूनामाखुःकशोमान्थालस्ते- ३०
पितॄणाम्बलायाजगरोवसूनाङ्कपिञ्जलःकपोतऽउलूकःशशस्तेनिर्ऋत्यै

Indira Ga... N...onal Centre for the A...

वरुणायारण्योमेषः ॥ ३८ ॥ श्वित्रऽआदित्यानाम् ॥ श्वित्रऽआदित्याना
मुष्ट्रोघृणीवान्वार्ध्रीनसस्तेमत्याऽअरण्यायसृमरोरुरूरौद्रः क्वयिः कुट
रुर्दात्यौहस्तेवाजिनाङ्कामायपिकः ॥ ३९ ॥ खड्गोवैश्वदेवः ॥ श्वाकृ
ष्णः कर्णोगर्दभस्तरक्षुस्तेरक्षसामिन्द्रायसूकरः सिंहोमारुतः कृकला
सः पिप्पकाशकुनिस्तेशरव्यायैविश्वेषान्देवानाम्पृषतः ॥ ४० ॥ ॥ इति
श्रीवाजसनेयसंहितायांदीर्घपाठेचतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ ॐम् ॥
शादन्दद्भिः ॥ शादन्दद्भिरवकान्दन्तमूलैर्मृदम्बर्स्वैस्तेगान्दछंष्ट्राभ्याछंस

 रेस्वत्याऽअग्रजिह्वं जिह्वायाऽउत्सादमवक्रन्देन तालु वाजँ हनुभ्यामपऽ 
 आस्येन वृषणमाण्डाभ्यामादित्याँ श्मश्रुभिः पन्थानं भ्रूभ्यां द्यावापृथि 
वी वर्तोभ्यां विद्युतं कनीनकाभ्याँ शुक्लाय स्वाहा कृष्णाय स्वाहा पार्याणि
पक्ष्माण्यवार्याऽइक्षवोऽवार्याणि पक्ष्माणि पार्याऽइक्षवः ॥ १ ॥ वातं प्राणे
न ॥ वातं प्राणेनापानेन नासिके ऽउपयाममधरेणौष्ठेन सदुत्तरेण प्रकाशेनान्त
रमनूकाशेन बाह्यं निवेष्यं मूर्ध्ना स्तनयित्नुं निर्बाधेनाशनिं मस्तिष्केण वि ३१
द्युतं कनीनकाभ्यां कर्णाभ्याँ श्रोत्रँ श्रोत्राभ्यां कर्णौ तेदनीमधरकण्ठेना

पः शुष्ककण्ठेन चित्तम्मन्न्याभिरदितिं शीर्ष्णा निर्ऋतिन्निर्ज्जर्ज्जल्प्येन
शीर्ष्णा संक्रोशैः प्राणान्रेष्माणं स्तुपेन ॥ २ ॥ मशकान्केशैः ॥ मशका-
न्केशैरिन्द्रं स्वपसा वहेन बृहस्पतिं शकुनिसादेन कूर्म्माञ्छफैराक्रम-
णं स्थूराभ्यामृक्षलाभिः कपिञ्जलाञ्जवञ्जङ्घाभ्यामध्वानम्बाहुभ्याञ्जा-
म्बीलेनारण्यमग्निमतिरुग्भ्याम्पूषणन्दोर्भ्यामश्विनावंसाभ्यां रुद्रं रो-
राभ्याम् ॥ ३ ॥ अग्नेः पक्षतिः ॥ अग्नेः पक्षतिर्वायोर्न्निपक्षतिरिन्द्रस्य तृती-
या सोमस्य चतुर्थ्यदित्यै पञ्चमीन्द्राण्यै षष्ठी मरुतां सप्तमी बृहस्पतेरष्टम्य-

संहि र्य्यम्म्णो नवमी धातुर्द्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यमस्य त्रयोद उ॰अ॰
३२ शी ॥ ४ ॥ इन्द्राग्ग्न्योः पक्षतीः सरस्वत्यै निपक्षतिर्म्मित्रस्य तृतीयापाञ्चतु २५
र्त्थी निर्ऋत्यै पञ्चम्म्यग्नीषोमयोः षष्ठी सर्प्पाणाꣳ सप्तमी विष्णोरष्टमी पूष्णो
नवमी त्वष्टुर्द्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यम्म्यै त्रयोदशी द्यावापृथि-
व्योर्द्दक्षिणम्पार्श्वं विश्वेषान्देवानामुत्तरम् ॥ ५ ॥ मरुताꣳ स्कन्धाः ॥ मरुता
ꣳ स्कन्धा विश्वेषान्देवानाम्प्रथमा कीकसा रुद्राणान्द्वितीयादित्यानान्तृतीया ३२
वायोः पुच्छमग्नीषोमयोर्ब्भासदौ कुञ्चौ श्रोणिभ्यामिन्द्राबृहस्पतीऽ ऊरुभ्या

मित्रावरुणौवल्गाभ्यामाक्रमणꣳस्थूराभ्याम्बलङ्कुष्ठाभ्याम् ॥६॥ पूषणंवनि
ष्ठुनान्धाहीन्त्स्थूलगुदयासर्पान्गुदाभिर्विह्रुतऽआन्त्रैरपोवस्तिनावृषणमाण्डा
भ्यांवाजिनꣳशेपेनप्रजाꣳरेतसाचाषान्पित्तेनप्रदरान्पायुनाकूश्माञ्छकपि
ण्डैः ॥७॥ इन्द्रस्यक्रोडः ॥ इन्द्रस्यक्रोडोऽदित्यैपाजस्यन्दिशाञ्जत्रवोऽदित्यैभ
सज्जीमूतान्हृदयौपशेनान्तरिक्षम्पुरीततानभऽउदर्येणचक्रवाकौमतस्ना
भ्यान्दिवंवृक्काभ्याङ्गिरीन्प्लाशिभिरुपलान्प्लीह्नावल्मीकान्क्लोमभिर्ग्लौभि
र्गुल्मान्हिराभिःस्रवन्तीर्ह्रदान्कुक्षिभ्याꣳसमुद्रमुदरेणवैश्वानरम्भस्मना ॥

संहि ॥८॥ विधृतिन्नाभ्या॥ घृतꣳरसेनापोयूष्णामरीचीर्विप्रुड्भिर्नीहारमूष्म उ॰अ॰
२३ णाशीनंवसयाप्रुष्वाऽअश्रुभिर्ह्रादुनीर्दूषीकाभिरस्नारक्षाꣳसिचित्राण्य २५
ङ्गैर्नक्षत्त्राणिरूपेणपृथिवीन्त्वचाजुम्बकायस्वाहा॥९॥ हिरण्यगर्ब्भःसम्॥
हिरण्यगर्ब्भःसमवर्त्तताग्ग्रेभूतस्यजातःपतिरेकऽआसीत्॥सदाधारपृथिवी

Indira Gandhi National Centre for the Arts

न्द्यामुतेमाङ्कस्मैदेवायहविषाविधेम॥१०॥ यःप्राणतः॥ यःप्राणतोनि
मिषतोमहित्वैकऽइद्राजाजगतोबभूव॥यऽईशेऽअस्यद्विपदश्चतुष्पदःकस्मै २३
देवायहविषाविधेम॥११॥यस्येमे॥हिमवन्तोमहित्वायस्यसमुद्रꣳरसयास

हाहुः ॥ यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥ १२ ॥
यः आत्मदाः ॥ यऽआत्मदा बलदा यस्य विश्वऽउपासते प्रशिषं यस्य
देवाः ॥ यस्यच्छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥ १३ ॥
आनः आनो भद्राः क्रतवो यन्तु विश्वतो दब्धासोऽअपरीतासऽउद्भिदः
॥ देवानो यथा सदमिद्वृधेऽअसन्नप्रायुवो रक्षितारो दिवे दिवे ॥ १४ ॥ देवानां
भद्रा ॥ सुमतिर्ऋजूयतां देवानांꣳ रातिरभि नो निवर्त्तताम् ॥ देवानांꣳ सु-
ख्यमुपसेदिमा वयं देवा नः आयुः प्रतिरन्तु जीवसे ॥ १५ ॥ तान्पूर्वया निवि

Indira Gandhi National Centre for the Arts

संहि· दोहूमहेव्वयम्भगंम्मित्रमदितिन्दक्षमस्त्रिधम्॥ अर्य्यमणंव्वरुणꣳसोमम उ·अ·
३४ श्विनासरस्वतीनः सुभगामयस्करत् ॥ १६ ॥ तन्नः ॥ तन्नोवातोमयोभु २५
वातुभेषजन्तन्माताप्पृथिवीतत्पिताद्यौः ॥ तद्ग्रावाणःसोमसुतोमयोभु
वस्तदश्विनाशृणुतन्धिष्ण्यायुवम् ॥ १७ ॥ तमीशानम् ॥ तमीशानञ्जगत
स्तस्त्थुषस्प्पतिन्धियञ्जिन्न्वमवसेहूमहेव्वयम् ॥ पूषानोयथावेदसामसद्वृधे र
क्षितापायुरदब्धःस्वस्तये ॥ १८ ॥ स्वस्तिनः ॥ स्वस्तिनऽइन्द्रोवृद्धश्श्रवाः ३४
स्वस्तिनःपूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिःस्वस्तिनोबृह-

स्पतिर्दधातु ॥१९॥ पृषदश्वा मरुतः ॥ पृषदश्वा मरुतः पृश्निमातरः शुभं
यावानो विदथेषु जग्मयः ॥ अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवाऽ
अवसागमन्निह ॥२०॥ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यज-
त्राः ॥ स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥२१॥ शतमि
त् ॥ शतमिन्नु शरदोऽअन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ॥ पुत्रासो यत्र
पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥२२॥ अदितिर्द्यौरदितिरन्तरि
क्षमदितिर्माता स पिता स पुत्रः ॥ विश्वे देवाऽअदितिः पञ्च जनाऽअदिति·

Indira Gandhi National Centre for the Arts

संहि॰ ज्जातमदितिर्ज्जनित्वम् ॥ २३ ॥ मानः ॥ मानोमित्रोवरुणोऽअर्य्यमायुरि उ॰अ॰
३५ न्द्रऽऋभुक्षामरुतःपरिख्यन् ॥ यद्वाजिनोदेवजातस्यसप्तेःप्रवक्ष्यामोवि २५
दथेवीर्य्याणि ॥ २४ ॥ यन्निर्णिजा ॥ यन्निर्णिजारेक्णसाप्रावृतस्यरातिङ्गृभी
ताम्मुखतोनयन्ति ॥ सुप्राङजोमेम्यद्विश्वरूपऽइन्द्रापूष्णोः प्रियमप्प्ये
तिपाथः ॥ २५ ॥ एषच्छागः ॥ पुरोऽअश्वेनवाजिनापूष्णोभागोनीयतेविश्वदे
व्यः ॥ अभिप्रियंय्यत्पुरोडाशमर्व्वतात्वष्टेदेनꣳसौश्रवसायजिन्वति ॥ २६ ॥ य ३५
द्धविष्यम् ॥ यद्धविष्यमृतुशोदेवयानन्त्रिर्म्मानुषाःपर्य्यश्वन्नयन्ति ॥ अ

ओपुष्णाऽप्प्रथमोभागऽएतिषज्ञन्देवेब्भ्यः प्प्रतिवेदयन्नजः ॥ २७ ॥ होता
हुर्ष्युः ॥ होताद्ध्वर्ष्युराव्वयाऽअग्निमिन्धोग्ग्रावग्ग्राभऽउतशꣳस्तासुविप्प्रः ॥ तेनषज्ञे
नस्स्वरङ्कृतेनस्स्विष्टेनवक्षणाऽआपृणद्ध्वम् ॥ २८ ॥ षूपव्व्रस्काऽउत ॥ षेषूपवाहाश्चषा
लंष्येऽअश्श्वषूपायतक्षति ॥ षेचार्व्वतेपचनꣳसम्भरन्त्युतोतेषामभिगूर्त्तिर्न्नऽइ
न्वतु ॥ २९ ॥ उपप्प्र ॥ उपप्प्रागात्सुमन्मेधायिमन्म देवानामाशाऽउपव्वीतपृष्ठः
॥ अन्वेनंव्विप्प्राऽऋषयोमदन्तिदेवानाम्पुष्टेचकृमासुबन्धुम् ॥ ३० ॥ षद्वाजिनः
॥ षद्वाजिनोदामसन्दानमर्व्वतोषाशीर्षण्यारशनारज्जुरस्य ॥ षद्वाघास्यप्प्रभृ

संहि· तमास्त्वेतृणई सर्वाताते ऽअपिदेवेष्वस्तु ॥ ३१ ॥ यदश्वस्यक्रविषोम क्षि उ·अ·
३६ काशयद्वास्वरौस्वधितौरिप्तमस्ति ॥ यद्धस्तयोः शमितुर्यन्नखेषुसर्वाताते ऽ २५
अपिदेवेष्वस्तु ॥ ३२ ॥ यदूवध्यम् ॥ यदूवध्यमुदरस्यापवातिय ऽआमस्यक्रवि
षोगन्धोऽअस्ति ॥ सुकृतातच्छमितारः कृण्वन्तूतमेधंशृतपाकम्पचन्तु ॥ ३३
॥ यत्ते ॥ यत्तेगात्रादग्निनापच्यमानादभिशूलन्निहतस्यावधावति ॥ मातद्भूम्या
माश्रिषन्मातृणेषुदेवेभ्यस्तदुशद्भ्योरातमस्तु ॥ ३४ ॥ येवाजिनम् ॥ येवाजिनं ३६
म्परिपश्यन्तिपक्कंयऽईमाहुः सुरभिर्न्निर्हरेति ॥ येचार्वतोमाथंसभिक्षामुपास

Indira Gandhi National Centre for the Arts

तऽउतोतेषामभिगूर्तिर्न्नऽइन्वतु ॥ ३५ ॥ यन्नीक्षणम् ॥ यन्नीक्षणम्माँस्प
चन्न्याऽउखायायापात्राणि यूष्णऽआसेचनानि ॥ ऊष्मण्यापिधानाचरूणा
मङ्काःऽसूनाःऽपरिभूषन्त्यश्वम् ॥ ३६ ॥ मात्वा ॥ मात्वाग्निर्ध्वनयीद्धूमगन्धिर्म्मो
खाब्भ्राजन्त्यभिविक्क्तजघ्रिः ॥ इष्टंवीतमभिगूर्त्तंवषट्कृतन्तन्देवासः प्रतिगृभ्णन्त्य
श्वम् ॥ ३७ ॥ निक्क्रमणन्निषदनम् ॥ निक्क्रमणन्निषदनंविवर्त्तनंयच्चपड्वीशमर्व्व-
तः ॥ यच्चपपौयच्चघासिञ्जघाससर्व्वाताते ऽअपिदेवेष्वस्तु ॥ ३८ ॥ यदश्वाय ॥ यदश्वा
यवासऽउपस्तृणन्त्यधीवासंयाहिरण्यान्यस्म्मै ॥ सन्दानमर्व्वन्तम्पड्वीशम्प्रिया

संहि· देवेष्वायामयन्ति ॥ ३९ ॥ यत्ते ॥ सादेमहसाशूकृतस्यपार्ष्ण्यावाकशयावा उ·अ·
३७ तुतोद ॥ स्रुचेवताहविषोऽअध्वरेषुसर्वाताते ब्रह्मणासूदयामि ॥ ४० ॥ चतुस्त्रिं २५
शद्वाजिनः ॥ चतुस्त्रिंशद्वाजिनोदेवबन्धोर्वङ्क्रीरश्वस्यस्वधितिःसमेति ॥ अ
च्छिद्रागात्रावयुनाकृणोतपरुष्परुरनुघुष्याविशस्त ॥ ४१ ॥ एकस्त्वष्टुः ॥ एक
स्त्वष्टुरश्वस्याविशस्ताद्वायन्ताराभवतस्तथऽऋतुः ॥ यातेगात्राणामृतुथाकृ-
णोमितातापिण्डानांप्रजुहोम्यग्नौ ॥ ४२ ॥ मात्वातपत्प्रियऽआत्मापिय ३७
न्तम्मास्वधितिस्तन्वऽआतिष्ठिपत्ते ॥ मातेगृध्नुरविशस्तातिहायछिद्रागात्रा

प्युसिनामिथूकः॥४३॥नवै॥नवाऽउऽएतन्म्रियसेनरिष्यसिदेवाँ२इ॥इदैषि
पथिभिःसुगेभिः॥हरी तेयुञ्जापृषतीऽअभूतामुपास्त्थाद्वाजीधुरिरासभस्य
॥४४॥सुगव्यन्नः॥सुगव्यन्नोवाजीस्वश्व्यम्पुंसःपुत्राँ२॥उतविश्वापुषर्ठ
रयिम्॥अनागास्त्वन्नोऽअदितिःकृणोतुक्षत्रन्नोऽअश्वोवनतार्ठहविष्मान्॥
४५॥इमानु॥कम्भुवनासीषधामेन्द्रश्चविश्वेचदेवाः॥आदित्यैरिन्द्रःसग-
णोमरुद्भिरस्मभ्यम्भेषजाकरत्॥यज्ञञ्चनस्तन्वञ्चप्रजाञ्चादित्यैरिन्द्रःस
हसीषधाति॥४६॥अग्नेत्वन्नोऽअन्तमःउतत्राताशिवोभवावरूथ्यः॥वसुर

Indira Gandhi National Centre for the Arts

संहि. ग्निर्वसुश्श्रवाऽअच्छा न क्षि द्युमत्तम ᳪ रयिन्दाः॥ तन्त्वाशोचिष्ठदीदिवः सु उ.अ.
३८ म्नायनूनमीमहेसखिभ्यः॥ ४७॥ ॥ इतिसंहितायांपञ्चविंशोऽध्यायः॥ २६
॥ २५॥ ॥ अग्निश्च॥ पृथिवीचसन्नतेतेमेसन्नमतामदोवायुश्चान्तरिक्ष
ञ्चसन्नतेतेमेसन्नमतामदऽआदित्यश्चद्यौश्चसन्नतेतेमेसन्नमतामदऽआ
पश्चवरुणश्चसन्नतेतेमेसन्नमतामदः॥ सप्तसᳪसदोऽअष्टमीभूतसाध-
नी॥ सकामाँ२॥ऽअध्वनस्कुरुसंज्ञानमस्तुमेमुना॥ १॥ यथेमाम्॥ यथेमांवाचं ३८
कल्याणीमावदानिजनेभ्यः॥ ब्रह्मराजन्याभ्याᳪ शूद्रायचार्यायचस्वाय

चार्यणायच्च ॥ प्रियो देवाना न्दक्षिणायै दातुरिह भूयासमयम्मे कामः समृध्य-
तामुपमादो नमतु ॥ २ ॥ बृहस्पते ऽअति ॥ बृहस्पते ऽअतियदय्यो ऽअर्हाद्युम-
द्विभातिक्रतुमज्जनेषु ॥ यद्दीदयच्छवसऽऋतप्रजाततदस्मासु द्रविणन्धेहि-
चित्रम् ॥ उपयामगृहीतोसि बृहस्पतयेत्वैषते योनिर्बृहस्पतयेत्वा ॥ ३ ॥ इ
न्द्रगोमन् ॥ इन्द्रगोमन्निहायाहि पिबासोमं शतक्रतो ॥ विद्यद्भिर्ग्रावभिः
सुतम् ॥ उपयामगृहीतोसीन्द्रायत्वा गोमतऽएषते योनिरिन्द्रायत्वा गोमते ॥ ४
॥ इन्द्रायाहि ॥ इन्द्रायाहि वृत्रहन्पिबासोमं शतक्रतो ॥ गोमद्भिर्ग्रावभिः

संहि· सुतम् ॥ उपयामगृहीतोसीन्द्रायत्वागोमतऽएषतेयोनिरिन्द्रायत्वागो उ·अ·
३९ मते ॥ ५ ॥ ऋतावानंवैश्वानरम् ॥ ऋतावानंवैश्वानरमृतस्यज्ज्योति २६
षस्पतिम् ॥ अजस्रङ्घर्म्ममीमहे ॥ उपयामगृहीतोसिवैश्वानरायत्वैष
तेयोनिर्वैश्वानरायत्वा ॥ ६ ॥ वैश्वानरस्यसुमतौ ॥ स्यामराजाहिकम्भु
वनानामभिश्रीः ॥ इतोजातोविश्वमिदंविचष्टेवैश्वानरोयततेसूर्य्येण
॥ उपयामगृहीतोसि वैश्वानरायत्वैषतेयोनिर्वैश्वानरायत्वा ॥ ७ ३९
॥ वैश्वानरोनः ॥ वैश्वानरोनऽऊतयऽआप्रयातुपरावतः ॥ अ-

ग्निरुक्थेनवाहसा॥उपयामगृहीतोसिवैश्वानरायत्वैषतेयोनिर्वैश्वानराय
त्वा॥ ८॥ अग्निर्ऋषिः॥ अग्निर्ऋषिःपवमानःपाञ्चजन्यःपुरोहितः॥ त
मीमहेमहागयम्॥उपयामगृहीतोस्यग्नयेत्वा वर्च्चसःएषतेयोनिरग्नये
त्वावर्च्चसे॥ ९॥ महाँ॥ इन्द्रः॥ महाँ२ इन्द्रोवज्रहस्तःषोडशीशर्म्मय
च्छतु॥हन्तुपाप्मानंयोस्मान्द्वेष्टि॥उपयामगृहीतोसिमहेन्द्रायत्वैषतेयोनि
र्म्महेन्द्रायत्वा॥१०॥ तंवः॥ तंवोदस्ममृतीषहंवसोर्म्मन्दानमन्धसः॥अभि
वत्सन्नस्वसरेषुधेनवःइन्द्रङ्गीर्भिर्न्नवामहे॥११॥यद्वाहिष्ठम्॥यद्वाहिष्ठन्त-

Indira Gandhi National Centre for the Arts

संहि· दुर्म्मयेषुबृहदर्च्चं विभावसो ॥ महिषीवत्वद्रयिस्त्वद्वाजा ऽउदीरते ॥ १२ ॥ एहि ॥ उ·अ·
४० एह्यूषुब्रवाणितेग्ग्नऽइत्थेतरागिरः ॥ एभिर्व्वर्द्धासऽइन्दुभिः ॥ १३ ॥ ऋतवस्ते २६
॥ ऋतवस्तेयज्ञंवितन्वन्तुमासारक्षन्तुतेहविः ॥ सम्वत्सरस्तेयज्ञन्दधातुनःप्र
जाञ्चपरिपातुनः ॥ १४ ॥ उपह्वरेगिरीणाम् ॥ उपह्वरेगिरीणाᳯसङ्गमेचनदीनाम्
॥ धियाविप्रोऽऽअजायत ॥ १५ ॥ उच्चाते ॥ उच्चातेजातमन्धसोदिविसद्भूम्म्या
ददे ॥ उग्ग्रᳯशर्म्ममहिश्श्रवः ॥ १६ ॥ सनः ॥ सनऽइन्द्रायपज्ज्यवेवरुणायम ४०
रुद्भ्यः ॥ वरिवोवित्परिस्रव ॥ १७ ॥ एनाविश्श्वानि ॥ एनाविश्श्वान्यर्य्यऽआद्यु

म्नानि मानुषाणाम् ॥ सिषासन्तो घनामहे ॥१८॥ अनु वीरैः ॥ अनु वीरैरनु
पुष्यास्म गोभिरन्वश्वैरनु सर्वेण पुष्टैः ॥ अनु द्विपदानु चतुष्पदा वयन्देवा नो-
यज्ञमृतुथा नयन्तु ॥१९॥ अग्ने पत्नीः ॥ अग्ने पत्नीरिहावह देवानामुशतीरु
प ॥ त्वष्टारꣳ सोमपीतये ॥२०॥ अभि यज्ञम् ॥ अभि यज्ञङ्गृणीहि नो ग्नावो नेष्टः
पिबऽ ऋतुना ॥ त्वꣳ हि रत्नधाऽअसि ॥२१॥ द्रविणोदाः पिपीषति ॥ जुहोत प्र च ति
ष्ठत ॥ नेष्ट्रादृतुभिरिष्यत ॥२२॥ तवायम् ॥ तवायꣳ सोमस्त्वमेह्यर्वाङ् शश्वत्तमꣳ
सुमनाऽअस्य पाहि ॥ अस्मिन्यज्ञे बर्हिष्या निषद्या दधिष्वेमञ्जठरऽइन्दुमिन्द्र

संहि· ॥२३॥अमेवनः॥अमेवनःसुहवाऽ आहिगन्तननिबर्हिषिसदतनारणिष्टन॥ उ·अ·
४१ अथामन्दस्वजुजुषाणोऽअन्धसस्त्वष्टर्देवेभिर्ज्जनिभिःसुमद्गणः॥२४॥स्वादिष्ठ २७
यामदिष्ठया॥स्वादिष्ठयामदिष्ठयापवस्वसोमधारया॥इन्द्रायपातवेसुतः॥
२५॥रक्षोहाविश्वचर्षणिरभियोनिमयोहते॥द्रोणेसधस्थमासदत्॥२६॥
इतिसंहितायांषड्विंशतितमोऽध्यायः॥२६॥ समास्त्वा॥समास्त्वाग्नऽऋत
वोवर्द्धयन्तुसंवत्सराऽऋषयोयानिसत्या॥सन्दिव्येनदीदिहिरोचनेनविश्वाऽआ ४१
भाहिप्रदिशश्चतस्रः ॥१॥सञ्चेध्यस्वाग्नेप्रचबोधयैनमुच्चतिष्ठमहतेसौभगा

य॥माचरिषदुपसत्तातेऽअग्नेब्रह्माणस्तेयशसःसन्तुमान्ये॥२॥त्वामग्ने
॥त्वामग्नेवृणतेब्राह्मणाऽइमेशिवोऽअग्नेसंवरणेभवानः॥सपत्नहानोऽअभि
मातिजिच्चस्वेगयेजागृह्यप्रयुच्छन्॥३॥इहैव॥इहैवाग्नेऽअधिधारयारयिम्मात्वा
निक्रन्पूर्वचित्तोनिकारिणः॥क्षत्रमग्नेसुयममस्तुतुभ्यमुपसत्तावर्द्धतान्तेऽअनिष्टृ-
तः॥४॥क्षत्रेणाग्ने॥क्षत्रेणाग्नेस्वायुःसंरभस्वमित्रेणाग्नेमित्रधेयेयतस्व॥स
जातानाम्मध्यमस्थाऽएधिराज्ञामग्नेविहव्योदीदिहीह॥५॥अतिनिहः॥अति
निहोऽअतिस्रिधोत्यचित्तिमत्यरातिमग्ने॥विश्वाह्यग्नेदुरितासहस्वाथास्मभ्यं

संहि· ᳫँसुहवीराᳫँरयिन्दाः ॥ ६ ॥ अनाधृष्योजातवेदाः ॥ अनाधृष्योजातवेदा उ·अ·
४२ ऽअनिष्टृतोविराडग्नेक्षत्रभृद्दीदिहीह ॥ विश्वाऽआशाः प्रमुञ्चन्मानुषीर्भियः २७
शिवेभिरद्यपरिपाहिनोवृधे ॥ ७ ॥ बृहस्पतेसवितः ॥ बृहस्पतेसवितर्बोधयैन
ᳫँसᳫँशितञ्चित्सन्तराᳫँसᳫँशिशाधि ॥ वर्द्धयैनम्महतेसौभगायविश्वऽएन
मनुमदन्तुदेवाः ॥ ८ ॥ अमुत्रभूयादधयद्यमस्यबृहस्पतेऽअभिशस्तेरमुञ्चः
॥ प्रत्यौहतामश्विनामृत्युमस्माद्देवानामग्नेभिषजाशचीभिः ॥ ९ ॥ उद्वयम् ॥ ४२
उद्वयन्तमसस्परिस्वः पश्यन्तऽउत्तरम् ॥ देवन्देवत्रासूर्य्यमगन्मज्योतिरुत्त

चम् ॥१०॥ ऊर्ध्वाऽअस्यसमिधोभवन्त्यूर्ध्वाशुक्राशोचींष्यग्नेः ॥ द्यु
मत्तमासुप्रतीकस्यसूनोः ॥ ११ ॥ तनूनपादसुरः ॥ तनूनपादसुरोविश्व
वेदादेवोदेवेषुदेवः ॥ पथोऽअनक्तु मध्वाघृतेन ॥ १२ ॥ मध्वायज्ञम् ॥ म
ध्वायज्ञन्नक्षसेप्रीणानोनराशंसोऽअग्ने ॥ सुकृद्देवःसविताविश्व
वारः ॥ १३ ॥ अच्छायम् ॥ अच्छायमेति । शवसाघृतेनेडानोवह्निर्नम-
सा ॥ अग्निꣳस्रुचोऽअध्वरेषुप्रयत्सु ॥ १४ ॥ सयक्षत् ॥ सयक्षदस्यम-
हिमानमग्नेःसईम्मन्द्रासुप्रयसः ॥ वसुश्चेतिष्ठोवसुधातमश्च ॥ १५ ॥

Indira Gandhi National Centre for the Arts

 द्वारोदेवीः ॥ द्वारोदेवीरन्वस्यविश्व्वेव्व्रताददन्तेऽअग्नेः ॥ उरुव्यचसो 
 धाम्म्ना पत्यमानाः ॥ १६ ॥ तेऽअस्य ॥ तेऽअस्ययोषणेदिव्व्येनयोनाऽउषा 
सानक्ता ॥ इमंय्यज्ञमवतामध्ध्वरन्नः ॥ १७ ॥ दैव्व्याहोतारा ॥ ऽऊर्द्ध्वमध्ध्वर-
न्नोऽग्नेर्ज्जिह्वामभिगृणीतम् ॥ कृणुतन्नः स्विष्टिम् ॥ १८ ॥ तिस्रोदेवीः ॥
तिस्रोदेवीर्ब्बर्हिरेदꣳसदन्त्विडासरस्वतीभारती ॥ महीगृणाना ॥ १९ ॥ त
न्नः ॥ तन्नस्तुरीपमद्भुतम्पुरुक्षुत्वष्टासुवीर्य्यम् ॥ रायस्प्पोषंव्विष्ष्यतुना 
भिमस्म्मे ॥ २० ॥ वनस्प्पतेवसृजाररराणस्त्मनादेवेषु ॥ अग्निर्हव्यꣳशमि

तासूंदयाति॥२१॥अग्नेस्वाहा॥कृणुहिजातवेदऽइन्द्रायहव्यम्॥वि
श्वेदेवाहविरिदञ्जुषन्ताम्॥२२॥पीवोऽअन्नारयिवृधः॥सुमेधाःश्वे-
तःसिषक्तिनियुतामभिश्रीः॥तेवायवेसमनसोवितस्थुर्विश्वेन्नरःस्व
पत्यानिचक्रुः॥२३॥रायेनु॥यञ्जज्ञतूरोदसीमेरायेदेवीधिषणाधातिदे
वम्॥अधवायुन्नियुतःसश्चतस्वाऽउतश्वेतंवसुधितिन्निरेके॥२४॥आ
पोह॥आपोहयद्बृहतीर्विश्वमायन्गर्भन्दधानाजनयन्तीरग्निम्॥ततो
देवानाᳬंसमवर्त्ततासुरेकःकस्मैदेवायहविषाविधेम॥२५॥यश्चित्॥

संहि यश्चिदापोमहिनापर्य्यपश्यद्दक्षन्दधानाजनयन्तीर्य्यज्ञम् ॥ योदेवेष्व उ.अ.
४४ धिदेवऽएकऽआसीत्कस्म्मैदेवायहविषाविधेम ॥ २६ ॥ प्रयाभिः २७
॥ प्रयाभिर्य्यासिदाश्वाꣳसमच्छानियुद्भिर्व्वायविष्टयेदुरोणे ॥ निनोर
यिꣳ सुभोजसंयुवस्वनिवीरङ्गव्यमश्व्यंचराधः ॥ २७ ॥ आनः ॥ आ
नोनियुद्भिः शतिनीभिरध्वरꣳ सहस्रिणीभिरुपयाहियज्ञम् ॥ वायोऽअ
स्मिन्त्सवनेमादयस्वयूयम्पातस्वस्तिभिःसदानः ॥ २८ ॥ नियुत्वान्वाय ४४
वागह्ययꣳ शुक्रोऽअयामिते ॥ गन्तासिसुन्वतोगृहम् ॥ २९ ॥ वायोशु-

क्रः॥ वायो शुक्रोऽअयामि ते मध्वोऽअग्रन्दिविष्टिषु ॥ आयाहि सोम
पीतये स्पार्हो देव नियुत्वता ॥ ३० ॥ वायुरग्रेगाः ॥ वायुरग्रेगा यज्ञप्रीः
साकङ्गन्मनसा यज्ञम् ॥ शिवो नियुद्भिः शिवाभिः ॥ ३१ ॥ वायो ये ॥ ते
सहस्रिणो रथासस्तेभिरागहि ॥ नियुत्वान्त्सोमपीतये ॥ ३२ ॥ एकया
च ॥ दशभिश्च स्वभूते द्वाभ्यामिष्टये विंशती च ॥ तिसृभिश्च वहसे त्रिं
शता च नियुद्भिर्वायविह ता विमुञ्च ॥ ३३ ॥ तव वायो ॥ तव वायवृतस्प
ते त्वष्टुर्जामातरद्भुत ॥ अवांस्या वृणीमहे ॥ ३४ ॥ अभि त्वा ॥ शूर नोनु

संहि॰ मोदुग्ग्धाऽइवधेनवः ॥ ईशानमस्यजगतःस्वर्दृशमीशानमिन्द्रतस्थु उ॰अ॰
४५ षः ॥ ३५ ॥ नत्वावान् ॥ नत्वावाँ२ ॥ ऽअन्योदिव्योनपार्थिवोनजातोन २७
जनिष्यते ॥ अश्वायन्तोमघवन्निंद्रवाजिनोगव्यन्तस्त्वाहवामहे ॥ ३६
॥ त्वामित् ॥ त्वामिद्धिहवामहेसातौवाजस्यकारवः ॥ त्वांवृत्रेष्विन्द्रस
त्पतिन्नरस्त्वाङ्काष्ठास्वर्वतः ॥ ३७ ॥ सत्वम् ॥ सत्वन्नश्चित्रवज्रहस्त
धृष्णुयामहस्तवानोऽअद्रिवः ॥ गामश्वंरथ्यमिन्द्रसङ्किरसत्रावाज ४५
न्नजिग्युषे ॥ ३८ ॥ कयानः ॥ कयानश्चित्रऽआभुवदूतीसदावृधःसखा

॥ कयाशश्चित्रया वृता ॥ ३९ ॥ कस्त्वा ॥ सत्योमदानाम्मर्ठ᳘हिष्ठोम
त्सदन्धसः ॥ दृढाचिदारुजेवसु ॥ ४० ॥ अभीषुणः ॥ अभीषुणःस-
खीनामविताजरितॄणाम् ॥ शतम्भवास्यूतये ॥ ४१ ॥ यज्ञायज्ञावः ॥
यज्ञायज्ञावोऽअग्नये गिरागिराचदक्षसे ॥ प्रप्रवयममृतञ्जातवेदसम्प्रि
यम्मित्रन्नशर्ठ᳘सिषम् ॥ ४२ ॥ पाहिनः ॥ पाहिनोऽअग्नऽएकयापाह्युत
द्वितीयया ॥ पाहिगीर्भिस्तिसृभिरूर्ज्जाम्पतेपाहिचतसृभिर्वसो ॥
४३ ॥ ऊर्ज्जोनपातम् ॥ ऊर्ज्जोनपातर्ठ᳘सहिनायमस्मयुर्दाशेमहव्य

संहि ४६ दीतये ॥ भुवद्वाजेष्ष्वविताभुवद्वृधः उतत्त्राताँतनूनोम् ॥ ४४ ॥ संवुत्सुरोसि ॥ परिवत्सुरोसीदावत्सुरोसीद्वत्सुरोसिवत्सुरोसि ॥ उषसस्ते कल्प्यन्तामहोरात्त्रास्ते कल्प्यन्तामर्द्धमासास्ते कल्प्यन्ताम्मासास्ते कल्प्यंतामृतवस्ते कल्प्यन्ताᳯसंवत्सुरस्ते कल्प्यताम् ॥ प्रेत्याऽएत्यैसञ्चाचप्रचसारय ॥ सुपर्णचिदसितयादेवतयाङ्गिरस्वद्ध्रुवःसीद ॥ ४५ ॥ इतिसंहितायांसप्तविंशोऽध्यायः ॥ २७ ॥ ॥ होतायक्षत् ॥ होतायक्षत्सुमिधेन्द्रमिडस्पदेनाभापृथिव्याःअधि ॥ दिवोवर्ष्म्मन्त्समिध्यतऽओजि उ॰अ॰ २७ ४६

ह्न्श्चर्षणीसहांवेत्वाज्ज्यस्यहोतर्य्यजे ॥ १ ॥ होतायक्षत्तनूनपातमूतिभिः ॥ होतायक्षत्तनूनपातमूतिभिर्ज्जेतारमपराजितम् ॥ इन्द्रन्देवथंस्वर्विदम्पथिभिर्म्मधुमत्तमैर्न्नराशथंसेन तेजसा वेत्वाज्ज्यस्य होतर्य्यज ॥ २ ॥ होतायक्षदिडाभिरिन्द्रम् ॥ होतायक्षदिडाभिरिन्द्रमीडितमाजुह्वानममर्त्यम् ॥ देवोदेवैः सवीर्य्योवज्रहस्तः पुरन्दरोवेत्वाज्ज्यस्यहोतर्य्यज ॥ ३ ॥ होतायक्षद्बर्हिषीन्द्रम् ॥ होतायक्षद्बर्हिषीन्द्रन्निषद्वरं वृषभन्नर्य्यापसम् ॥ वसुभीरुद्रैरादित्यैः सयुग्भिर्ब्बर्हिरासदद् वेत्वाज्ज्यस्यहोतर्य्यज ॥ ४ ॥ होताय

Indira Gandhi National Centre for the Arts

क्षदोजोनव्वीर्य्यꣳ सहोद्वारऽइन्द्रमवर्द्धयन् ॥ सुप्रायणाऽअस्मिन्य
ज्ञेव्विश्रयन्तामृतावृधोद्वारऽइन्द्रायमीढुषेव्यन्त्वाज्ज्यस्यहोतर्य्यज ॥५॥
होतायक्षदुषेऽइन्द्रस्य ॥ धेनूसुदुघेमातरामही ॥ सवातरौनतेजसावत्स
मिन्द्रमवर्द्धतांव्वीतामाज्ज्यस्यहोतर्य्यज ॥ ६ ॥ होतायक्षद्दैव्याहोतारा॥
भिषजासखायाहविषेन्द्रम्भिषज्ज्यतः ॥ कवीदेवौप्रचेतसाविन्द्रायधत्त
ऽइन्द्रियंव्वीतामाज्ज्यस्यहोतर्य्यज ॥ ७ ॥ होतायक्षत्तिस्रोदेवीः ॥ होतायक्ष 
त्तिस्रोदेवीर्न्नभेषजन्त्रयस्त्रिधातवोपसऽइडासरस्वतीभारतीमहीः ॥

॥ इन्द्रपत्निर्हविष्मतीर्व्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ८ ॥ होतायक्षत्त्वष्टा
रमिन्द्रम् ॥ होतायक्षत्त्वष्टारमिन्द्रन्देवम्भिषजꣳ सुयजङ्घृतश्रियम् ॥
पुरुरूपꣳ सुरेतसम्मघोनमिन्द्रायत्वष्टादधदिन्द्रियाणिवेत्वाज्ज्यस्य
होतर्य्यज ॥ ९ ॥ होतायक्षद्वनस्पतिꣳ शमितारम् ॥ होतायक्षद्वनस्पति-
ꣳ शमितारꣳ शतक्क्रतुन्धियोजोष्टारमिन्द्रियम् ॥ मध्वासमञ्जन्पथि-
भिः सुगेभिः स्वदातियज्ञम्मधुनाघृतेनवेत्वाज्ज्यस्यहोतर्य्यज ॥ १० ॥
होतायक्षदिन्द्रꣳ स्वाहा ॥ होतायक्षदिन्द्रꣳ स्वाहाज्ज्यस्यस्वाहामेदसः

संहि॰ स्वाहास्तोकाना७ँस्वाहास्वाहाकृतीना७ँस्वाहाहव्यसूक्तीनाम् ॥ स्वाहा उ॰अ॰
४८ देवाऽआज्ज्यपाजुषाणाऽइन्द्रऽआज्ज्यस्यव्यन्तुहोतर्य्यज ॥ ११ ॥ देवम्ब- २८
र्हिरिन्द्र७ँसुदेवन्देवैर्वीरवत्स्तीर्णंवेद्यामवर्द्धयत् ॥ वस्तोर्वृतम्प्राक्तोर्भृत७ँ
राया बर्हिष्मतोत्यगाद्वसुवनेवसुधेयस्यवेतुयज ॥ १२ ॥ देवीर्द्वारः ॥ देवीर्द्वारऽइन्द्र
७ँसङ्घातेवीड्वीर्यामन्नवर्द्धयन् ॥ आवत्सेनतरुणेनकुमारेणचमीवतापा-
र्वाण७ँरेणुककाटन्नुदन्तांवसुवनेवसुधेयस्यव्यन्तुयज ॥ १३ ॥ देवीऽउषा ४८
सानक्ता ॥ देवीऽउषासानक्तेन्द्रंयज्ञेप्रयत्यह्वेताम् ॥ दैवीर्विशःप्रायासि

Indira Gandhi National Centre for the Arts

ह्वाᳪंसुप्रीतेसुधितेव्वसुवनेव्वसुधेयस्यव्वीतांय्यज ॥१४॥ देवीजोष्ट्री
॥ देवीजोष्ट्रीव्वसुधितीदेवमिन्द्रमवर्द्धताम् ॥ आयाव्व्यन्न्याघाद्द्वेषाᳪंस्या
न्न्यावक्षद्वसुवार्य्याणियजमानायशिक्षितेव्वसुवनेव्वसुधेयस्यव्वीतां-
य्यज ॥१५॥ देवीऽऊर्ज्जाहुती ॥ देवीऽऊर्ज्जाहूतीदुघेसुदुघेपयसेन्द्रम-
वर्द्धताम् ॥ इषमूर्ज्जमन्न्यावक्षत्सग्धिᳪंसपीतिमन्न्यानवेनपूर्व्वन्दयमाने
पुराणेननवमधातामूर्ज्जमूर्ज्जाहुतीऽऊर्ज्जयमानेव्वसुवार्य्याणियजमा-
नायशिक्षितेव्वसुवनेव्वसुधेयस्यव्वीतांय्यज ॥१६॥ देवादैव्व्या ॥ देवादै

Indira Gandhi National Centre for the Arts

ध्याहोतारादेवमिन्द्रमवर्द्धताम् ॥ हुताघशर्ठ॰सावाभार्ष्टांवसुवार्य्याणि 
४१ यजमानायशिक्षितौवसुवनेवसुधेयस्यवीतांय्यज ॥ १७ ॥ देवीस्ति २८
स्रः । देवीस्तिस्रस्तिस्रोदेवीःपतिमिन्द्रमवर्द्धयन् ॥ अस्पृक्षद्भारतीदि
वर्ठ॰रुद्रैर्य्यज्ञर्ठ॰सरस्वतीडावसुमतीगृहान्वसुवनेवसुधेयस्यव्यन्तुयज
॥ १८ ॥ देवऽइन्द्रः ॥ देवइन्द्रोनराशर्ठ॰सस्त्रिवरूथस्त्रिबन्धुरोदेवमिन्द्रमव
र्द्धयत् ॥ शतेनशितिपृष्ठानामाहितःसहस्रेणप्रवर्त्ततेमित्रावरुणेदस्य ४९
होत्रमर्हतोबृहस्पतिस्तोत्रमश्विनाध्वर्य्यवंवसुवनेवसुधेयस्यवेतुयज

॥ १९ ॥ देवो देवैः ॥ देवो देवैर्वनस्पतिर्हिरण्यपर्णो मधुशाखः सुपिप्पलो देवमिन्द्रमवर्द्धयत् ॥ दिवमग्रेणास्पृक्षदान्तरिक्षम्पृथिवीमदृꣳहीद्वसुवने वसुधेयस्य वेतु यज ॥ २० ॥ देवम्बर्हिः ॥ देवम्बर्हिर्वारितीनान्देवमिन्द्रमवर्द्धयत् ॥ स्वासस्थमिन्द्रेणासन्नमन्या बर्हीꣳष्यभ्यभूद्वसुवने वसुधेयस्य वेतु यज ॥ २१ ॥ देवोऽअग्निः स्विष्टकृद्देवमिन्द्रमवर्द्धयत् ॥ स्विष्टङ्कुर्वन्त्स्विष्टकृत्स्विष्टमद्य करोतु नो वसुवने वसुधेयस्य वेतु यज ॥ २२ ॥ अग्निमद्य होतारमवृणीतायं यजमानः पचन्पक्तीः पचन्पुरोडाशम्बध्नन्निन्द्राय छा

 गेम् ॥ सुपस्थाऽअद्य देवो वनस्पतिरभवदिन्द्रायच्छागेन ॥ अघत्तम्मे 
 दस्तः प्प्रतिपचताग्ग्रभीदवीवृधत्पुरोडाशेन ॥ त्वामद्यऽऋषे ॥ २३ ॥ 
होतायक्षत् ॥ होतायक्षत्समिधानम्महद्यशः सुसमिद्धं वरेण्यमग्निमि
न्द्रंवयोधसम् ॥ गायत्रीञ्छन्दऽइन्द्रियन्त्र्यविङ्गांवयोदधद्वेत्वाज्ज्य
स्यहोतर्य्यज ॥ २४ ॥ होतायक्षत्तनूनपातमुद्भिदम् ॥ होतायक्षत्तनून-
पातमुद्भिदंय्यङ्गर्ब्भमदितिर्द्दधेशुचिमिन्द्रंवयोधसम् ॥ उष्णिहञ्छ ५०
न्दऽइन्द्रियन्दित्यवाहङ्गांवयोदधद्वेत्वाज्ज्यस्यहोतर्य्यज ॥ २५ ॥ होता

यक्षदीडेन्यमीडितम् ॥ होतायक्षदीडेन्यमीडितंवृत्रहन्तमामिडाभि
रीड्यर्ठ्ःसहःसोममिन्द्रंवयोधसम् ॥ अनुष्टुभञ्छन्दऽइन्द्रियम्पञ्चा
विङ्गाव्वयोदधद्वेत्वाज्यस्यहोतर्यज ॥ २६ ॥ होतायक्षत्सुबर्हिषम्पूष
ण्वन्तम् ॥ होतायक्षत्सुबर्हिषम्पूषण्वन्तममर्त्यर्ठ्ःसीदन्तम्बर्हिषिप्रियेमृ
तेन्द्रंव्वयोधसम् ॥ बृहतीञ्छन्दऽइन्द्रियन्त्रिवत्सङ्गाव्वयोदधद्वेत्वाज्यस्य
होतर्यज ॥ २७ ॥ होतायक्षद्व्यचस्वतीःसुप्रायणाः ॥ होतायक्षद्व्यचस्व
तीःसुप्रायणाऽऋतावृधोद्वारोदेवीर्हिरण्ययीर्ब्रह्माणमिन्द्रंव्वयोधसं

संहि म्॥पङ्क्तिञ्छन्दऽइहेन्द्रियन्तुर्य्यवाहङ्गाव्वयोदधद्व्यन्त्वाज्ज्यस्यहोत- उ॰अ॰
५१ र्य्यज॥२८॥होतायक्षत्सुपेशसासुशिल्पे॥बृहतीऽउभेनक्तोषासानद २८
र्शतेविश्वमिन्द्रंव्वयोधसम्॥त्रिष्टुभञ्छन्दऽइहेन्द्रियम्पष्ठवाहङ्गाव्वयो
दधद्वीतामाज्ज्यस्यहोतर्य्यज॥२९॥होतायक्षत्प्रचेतसादेवानामुत्तमंय्य
शोहोतारादैव्याकवीसयुजेन्द्रंव्वयोधसम्॥जगतीञ्छन्दऽइन्द्रियमनड्वा
हङ्गाव्वयोदधद्वीतामाज्ज्यस्यहोतर्य्यज॥३०॥होतायक्षत्पेशस्वतीस्ति ५१
स्रः॥होतायक्षत्पेशस्वतीस्तिस्रोदेवीर्हिरण्ययीर्भारतीर्बृहतीर्महीःप

Indira Gandhi National Centre for the Arts

ति मिन्द्रं वयो धसम् ॥ विराजञ्छन्द॑ऽ इहेन्द्रियन्धेनुङ्गान्नवयो दधद्व्य
न्त्वाज्ज्यस्य होतुर्य्यज ॥ ३१ ॥ होता यक्षत्सुरेतसन्त्वष्टारम् ॥ होता यक्षत्सुरे
तसन्त्वष्टारम्पुष्टिवर्द्धनᳬ रूपाणि बिभ्रतम्पृथक्पुष्टिमिन्द्रं वयो धसम् ॥
द्विपदञ्छन्द॑ऽ इन्द्रियमुक्षाणङ्गान्नवयो दधद्वेत्वाज्ज्यस्य होतुर्य्यज ॥ ३२ ॥
होता यक्षद्वनस्पतिᳬ शमितारम् ॥ होता यक्षद्वनस्पतिᳬ शमितारᳬ शत
क्रतुᳬ हिरण्यपर्णमुक्थिनᳬ रशनाम्बिभ्रतं वशिम्भगमिन्द्रं वयोधसम्
॥ ककुभञ्छन्द॑ऽ इहे न्द्रीयं वशां वेहतङ्गां वयो दधद्वेत्वाज्ज्यस्य होतर्य्यज ॥

संहि॰ ॥ ३३ ॥ होता यक्षत्स्वाहाकृतीरग्निम् ॥ होता यक्षत्स्वाहाकृतीरग्निङ्गृ- उ॰अ॰
५२ हपतिम्पृथग्वरुणम्भेषजङ्कविङ्क्षत्रमिन्द्रं वयोधसम् ॥ अतिच्छन्दसञ्छ- २८
न्द इन्द्रियम्बृहदृषभङ्गां वयो दधद्व्यन्त्वाज्ज्यस्य होतर्य्यज ॥ ३४ ॥ देवम्ब-
र्हिः ॥ देवम्बर्हिर्वयोधसन्देवमिन्द्रमवर्द्धयत् ॥ गायत्र्याच्छन्दसेन्द्रियञ्च-
क्षुरिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥ ३५ ॥ देवीर्द्वारः ॥ देवीर्द्वारो
वयोधसꣳ शुचिमिन्द्रमवर्द्धयन् ॥ उष्णिहा छन्दसेन्द्रियम्प्राणमिन्द्रे वयो ५२
दधद्वसुवने वसुधेयस्य व्यन्तु यज ॥ ३६ ॥ देवी उषासानक्ता ॥ देवमिन्द्रं

व्वयोधसन्देवीदेवमवर्द्धताम्॥ अनुष्टुभाच्छन्दसेन्द्रियम्बलमिन्द्रेव्वयो
दधद्वसुवनेव्वसुधेयस्यव्वीतांय्यज॥ ३७॥ देवीजोष्ट्री॥ देवीजोष्ट्रीव्वसुधि
तीदेवमिन्द्रंव्वयोधसन्देवीदेवमवर्द्धताम्॥ बृहत्याच्छन्दसेन्द्रियꣳश्रोत्र
मिन्द्रेव्वयोदधद्वसुवनेव्वसुधेयस्यव्वीतांय्यज॥ ३८॥ देवीऽऊर्ज्जाहुती॥
देवीऽऊर्ज्जाहुतीदुघेसुदुघेपयसेन्द्रंव्वयोधसन्देवीदेवमवर्द्धताम्॥ पङ्क्त्या
च्छन्दसेन्द्रियꣳशुक्रमिन्द्रेव्वयोदधद्वसुवनेव्वसुधेयस्यव्वीतांय्यज॥
३९॥ देवादैव्या॥ देवादैव्याहोतारादेवमिन्द्रंव्वयोधसन्देवौदेवमवर्द्धता

संहि म्॥ त्रिष्टुभाच्छन्दसेन्द्रियन्त्विषिमिन्द्रेव्वयोदधद्वसुवनेवसुधेयस्यवी- उ॰अ॰
५३ तांय्यज॥ ४०॥ देवीस्तिस्रः॥ देवीस्तिस्रस्तिस्रोदेवीर्व्वयोधसम्पतिमि २८
न्द्रमवर्द्धयन्॥ जगत्याच्छन्दसेन्द्रियꣳशूषमिन्द्रेव्वयोदधद्वसुवनेवसुधे
यस्यव्यन्तुयज॥ ४१॥ देवोनराशꣳसः॥ देवोनराशꣳसोदेवमिन्द्रंव्वयो
धसन्देवोदेवमवर्द्धयत्॥ विराजाच्छन्दसेन्द्रियꣳरूपमिन्द्रेव्वयोदधद्व-
सुवनेवसुधेयस्यवेतुयज॥ ४२॥ देवोव्वनस्पतिः॥ देवोव्वनस्पतिर्द्देव ५३
मिन्द्रंव्वयोधसन्देवोदेवमवर्द्धयत्॥ द्विपदाच्छन्दसेन्द्रियम्भगमिन्द्रेव्वयो
Indira Gandhi National Centre for the Arts

दधद्वसुवनेवसुधेयस्यवेतुयज ॥ ४३ ॥ देवम्बर्हिः ॥ देवम्बर्हिर्वा-
रितीनान्देवमिन्द्रँवयोधसन्देवन्देवमवर्द्धयत् ॥ ककुभाच्छन्दसेन्द्रियं
यशऽ इन्द्रेवयोदधद्वसुवनेवसुधेयस्यवेतुयज ॥ ४४ ॥ देवोऽअग्निः ॥
॥ स्विष्टकृद्देवमिन्द्रँवयोधसन्देवोदेवमवर्द्धयत् ॥ अतिच्छन्दसाच्छ
न्दसेन्द्रियङ्क्षत्र मिन्द्रेवयोदधद्वसुवनेवसुधेयस्यवेतुयज ॥ ४५ ॥ अ
ग्निमद्यहोतारमवृणीतायंय्यजमानः पचन्पक्तीः पचन्पुरोडाशम्ब
धन्निन्द्रायवयोधसेच्छागम् ॥ सूपस्थाऽअद्यदेवोवनस्पतिरभवदिन्द्रा-

यव्वयोधसेच्छागेन॥ अघृतम्मेदस्तः प्प्रतिपच्चताग्ग्रभीदवीवृध त्पुरोडा
शेन॥ त्वामद्य ऽऋषे॥४६॥ इतिसंहितायां ऽअष्टाविंशोऽध्यायः॥
२८॥ समिद्धो ऽअञ्जन्॥ समिद्धो ऽअञ्जन्कृदरम्मतीनाङ्घृतमग्नेमधु
मत्पिन्वमानः॥ वाजीवहन्वाजिनञ्जातवेदोदेवानांवक्षिप्रियमासधस्थ
म्॥१॥ घृतेनाञ्जन्॥ घृतेनाञ्जन्त्सम्पथोदेवयानान्प्रजानन्वाज्ज्यप्येतु
देवान्॥ अनुत्वा सप्तेप्प्रदिशः सचन्ताᳬ स्वधामस्म्मैयजमानायधेहि॥ ५४
२॥ ईड्यश्च॥ ईड्यश्चासिवन्द्यश्चवाजिन्नाशुश्चासिमेद्ध्यश्चसप्ते॥ अ-

ग्निष्ठो देवैर्वसुभिः सजोषाः प्रीतं वह्निं वहतु जातवेदाः ॥ ३ ॥ स्तीर्णम्बर्हिः
सुष्टरीमा जुषाणोरु पृथु प्रथमानम्पृथिव्याम् ॥ देवेभिर्युक्तमदितिः सजोषाः
स्योनङ्कृण्वाना सुविते दधातु ॥ ४ ॥ एता ऽउ वः ॥ सुभगा विश्वरूपा विपक्षो-
भिः श्रयमाणा ऽउदातैः ॥ ऋष्वाः सतीः कवषः शुम्भमाना द्वारो देवीः सुप्रा
यणा भवन्तु ॥ ५ ॥ अन्तरा मित्रावरुणा ॥ अन्तरा मित्रावरुणा चरन्ती मुखं यज्ञा
नामभि संविदाने ॥ उषासा वाꣳ सुहिरण्ये सुशिल्पे ऽऋतस्य योनाविह
सादयामि ॥ ६ ॥ प्रथमा वाम् ॥ प्रथमा वाꣳ सरथिना सुवर्णा देवौ पश्यन्तौ भुव

Indira Gandhi National Centre for the Arts

संहि नानिधिंश्वा॥ अपिंप्रयुञ्चोदनावाम्मिमानाहोताराज्ज्योतिःप्रदिशादि उ.अ.
५५ शन्ता॥७॥ आदित्यैर्न्नः॥ आदित्यैर्नोभारतीवष्टुयज्ञꣳ सरस्वतीसहरुद्रै २९
र्नऽआवीत्॥ इडोपहूतावसुभिः सजोषायज्ञन्नोदेवीरमृतेषुधत्त॥८॥ त्वष्टा
वीरम्॥ त्वष्टावीरन्देवकामञ्जजानत्वष्टुरर्वाजायतऽआशुरश्वः॥ त्वष्टेदंवि-
श्वम्भुवनञ्जजानबहोःकर्त्तारमिहयक्षिहोतः॥९॥ अश्वोघृतेनत्मन्न्यास
मक्तुऽउपदेवाꣳ॥ ऽऋतुशःपाथऽएतु॥ वनस्पतिर्देवलोकम्प्रजानन्नग्निना ५५
हव्यास्वदितानिवक्षत्॥१०॥ प्रजापतेस्तपसा॥ वावृधानःसद्योजातोदधि

षेयज्ञमग्ने ॥ स्वाहाकृतेनहविषापुरोगायाहिसाध्याहविरदन्तुदेवाः ॥ ११
॥ यदक्रन्दः ॥ प्रथमञ्जायमानऽउद्यन्त्समुद्रादुतवापुरीषात् ॥ श्येनस्य
पक्षाहरिणस्यबाहूऽउपस्तुत्यम्महिजातन्तेऽअर्वन् ॥ १२ ॥ यमेनदत्तम् ॥ य
मेनदत्तन्त्रितऽएनमायुनगिन्द्रऽएणम्प्रथमोऽअध्यतिष्ठत् ॥ गन्धर्वोऽअस्यर
शनामगृभ्णात्सूरादश्वंवसवोनिरतष्ट ॥ १३ ॥ असियमः ॥ असियमोऽअ
स्यादित्योऽअर्वन्नसित्रितोगुह्येनव्रतेन ॥ असिसोमेनसमयाविपृक्तऽआहुस्ते
त्रीणिदिविबन्धनानि ॥ १४ ॥ त्रीणिते ॥ त्रीणितऽआहुर्दिविबन्धनानित्रीण्य

संहि॰ प्सुत्रीण्यंतः समुद्रे॥उतेवमेवरुणश्छन्त्स्यर्वन्यत्रातऽआहुःपरमञ्जनि उ॰ अ॰
५६ त्रम्॥१५॥इमातेवाजिन्नवमार्ज्जनानीमाशफानांसनितुर्न्निधाना॥अत्रा २१
तेभद्रारशनाऽअपश्यमृतस्ययाऽअभिरक्षन्तिगोपाः॥१६॥आत्मानन्ते॥आ
त्मानन्तेमनसारादजानामवोदिवापतयन्तम्पतङ्गम्॥शिरोऽअपश्यपथिभिः
सुगेभिररेणुभिर्ज्जेहमानम्पतत्रि॥१७॥अत्राते॥रूपमुत्तममपश्यञ्जिगीष
माणमिषऽआपदेगोः॥यदातेमर्त्तोऽअनुभोगमानडादिद्ग्रसिष्ठऽओषधीरजी- ५६
गः॥१८॥अनुत्वा॥अनुत्वारथोऽअनुमर्य्योऽअर्वन्ननुगावोनुभगःकनीनाम्॥अनु

ह्रातासुस्त्ववसुक्रस्यमीयुरनुदेवामंमिरेवीर्य्यन्ते।।१९।।हिरण्यशृङ्गोयः।।हिरं
ण्यशृङ्गोयोऽअस्यपादामनोजवाऽअवरऽइन्द्रआसीत्।।देवाऽइदस्यहविरद्यमायु
न्योऽअर्वन्तम्प्रथमोऽअध्यतिष्ठत्।।२०।।ईर्म्मान्तासःसिलिकमध्यमासः।।ईर्म्मा
न्तासःसिलिकमध्यमासःसꣳशूरणासोदिव्यासोऽअत्याः।।हꣳसाऽइवश्रे
णिशोयतन्तेयदाक्षिषुर्दिव्यमज्ममश्वाः।।२१।।तवशरीरम्।।तवशरीरम्पतयि
ष्ण्वर्वन्तवचित्तंवातऽइवध्रजीमान्।।तवशृङ्गाणिविष्ठितापुरुत्राऽरण्येषुजर्भुराणाच
रन्ति।।२२।।उपप्र।।उपप्रागाच्छसनंवाज्यर्वादेवद्रीचामनसादीध्यानः।।अजःपुरो

संहि॰ नीयतेनाभिरस्यानुपश्चात्कवयोयन्तिरेभाः॥२३॥ उपप्र॥ उपप्रागात्परमय्यत्सध- उ॰ अ॰
५७ स्थमर्वाँ२ ॥ऽअच्छापितरम्मातरञ्च ॥अद्यादेवाञ्जुष्टतमोहिगम्याऽअ- २९
थाशास्तेदाशुषेवार्याणि॥ २४ ॥समिद्धोऽअद्य॥ मनुषोदुरोणेदेवोदेवा-
न्यजसिजातवेदः ॥आचवहमित्रमहश्चिकित्वान्त्वन्दूतःकविरसिप्रचे-
ताः॥२५॥ तनूनपात्पथः॥ तनूनपात्पथऽऋतस्ययानान्मध्वासमञ्जन्त्स्वदया
सुजिह्व॥मन्मानिधीभिरुतयज्ञमृन्धन्देवत्राचकृणुह्यध्वरन्नः॥२६॥ नराश ५७
ꣳसस्यमहिमानमेषाम्॥ नराशꣳसस्यमहिमानमेषामुपस्तोषामयजतस्ययज्ञैः

॥ येसुक्रतवः शुचयोधियन्धाः स्वदन्तिदेवा ऽउभयानि हव्या ॥ २७ ॥ आ
जुह्वान ऽ ईड्यः ॥ आजुह्वान ऽ ईड्योवन्द्यश्चायाह्यग्नेवसुभिः सजोषाः ॥ त्व
न्देवानामसियह्वहोतास ऽ एनान्यक्षीषितोयजीयान् ॥ २८ ॥ प्राचीनम्बर्हिः
प्रदिशापृथिव्यावस्तोरस्यावृज्यते ऽ अग्रे ऽ अह्नाम् ॥ व्युप्रथते वितरंवरी
योदेवेभ्यो ऽ अदितयेस्योनम् ॥ २९ ॥ व्यचस्वतीरुर्विया ॥ विश्रयन्ताम्पतिभ्योनज
नेयः शुम्भमानाः ॥ देवीर्द्वारोबृहतीर्विश्वमिन्वादेवेभ्योभवतसुप्रायणाः ॥
३० ॥ आसुष्वयन्ती ॥ यजते ऽ उपाके ऽ उषासानक्तासदतान्नियोनौ ॥ दिव्येयोष

Indira Gandhi National Centre for the Arts

संहि॰ णेबृहतीसुरुक्मेऽअधिश्रियर्ठ॰शुक्रपिशन्दधाने ॥ ३१ ॥ दैव्याहोतारा ॥ उ॰अ॰
५८ प्प्रथमासुवाचामिमानायज्ञम्मनुषोयजध्यै ॥ प्प्रचोदयन्ताविदथेषुकारूप्प्रा- २९
चीनञ्ज्योतिःप्प्रदिशादिशन्ता ॥ ३२ ॥ आनः ॥ आनोयज्ञम्भारतीतूयमेत्विडा
मनुष्वदिहचेतयन्ती ॥ तिस्रोदेवीर्बर्हिरेदर्ठ॰स्योनर्ठ॰सरस्वतीस्वपसःसदन्तु ॥
३३ ॥ यऽइमे ॥ द्यावापृथिवीजनित्रीरूपैरपिर्ठ॰शद्भुवनानिविश्श्वा ॥ तमद्यहो
तरिषितोयजीयान्देवन्त्वष्टारमिहयक्षिविद्वान् ॥ ३४ ॥ उपावसृजत्मन्या ॥ स ५८
मञ्जन्देवानाम्पाथऽऋतुथाहवीर्ठ॰षि ॥ वनस्प्पतिःशमितादेवोऽअग्निःस्व

Indira Gandhi National Centre for the Arts

दन्तुहव्यम्मधुनाघृतेन॥३५॥सद्योजातः॥सद्योजातोव्यमिमीतयज्ञमग्-
ग्निर्देवानामभवत्पुरोगाः॥अस्यहोतुःप्रदिश्यृतस्यवाचिस्वाहाकृतꣳहु
विरदन्तुदेवाः॥३६॥केतुङ्कृण्वन्॥केतुङ्कृण्वन्नकेतवेपेशोमर्य्याऽअपेशसे
॥समुषद्भिरजायथाः॥३७॥जीमूतस्येवभवति॥जीमूतस्येवभवतिप्रतीकं
यद्वर्म्मीयातिसमदामुपस्थे॥अनाविद्धयातन्वाजयत्वꣳसत्वावर्म्मणोम
हिमापिपर्त्तु॥३८॥धन्वनागाः॥धन्वनागाधन्वनाजिञ्जयेमधन्वनातीव्राः
समदोजयेम॥धनुःशत्रोरपकामङ्कृणोतिधन्वनासर्व्वाःप्रदिशोजयेम॥३९॥

Indira Gandhi National Centre for the Arts

संहि वुक्ष्यन्तीवेत् ॥ वृक्ष्यन्तीवेदागनीगन्तिकर्ण्णम्प्रियꣳ सखायम्परिषस्वजाना उ॰अ॰
५९ ॥ योषेववाशिङ्क्ते वितताधिधन्वञ्ज्याऽइयꣳ समनेपारयन्ती ॥ ४० ॥ तेऽआचरे २९
न्ती ॥ तेऽआचरन्तीसमनेवयोषामातेवपुत्रम्बिभृतामुपस्थे ॥ अपशत्रून्वि
ध्यताꣳ संविदानेऽआर्त्नीऽइमेविष्फुरन्तीऽअमित्रान् ॥ ४१ ॥ बह्वीनाम्पिता
॥ बहुरस्यपुत्रश्चिश्चाकृणोतिसमनावगत्य ॥ इषुधिः सङ्काः पृतनाश्चसर्वाः
पृष्ठेनिनद्धोजयतिप्रसूतः ॥ ४२ ॥ रथेतिष्ठन् ॥ रथेतिष्ठन्नयतिवाजिनः पुरोय ५९
त्रयत्रकामयतेसुषारथिः ॥ अभीशूनाम्महिमानम्पनायतमनः पश्चादनुयच्छ

Indira Gandhi National Centre for the Arts

न्तिरश्चमयेः॥ ४३॥ तीव्रान्घोषान्॥ तीव्रान्घोषान्कृण्वते वृषपाणयोश्वा रथेभिःसह वाजयन्तः॥ अवक्रामन्तःप्रपदैरमित्रान्क्षिणन्ति शत्रूँ१॥रनपव्ययन्तः॥ ४४॥ रथवाहनर्ठ॰ हविः॥ रथवाहनर्ठ॰ हविरस्यनामयत्रायुधन्निहितमस्यवर्म्म॥ तत्रारथमुपशग्मर्ठ॰ सदेम विश्वाहावयर्ठ॰ सुमनस्यमानाः॥ ४५॥ स्वादुषर्ठ॰ सदः पितरः॥ स्वादुषर्ठ॰ सदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः॥ चित्रसेना ऽइषुबला ऽअमृध्राः सतोवीरा ऽउरवो व्रातसाहाः॥ ४६॥ ब्राह्मणासः पितरः॥ ब्राह्मणासः पितरः सोम्यासः शिवेनो द्यावापृथिवी

 

ऽअनेहसा॥पूषानःपातुदुरितादृतावृधोरक्षामाकिर्न्नोऽअघशꣳसऽईशत
॥४७॥सुपर्णंवस्ते॥मृगोऽअस्यादन्तोगोभिःसन्नद्धापततिप्रसूता॥यत्रा
नरःसञ्चविचद्रवन्तितत्रास्मभ्यमिषवःशर्म्मयꣳसन्॥४८॥ऋजीतेपरि
॥वृङ्धिनोऽश्माभवतुनस्तनूः॥सोमोऽअधिब्रवीतुनोदितिःशर्म्मयच्छतु॥४९॥
आजङ्घन्ति॥आजङ्घन्तिसान्वेषाञ्जघनाँ२॥उपजिघ्नते॥अश्वाजनिप्रचेतसोऽश्वा
न्त्समत्सुचोदय॥५०॥अहिरिवभोगैःपर्य्येतिबाहुञ्ज्यायाहेतिम्परिबाधमा- ६०
नः॥हस्तघ्नोविश्वावयुनानिविद्वान्पुमान्पुमाꣳसम्परिपातुविश्वतः॥५१

॥ वनस्पतेवीड्वङ्गः ॥ वनस्पतेवीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः ॥ गोभिः सन्नद्धो असि वीडयस्वास्थाता ते जयतु जेत्वानि ॥ ५२ ॥

दिवः पृथिव्याः ॥ दिवः पृथिव्याः पर्योज उद्भृतं वनस्पतिभ्यः पर्याभृतं सहः ॥ अपामोज्मानम्परि गोभिरावृतमिन्द्रस्य वज्रं हविषा रथं यज ॥ ५३

॥ इन्द्रस्य वज्रः ॥ इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः ॥ सेमान्नो हव्यदातिञ्जुषाणो देव रथ प्रति हव्या गृभाय ॥ ५४ ॥ उपश्वासय ॥ पृथिवीमुत द्याम्पुरुत्रा ते मनुतां विष्ठितञ्जगत् ॥ स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद्द

संहि वीयोऽअपसेधशत्रून्॥ ५५ ॥ आक्रन्दय ॥ आक्रन्दयबलमोजोनऽआधा उ॰अ॰
६१ निष्टनिहिदुरिताबाधमानः॥ अपप्रोथदुन्दुभेदुच्छुनाऽइतऽइन्द्रस्यमुष्टिरसि २९
वीडयस्व॥ ५६ ॥ आमूः ॥ आमूरजप्रत्यावर्तयेमाःकेतुमद्दुन्दुभिर्वावदीति॥
समश्वपर्णाश्चरन्तिनोनरोस्माकमिन्द्ररथिनोजयन्तु॥ ५७ ॥ आग्नेयःकृ
ष्णग्रीवः॥ सारस्वतीमेषीबभ्रुःसौम्यःपौष्णःश्यामःशितिपृष्ठोबार्हस्प
त्यः॥ शिल्पोवैश्वदेवऽऐन्द्रोरुणोमारुतःकल्माषऽऐन्द्राग्नःसंहितोधो ६१
रामःसावित्रोवारुणःकृष्णऽएकशितिपात्पेत्वः॥ ५८ ॥ अग्नयेनीकवते॥ अ

ग्नयेनीकवतेरोहिताञ्जिरनड्वानधोरामौसावित्रौपौष्णौ रजतनाभीवैश्वदेवौ
पिशङ्गौतूपरौमारुतःकल्माषऽआग्नेयःकृष्णोजः सारस्वतीमेषीवारुणः
पेत्वः॥ ५९॥ अग्नयेगायत्राय॥ त्रिवृतेराथन्तरायाष्टाकपालऽइन्द्रायत्रैष्टुभाय
पञ्चदशायबार्हतायैकादशकपालोविश्वेभ्योदेवेभ्योजागतेभ्यःसप्तदशेभ्योवै
रूपेभ्योद्वादशकपालोमित्रावरुणाभ्यामानुष्टुभाभ्यामेकविंशाभ्यांवैराजाभ्यां
पयस्याबृहस्पतयेपाङ्क्तायत्रिणवायशाक्वरायचरुःसवित्रऽऔपणिहायत्रय
स्त्रिंशायरैवतायद्वादशकपालःप्राजापत्यश्चरुरदित्यैविष्णुपत्न्यैचरुरग्न

संहि यैंद्वैश्वानरायद्वादशकपालोनुमत्याऽअष्टाकपालः॥६०॥ ४॥ इतिसंहिता- उ.अ.
६२ पाठेएकोनत्रिंशोऽध्यायः॥२९॥ देवसवितः॥ देवसवितः प्रसुवयज्ञम्प्रसुव
यज्ञपतिम्भगाय॥ दिव्योगन्धर्वः केतपूः केतन्नःपुनातुवाचस्पतिर्वाचन्नःस्व
दतु॥१॥ तत्सवितुः॥ तत्सवितुर्वरेण्यम्भर्गोदेवस्यधीमहि॥ धियोयोनःप्रचोद-
यात्॥२॥ विश्वानिदेवसवितर्दुरितानिपरासुव॥ यद्भद्रन्तन्नऽआसुव॥ ३॥
विभक्तारꣳहवामहे॥ विभक्तारꣳहवामहेवसोश्चित्रस्यराधसः॥ सवितारन्नृ ६२
चक्षसम्॥४॥ ब्रह्मणेब्राह्मणम्॥ ब्रह्मणेब्राह्मणङ्क्षत्रायराजन्यम्मरुद्भ्यो

Indira Gandhi National Centre for the Arts

वैश्यन्तपसेशूद्रन्तमसेतस्करन्नारकायवीरहणम्पाप्मनेक्लीबमाक्रयायाऽ
अयोगूङ्कामायपुँश्चलूमतिक्रुष्टायमागधम् ॥ ५ ॥ नृत्तायसूतम् ॥ नृत्तायसूतङ्गी
तायशैलूषन्धर्म्मायसभाचरन्नरिष्ठायैभीमलन्नर्म्मायरेभꣳहसायकारिमानन्दा
यस्त्रीषखम्प्रमदे कुमारीपुत्रम्मेधायैरथकारन्धैर्य्यायतक्षाणम् ॥ ६ ॥ तपसेकौ
लालम् ॥ तपसेकौलालम्मायायैकर्म्मारꣳरूपायमणिकारꣳशुभेवपꣳशर
रव्यायाऽइषुकारꣳहेत्यैधनुष्कारङ्कर्म्मणेज्याकारन्दिष्टायरज्जुसर्ज्जम्मृत्यवे
मृगयुमन्तकायश्वनिनम् ॥ ७ ॥ नदीभ्यः पौञ्जिष्ठम् ॥ नदीभ्यः पौञ्जिष्ठमृक्षी

Indira Gandhi National Centre for the Arts

संहि· काभ्योनैषादम्पुरुषव्याघ्रायदुर्म्मदङ्ग·न्धर्वाप्सरोभ्योव्रात्यम्प्रयुग्भ्यऽउन्म उ·अ·
६३ त्तꣳ·सर्प्पदेवजनेभ्योऽप्रतिपदमयेभ्यः कितवमीर्य्यतायाऽअकितवम्पि ३०
शाचेभ्योबिदलकारीँय्यातुधानेभ्यः कण्टकीकारीम्॥ ८ ॥सन्धयेजार
म्॥सन्धयेजारङ्गेहायोपपतिमार्त्यैपरिवित्तन्निर्ऋत्यैपरिविविदानमराध्या
ऽएदिधिषुःपतिन्निष्कृत्यैपेशस्कारीꣳसञ्ज्ञानायस्मरकारीम्प्रकामोद्या
योपसदंवर्णायानुरुधम्बलायोपदाम्॥९॥उत्सादेभ्यः कुब्जम्॥उत्सादेभ्यः ६३
कुब्जम्प्रमुदेवामनन्द्वार्भ्यःस्रामꣳस्वप्नायान्धमधर्म्मायबधिरम्पवित्राय

Indira Gandhi National Centre for the Arts

भिषजम्प्रज्ञानायनक्षत्रदर्शꣳशिक्षायैप्राश्निनमुपशिक्षायाऽअभि
प्राश्निनम्मर्यादायैप्रश्नविवाकम् ॥१०॥ अर्मेभ्योहस्तिपम् ॥ अर्मे
भ्योहस्तिपञ्जवायाश्वपम्पुष्ट्यैगोपालंवीर्यायाविपालन्तेजसेजपाल
मिरायैकीनाशꣳकिलालायसुराकारम्भद्रायगृहपंश्रेयसेवित्तधमाध्य
क्ष्यायानुक्षत्तारम् ॥११॥ भायैदार्वाहारम् ॥ भायैदार्वाहारम्प्रभायाऽअ
ग्नेरेधम्ब्रध्नस्यविष्टपायाभिषेक्तारंवर्षिष्ठायनाकायपरिवेष्टारन्देवलोकाय
पेशितारम्मनुष्यलोकायप्रकरितारꣳसर्वेभ्योलोकेभ्यऽउपसेक्तारमवऽऋ

संहि॰ त्वैद्युधायौपमन्थितारम्मेधायैवासःपल्पूलीम्प्रकामायरजयित्रीम्॥ उ॰अ॰
६४ १२॥ऋतयेस्तेनहृदयम्॥ऋतयेस्तेनहृदयंवैरहत्यायपिशुनंविविक्त्यै ३०
क्षत्तारमौपद्रष्ट्यायानुक्षत्तारम्बलायानुचरम्भूम्ने परिष्कन्दम्प्रियायप्रि
यवादिनमरिष्ट्याऽअश्वसादꣳस्वर्गायलोकायभागदुघंवर्षिष्ठायनाका
यपरिवेष्टारम्॥१३॥मन्यवेयस्तापम्॥मन्यवेयस्तापङ्क्रोधायनिसरंय्यो
गाययोक्तारꣳशोकायाभिसर्तारङ्क्षेमायविमोक्तारमुत्कूलनिकूलेभ्यस्त्रि ६६
ष्ठिनंवपुषेमानस्कृतꣳशीलायाञ्जनीकारीन्निर्ऋत्यैकोशकारीय्यमायासूम्

॥१४॥ यमायै यमसूम् ॥ यमायै यमसूमथर्वभ्योऽवतोकाꣳ संवत्सराय-
पर्यायिणीम्परिवत्सरायाविजातामिदावत्सरायातीत्वरीमिद्वत्सरायाति-
ष्कद्वरीं वत्सराय विजर्जराꣳ संवत्सराय पलिक्नीमृभुभ्योऽजिनसन्धꣳ सा-
ध्येभ्यश्चर्मम्नम् ॥१५॥ सरोभ्यो धैवरम् ॥ सरोभ्यो धैवरमुपस्थावरा-
भ्यो दाशं वैशन्ताभ्यो बैन्दं नड्वलाभ्यः शौष्कलम्पाराय मार्गारमवाराय के-
वर्त्तं तीर्थेभ्य आन्दं विषमेभ्यो मैनालꣳ स्वनेभ्यः पर्ण्णकं गुहाभ्यः किरात-
ꣳ सानुभ्यो जम्भकम्पर्वतेभ्यः किम्पूरुषम् ॥१६॥ बीभत्सायै पौल्कसम् ॥

बीभत्सायैपौल्कसंवर्णायहिरण्यकारन्तुलायैवाणिजम्पश्चादोषायग्ला
विनंविश्वेभ्योभूतेभ्यःसिध्मलम्भूत्यैजागरणमभूत्यैस्वपनमार्त्यैजनवा
दिनंव्यृद्ध्याऽअपगल्भꣳसꣳशरायप्रच्छिदम् ॥१७॥ अक्षराजायकितव
म् ॥ अक्षराजायकितवङ्कृतायादिनवदर्शन्त्रेतायैकल्पिनन्द्वापरायाधि-
कल्पिनमास्कन्दायसभास्थाणुम्मृत्यवेगोव्यच्छमन्तकायगोघातङ्क्षु
धेयोगांविकृन्तन्तम्भिक्षमाणऽउपतिष्ठतिदुष्कृतायचरकाचार्य्यम्पाप्म
नेसैलगम् ॥१८॥ प्रतिश्रुत्कायाऽअर्त्तनम् ॥ प्रतिश्रुत्कायाऽअर्त्तनङ्घोषा

यक्षमन्तीयबहुवादिनमनन्तायमूकꣳशब्दायाडम्बराघातम्महसेवी-
णावादङ्क्रोशायतूणवध्ममवरस्परायशङ्खध्मंवनायवनपमन्यतोऽरण्या
यदावपम् ॥१९॥ नर्म्मायपुँश्चलूम् ॥ नर्म्मायपुँश्चलूꣳहसायकारिंय्यादसे-
शाबल्याङ्ग्रामण्यङ्गणकमभिक्रोशकन्तान्महसेवीणावादम्पाणिघ्नन्तू-
णवध्मन्तान्नृत्तायानन्दायतलवम् ॥२०॥ अग्नयेपीवानम् ॥ अग्नयेपीवा-
नम्पृथिव्यैपीठसर्प्पिणंवायवेञ्चाण्डालमन्तरिक्षायवꣳशनर्त्तिनन्दिवेखल-
तिꣳसूर्य्यायहर्य्यक्षन्नक्षत्रेभ्यःकिर्म्मिरञ्चन्द्रमसेकिलासमह्नेशुक्ल

म्पिङ्गाक्षꣳ राज्ञ्यै कृष्णम्पिङ्गाक्षम् ॥ २१ ॥ अथैतान् ॥ अथैतानष्टौ विरूपा
नालभतेतिदीर्घञ्चातिह्रस्वञ्चातिस्थूलञ्चातिकृशञ्चातिशुक्लञ्चातिकृ
ष्णञ्चातिकुल्वञ्चातिलोमशञ्च ॥ अशूद्राऽअब्राह्मणास्ते प्राजापत्याः ॥
मागधः पुंश्चली कितवः क्लीबोऽशूद्राऽअब्राह्मणास्ते प्राजापत्याः ॥ २२ ॥
२ ॥ इति संहितापाठे त्रिंशत्तमोऽध्यायः ॥ ३० ॥ सहस्रशीर्षा पुरुषः ॥ सह
स्राक्षः सहस्रपात् ॥ स भूमिꣳ सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥ पु
रुषऽएव ॥ पुरुषऽएवेदꣳ सर्वं यद्भूतं यच्च भाव्यम् ॥ उतामृतत्वस्येशानो य



Indira Gandhi National Centre for the Arts

दन्नैनातिरोहैति॥ २ ॥ एतावानस्य ॥ महिमातोज्ज्यायाँश्चपूरुषः॥पा
दोस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि॥ ३ ॥ त्रिपादूर्ध्वः॥ त्रिपादूर्ध्व
ऽउदैत्पुरुषः पादोस्येहाभवत्पुनः॥ ततोविष्वङ्व्यक्रामत्साशनानशनेऽअ
भि॥ ४ ॥ ततोविराट्॥ ततोविराडजायतविराजोऽअधिपूरुषः॥सजातोऽअ
त्यरिच्यतपश्चाद्भूमिमथोपुरः॥ ५ ॥ तस्माद्यज्ञात्॥ तस्माद्यज्ञात्सर्वहुतः स
म्भृतंपृषदाज्यम्॥ पशूँस्ताँश्चक्रेवायव्यानारण्याग्राम्म्याश्चये॥ ६ ॥ त
स्म्माद्यज्ञात्॥ तस्म्माद्यज्ञात्सर्वहुतऽऋचःसामानिजज्ञिरे॥ छन्दाँसि

Indira Gandhi National Centre for the Arts

संहि जज्ञिरेतस्म्माद्यजुस्तस्म्मादजायत ॥७॥ तस्म्मादश्श्वाः ॥ तस्म्मादश्श्वा उ॰अ॰
६७ ऽअजादन्त येकेचोभयादतः ॥ गावोहजज्ञिरेतस्म्मात्तस्म्माज्जाताऽअजा ३१
वयः ॥८॥ तंय्यज्ञम् ॥ तंय्यज्ञम्बर्हिषिप्रौक्षन्पुरुषञ्जातमग्ग्रतः ॥ तेनदे
वाऽअजयन्तसाद्ध्याऽऋषयश्श्चये ॥९॥ यत्पुरुषम्॥ यत्पुरुषंव्व्यदधुः कति
धाव्व्यकल्प्पयन् ॥ मुखङ्किमस्स्यासीत्किम्बाहूकिमूरूपादाऽउच्च्यते ॥१०॥
ब्राह्मणोस्स्य॥ ब्राह्मणोस्स्यमुखमासीद्बाहूराजन्न्यः कृतः ॥ ऊरूतदस्स्य ६७
यद्वैश्यः पद्भ्याꣳशूद्रोऽअजायत॥११॥ चन्द्रमामनसः ॥ चन्द्रमामनसोजात

श्चक्षोः सूर्य्योऽअजायत॥ श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत॥
१२॥ नाभ्याऽआसीत्॥ नाभ्याऽआसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्त्तत
॥ पद्भ्याम्भूमिर्द्दिशः श्रोत्रात्तथा लोकाꣳ॥ऽअकल्पयन्॥१३॥ यत्पुरुषेण॥
हविषा देवा यज्ञमतन्वत॥ वसन्तोस्यासीदाज्यङ्ग्रीष्मऽइध्मः शरद्धविः
॥१४॥ सप्तास्यासन्॥ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः
॥ देवा यद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम्॥१५॥ यज्ञेन यज्ञम्॥ यज्ञेन
यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन्॥ ते ह नाकम्महिमानः सच

Indira Gandhi National Centre for the Arts

संहि· न्तयत्रपूर्वेसाद्ध्याःसन्तिदेवाः ॥१६॥ अद्भ्यःसम्भृतः ॥ पृथिव्यैरसाच्चवि उ·अ·
६८ श्वकर्म्मणःसमवर्त्तताग्ग्रे ॥ तस्यत्वष्टाविदधद्रूपमेतितन्मर्त्यस्यदेवत्व ३१
माजानमग्ग्रे ॥१७॥ वेदाहम् ॥ वेदाहमेतम्पुरुषम्महान्तमादित्यवर्ण्णन्तमसः
परस्तात् ॥ तमेवविदित्वातिमृत्युमेतिनान्यःपन्थाविद्यतेयनाय ॥१८॥ प्र
जापतिश्चरति ॥ प्रजापतिश्चरतिगर्ब्भेऽअन्तरजायमानोबहुधाविजायते ॥
तस्ययोनिम्परिपश्यन्तिधीरास्तस्मिन्हतस्थुर्ब्भुवनानिविश्वा ॥१९॥ योदे ६८
वेब्भ्यः ॥ योदेवेब्भ्यऽआतपतियोदेवानाम्पुरोहितः ॥ पूर्व्वोयोदेवेब्भ्योजातोन

मौरुचायब्राह्म्मये ॥ २० ॥ रुचम्ब्राह्म्मम् ॥ रुचम्ब्राह्म्मञ्जनयन्तोदेवाऽअ
ग्ग्रेतदब्रुवन् ॥ यस्त्वैवम्ब्राह्म्मणोविद्यात्तस्यदेवाऽअसन्वशे ॥ २१ ॥ श्रीश्च
॥ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥
इष्णन्निषाणामुम्मऽइषाणसर्वलोकम्मऽइषाण ॥ २२ ॥ इतिसंहितायां
एकत्रिंशोऽध्यायः ॥ ३१ ॥ तदेव ॥ तदेवाग्निस्तदादित्यस्तद्वायुस्तदुच-
न्द्रमाः ॥ तदेवशुक्रन्तद्ब्रह्मताऽआपः सप्रजापतिः ॥ १ ॥ सर्वेनिमेषाः ॥
सर्वेनिमेषाजज्ञिरेविद्युतः पुरुषादधि ॥ नैनमूर्द्ध्वन्नतिर्य्यञ्चन्नमध्येपरिजग्र

संहि॰ भतु॥२॥नतस्य॥प्रतिमाऽअस्तियस्यनाममहद्यशः॥हिरण्यगर्भऽ उ॰अ॰
६९ इत्येषमामाहिꣳसीदित्येषायस्मान्नजातऽइत्येषः॥३॥एषोह॥देवःप्र- ३२
दिशोनुसर्वाःपूर्वोहजातःसऽउगर्भेऽअन्तः॥सऽएवजातःसजनिष्यमा-
णःप्रत्यङ्जनास्तिष्ठतिसर्वतोमुखः॥४॥यस्माज्जातम्॥यस्माज्जात
न्नपुराकिंचनैवयऽआबभूवभुवनानिविश्वा॥प्रजापतिःप्रजयासꣳरराण-
स्त्रीणिज्योतींषिसचतेसषोडशी॥५॥येनद्यौः॥येनद्यौरुग्रापृथि ६९
वीचदृढायेनस्वस्तभितंयेननाकः॥योऽअन्तरिक्षेरजसोविमानःकस्मैदे

Indira Gandhi National Centre for the Arts

वायहविषाविधेम॥६॥यङ्क्रन्दसी॥यङ्क्रन्दसीऽअवसातस्तभानेऽअभ्यै
क्षेताम्मनसारेजमाने॥यत्राधिसूरऽउदितोविभातिकस्म्मैदेवायहविषाविधे
धेम॥आपोहयद्बृहतीर्य्यश्चिदापः॥७॥वेनस्तत्॥वेनस्तत्पश्यन्निहितङ्गु
हासद्यत्रविश्वम्भवत्येकनीडम्॥तस्मिन्निदꣳसञ्चविचैतिसर्वꣳसऽ
ऽओतःप्रोतश्चविभूःप्रजासु॥८॥प्रतत्॥प्रतद्वोचेदमृतन्नुविद्वान्गन्धर्वो
धामविभृतङ्गुहासत्॥त्रीणिपदानिनिहितागुहास्ययस्तानिवेदसपितुः
पितासत्॥९॥सनः॥सनोबन्धुर्ज्जनितासविधाताधामानिवेदभुवनानि

अग्नेषस्तिुस्स्वन्दमेमृ॥ ३ ॥ सुन्स्वकाहि॥ दैवहूत्तमा॒ऽ॥ अग्य्वौर॑ ॥अग्नेरथी-
रिव॥ निहोतापूर्व्यऽ॒सेदः॥ ४ ॥ द्वेविरूपे॥ चरतः स्वत्थैऽअन्यान्यावत्समुपधा
पयेते॥ हरिरन्यस्याम्भवतिस्वधावाञ्छुक्रोऽअन्यस्यान्ददृशेसुवर्च्चाः॥५॥
शतम्॥१७००॥अयमिह॥प्रथमोधायिधातृभिर्होतायजिष्ठोऽअध्वरेष्वीड्यः
॥यमप्नवानोभृगवोविरुरुचुर्वनेषुचित्रंविभ्वंविशेविशे॥ ६॥त्रीणिशता॥त्री-
सहस्राण्यग्निन्त्रिंशच्चदेवानवचासपर्य्यन्॥ औक्षन्घृतैरस्तृणन्बर्हिरस्मा
ऽआदिद्धोतारन्न्यसादयन्त॥ ७॥मूर्द्धानन्दिवः॥ मूर्द्धानन्दिवोऽअरतिम्पृथिव्या



Indira Gandhi National Centre for the Arts

धेय्यानुरमृतः आजातमग्निम् ॥ कविर्ठ॰ सम्म्राजमतिथिञ्जनानामा-
सन्नापात्रञ्जनयन्त देवाः॥८॥अग्निर्वृत्राणि॥जङ्घनद्द्रविणस्युर्विपन्य
या॥समिद्धः शुक्रऽआहुतः॥९॥विश्वेभिः सोम्म्यम् ॥ विश्वेभिः सोम्म्य
म्मद्ध्वग्नऽइन्द्रेणवायुना॥पिबामित्रस्यधामभिः॥१०॥आयत्॥आयदिषे
नृपतिन्तेजऽआनट्छुचिरेतोनिषिक्तन्द्यौरभीके॥अग्निः शर्द्धमनवद्यंय्युवान
ᳬस्वाद्ध्यञ्जनयत्सूदयच्च॥११॥अग्नेशर्द्ध॥महतेसौभगायतवद्द्युम्नान्युत्-
तमानिसन्तु॥सञ्जास्पत्यᳬ॰सुयममाकृणुष्वशत्रूयतामभितिष्ठामहाᳬसि

संहि सि ॥१२॥ त्वाᳬहि ॥ मन्द्रतममर्क्कशोकैर्व्ववृमहेमहिनः श्रोष्ष्यग्ने ॥ इन्द्रन्न उ॰ अ॰
७२ त्वाशवसादेवतावायुम्पृणन्तिराधसानृतमाः ॥१३॥ त्वेऽअग्ने ॥ स्वाहुतप्प्रि ३३
यासः सन्तुसूरयः ॥ यन्तारोयेमघवानोजनानामूर्वान्दयन्तगोनाम् ॥१४॥
श्रुधिश्श्रुत्कर्ण्ण ॥ श्रुधिश्श्रुत्कर्ण्णवह्निभिर्द्देवैरग्नेसयावभिः ॥ आसी
दन्तुबर्हिषिमित्त्रोऽअर्य्यमाप्प्रातर्य्यावाणोऽअध्वरम् ॥१५॥ विश्श्वेषाम
दितिः ॥ विश्श्वेषामदितिर्य्यज्ञियानांविश्श्वेषामतिथिर्म्मानुषाणाम् ॥ ७२
अग्निर्द्देवानामवऽआवृणानः सुमृडीकोभवतुजातवेदाः ॥१६॥ महोऽअ

ग्नेः॥ संमिधानस्यशर्म्मण्यनागामित्रेवरुणेस्वस्तये॥ श्रेष्ठेंस्यामसवि
तुःसवीमनितद्देवानामवोऽअद्यावृणीमहे॥ १७॥ आपश्चित्॥ आप-
श्चित्पिप्युस्तर्य्योनगावोनक्षन्नृतञ्जरितारस्तऽइन्द्र॥ याहिवायुर्न्ननियुतोनो
ऽअच्छात्वꣳहिधीभिर्द्दयसेविवाजान्॥१८॥गावऽउपा॥॥गावऽउपावतावतम्महीयज्ञ
स्यरप्सुदा॥उभाकर्ण्णाहिरण्यया॥ १९॥ यदद्य॥ सूरऽउदितेनागामित्रोऽ
अर्य्यमा॥ सुवातिसविताभगः॥ २०॥ आसुतेसिञ्चतश्रियꣳरोदस्योर
भिश्रियम्॥ रसादधीतवृषभम्॥ तम्प्रत्नथायंवेनः॥ २१॥ आतिष्ठन्तम्परि-

संहि आतिष्ठन्तम्परि विश्वेऽअभूषञ्छ्रियोवसानश्चरतिस्वरोचिः ॥ महत्तद्वृष्णो उ·अ·
७३ ऽअसुरस्यनामाविश्वरूपोऽअमृतानितस्थौ ॥ २२ ॥ प्रवं ॥ प्रवोमहेम ३३
न्देमा । नायांधसोर्च्चाविश्वानराय विश्वाभुवे । इन्द्रस्ययस्यसुमखंसहोम
हिश्रवोनृम्णञ्चरोदसीसपर्य्यतः ॥ २३ ॥ बृहन्नित् ॥ बृहन्निदिध्मऽएषा
म्भूरिशस्त्रम्पृथुःस्वरुः ॥ येषामिन्द्रोयुवासखा ॥ २४ ॥ इन्द्रेहि ॥ इन्द्रेहिम
त्स्यन्धसोविश्वेभिःसोमपर्वभिः ॥ महाँ ॥ ऽअभिष्टिरोजसा ॥ २५ ॥ इन्द्रो ७३
वृत्रम् ॥ इन्द्रोवृत्रमवृणोच्छर्द्धनीतिःप्रमायिनाममिनाद्वर्पणीतिः ॥ अहन्व्य

Indira Gandhi National Centre for the Arts

ठे॰समुद्राधुग्ग्वनैष्प्वाविन्द्वैनोऽअक्रूणोद्वाम्म्याणाम्॥२६॥कुतस्त्वम्॥कु
तस्त्वमिन्द्रमाहिनःसन्नेकोयासिसत्पते किन्तऽइत्था॥सम्पृच्छसेसमराणः
शुभानैर्वोचेस्तन्नोहरिवोयत्तेऽअस्मे॥महाँ२॥ऽइन्द्रोयओजसाकुदाचन
स्तरीरसिकुदाचनप्रयुच्छसि॥२७॥आतन्तऽइन्द्रायवःपनन्ताभियऽऊर्व
ङ्गोमन्तन्तितृत्सान्॥सकृत्स्वंय्येपुरुपुत्राम्महीथ्संसहस्रधारम्बृहतीन्दुदुक्ष
न्॥२८॥इमान्तै॥इमान्तेधियम्प्रभरेमहोमहीमस्यस्तोत्रेधिषणायत्तऽआ
नजे॥तमुत्सवेचप्रसवेचसासहिमिन्द्रन्देवासःशवसामदन्ननु॥२९॥बि-

संहि· भ्राड्बृहत् ॥ विभ्राड्बृहत्पिबतुसोम्यम्मध्वायुर्द्दधद्यज्ञपतावविह्रुतम् ॥ वा उ·अ·
७४ तजूतोजोऽअभिरक्षतित्मनाप्प्रजाःपुपोषपुरुधाविराजति ॥ ३० ॥ उदुत्य ३३
म् ॥ उदुत्यञ्जातवेदसन्देवंवहन्तिकेतवः ॥ दृशेविश्वायसूर्य्यम् ॥ ३१ ॥ ये
नापावक ॥ येनापावकचक्षसाभुरण्यन्तञ्जनाँ२ ॥ ऽअनु ॥ त्वंवरुणपश्यसि
॥ ३२ ॥ दैव्यावद्ध्वर्य्यूऽआगतꣳरथेनसूर्य्यत्वचा ॥ मद्ध्वायज्ञꣳसमञ्जाथे ॥ त
म्प्रत्नथायंवेनश्चित्रन्देवानाम् ॥ ३३ ॥ आनः ॥ आनऽइडाभिर्व्विदथेसुशस्तिवि ७४
श्वानरःसवितादेवऽएतु ॥ अपियथायुवानोमत्सथानोविश्वञ्जगदभिपि

त्वेमनीषा ॥ ३४ ॥ यदद्य ॥ कच्चवृत्रहन्नुदगाऽअभिसूर्य्य ॥ सर्व्वन्तदिन्द्र
तेवशे ॥ ३५ ॥ तरणिर्व्विश्वदर्शतः ॥ तरणिर्व्विश्वदर्शतोज्ज्योतिष्कृदसिसू-
र्य्य ॥ व्विश्वमाभासिरोचनम् ॥ ३६ ॥ तत्सूर्य्यस्य ॥ देवत्वन्तन्महित्वम्मद्ध्या
कर्त्तोर्व्विततꣳसञ्जभार ॥ यदेदयुक्तहरितः सधस्थादाद्रात्रीवासस्तनुतेसि
मस्मै ॥ ३७ ॥ तन्मित्रस्य ॥ तन्मित्रस्यव्वरुणस्याभिचक्षेसूर्य्योरूपङ्कृणुते-
द्द्योरुपस्थे ॥ अनन्तमन्यद्रुशदस्यपाजः कृष्णमन्यद्धरितः सम्भरन्ति ॥
३८ ॥ बण्महान् ॥ बण्महाꣳ२ऽअसिसूर्य्यबडादित्यमहाꣳ२ऽअसि ॥

संहि॰ महस्तेसतोमहिमापनस्यतेऽद्धादेवमहाँ२॥ऽअसि॥३९॥बट्सूर्य्यश्रव- उ॰अ॰
७५ सामहाँ२॥ऽअसिसह्नादेवमहाँ२॥ऽअसि॥ मह्नादेवानामसुर्य्यः पुरो- ३३
हितोविभुज्ज्योतिरदाब्भ्यम्॥४०॥आयन्तऽइवसूर्य्यम्॥आयन्तऽइवसू-
र्य्यंविश्वेदिन्द्रस्यभक्षत॥वसूनिजातेजनमानऽओजसाप्रतिभागन्नदीधिम
॥४१॥अद्यादेवाः॥अद्यादेवाऽउदितासूर्य्यस्यनिरंहसःपिपृतानिरवद्या
त्॥ तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीऽउतद्यौः॥४२॥ ७५
आकृष्णेन॥आकृष्णेनरजसावर्तमानोनिवेशयन्नमृतम्मर्त्यञ्च॥ हिरण्ययै

नसविता रथेना देवो याति भुवनानि पश्यन् ॥ ४३ ॥ प्र वां वृजे ॥ सुप्रया बर्हिरेषामा विश्पतीव वीरिट ऽ इयाते ॥ विशामक्तोरुषसः पूर्वहूतौ वायुः पूषा स्वस्तये नियुत्वान् ॥ ४४ ॥ इन्द्रवायू बृहस्पतिम् ॥ इन्द्रवायू बृहस्पतिम्मित्राग्निम्पूषणम्भगम् ॥ आदित्यान्मारुतङ्गणम् ॥ ४५ ॥ वरुणः प्राविता ॥ भुवन्मित्रो विश्वाभिरूतिभिः ॥ करतान्नः सुराधसः ॥ ४६ ॥ अधि नः ॥ अधि न ऽ इन्द्रैषां विष्णो सजात्यानाम् ॥ इता मरुतो ऽ अश्विना ॥ तम्प्रत्नथायं वेनो ये देवास ऽ आ न ऽ इडाभिर्विश्वेभिः सोमम्यम्मन्द्रो मा सश्चर्षणीधृतः

संहि· ॥४७॥ अग्नऽइन्द्र॥ वरुणामित्रदेवाः शर्द्धः प्रयन्तमारुतोतविष्णो॥ उ उ·अ·
७६ भानासत्यारुद्रोऽअधग्नाः पूषाभगः सरस्वतीजुषन्त॥ ४८॥ इन्द्राग्नीमित्रा ३३
वरुणा॥ इन्द्राग्नीमित्रावरुणादितिꣳस्वः पृथिवीन्द्याम्मरुतः पर्वताँ२॥
अपः॥ हुवेविष्णुम्पूषणम्ब्रह्मणस्पतिम्भगन्नुशꣳसꣳसवितारमूतये॥
४९॥ अस्मेरुद्राः॥ अस्मेरुद्रामेहनापर्वतासोवृत्रहत्येभरहूतौसजोषाः
॥ यः शꣳसतेस्तुवतेधायिपज्रऽइन्द्रज्येष्ठाऽअस्माँ२॥ ऽअवन्तुदेवाः॥ ७६
५०॥ अर्वाञ्चोऽअद्य॥ अर्वाञ्चोऽअद्याभवतायजत्राऽआवोहार्द्दिभयमा-

Indira Gandhi National Centre for the Arts

नोह्वयेयम् ॥ आन्इन्द्रोदेवानिजुरोवृकस्यआन्इन्द्रःतादेवपदौयजन्त्राः ॥५१
॥ विश्वेऽअद्य ॥ मरुतोविश्वेऽऊती विश्वेभवन्त्वग्नयःसमिद्धाः ॥ विश्वे
नोदेवाऽअवसागमन्तुविश्वमस्तुद्रविणंवाजोऽअस्मे ॥ ५२ ॥ विश्वेदेवाः ॥
शृणुतेमꣳ·हवम्मेयेऽअन्तरिक्षेयऽउपद्यविष्ठ ॥ येऽअग्निजिह्वाऽउतवायज-
त्राऽआसद्यास्मिन्बर्हिषिमादयद्ध्वम् ॥ ५३ ॥ देवेभ्योहि ॥ प्रथमंयज्ञिये
भ्योमृतत्वꣳ·सुवसिभागमुत्तमम् ॥ आदिद्दामानꣳ·सवितर्व्यूर्णुषेनूचीनाजी
विताम्मानुषेभ्यः ॥ ५४ ॥ प्रवायुम् ॥ प्रवायुमच्छाबृहतीमनीषाबृहद्रयिंविश्व

Indira Gandhi National

वीरठं·रथप्राम्॥ द्युतद्यामानियुतः पत्यमानः कविः कविमियक्षसि
प्रयज्यो॥५५॥इन्द्रवायूऽइमे॥सुताऽउपप्रयोभिरागतम्॥इन्दवोवामु
शन्तिहि॥५६॥मित्रठं·हुवे॥पूतदक्षंवरुणञ्चरिशादसम्॥धियंघृताची
ठंसाधन्ता॥५७॥दस्रायुवाकवः॥सुतानासत्यावृक्तबर्हिषः॥आयात-
ठं·रुद्रवर्तनी॥तम्प्रत्नथायंवेनः॥५८॥विदद्यदि॥विदद्यदीसरमारुग
णमद्रेर्म्महिपाथः पूर्व्यठं·सध्र्यक्कः॥अग्रन्नयत्सुपद्यक्षराणामच्छारवम्प्रथ ७७
माजानतीगात्॥५९॥नहिस्पशम्॥नहिस्पशमविदन्नन्यमस्माद्वैश्वान-

रासुरऽ एतारमग्ने३ः॥ एमैनमवृधन्नमृताऽ अमर्त्यंवैश्वानरक्षैत्रजित्यायदे-
वाः३॥ ६०॥उग्राविधनिना॥उग्राविधनिनामृधऽ इन्द्राग्नीहवामहे॥ तानोमृ
डातऽईदृशे॥६१॥उपास्मै॥ गायतानरः पवमानायेन्दवे॥ अभिदेवाइं॥ऽ
इयक्षते॥६२॥ येत्वा॥ हिहत्यैमघवन्नवर्द्धन्येशाम्बरेहरिवोयेगविष्टौ॥ये
त्वानूनमनुमदन्तिविप्राः पिबेन्द्रसोमꣳसगणोमरुद्भिः॥६३॥जनिष्ठाऽ
उग्रः३॥सहसेतुरायमन्द्रऽओजिष्ठोबहुलाभिमानः॥अवर्द्धन्निन्द्रम्मरुत
श्चिदत्रमातायद्वीरन्दधनद्धनिष्ठा॥६४॥आतु॥आतूनऽइन्द्रवृत्रहन्नस्मा

संहि. र्कमुँईमागहि ॥ महान्महीभिरूतिभिः ॥ ६५ ॥ त्वमिन्द्र ॥ त्वमिन्द्रप्रतूर्त्ति उ.अ.
७८ ष्वभिविश्वाऽअसिस्पृधः ॥ अशस्तिहाजनिताविश्वतूरसित्वन्तूर्य्यतरु- ३३
ष्यतः ॥ ६६ ॥ अनुते ॥ अनुतेशुष्मन्तुरयन्तमीयतुः क्षोणीशिशुन्नमातरा ॥
विश्वास्तेस्पृधः श्नथयन्तमन्यवेवृत्रंय्यदिन्द्रतूर्वसि ॥ ६७ ॥ यज्ञोदेवानाम् ॥
यज्ञोदेवानाम्प्रत्येतिसुम्नमादित्यासोभवतामृडयन्तः ॥ आवोर्वाचीसुमतिर्व्व
वृत्यादंहोश्चिद्याव्वरिवोवित्तरासत् ॥ ६८ ॥ अदब्धेभिः सवितः पायुभिष्ट्वँ- ७८
शिवेभिरद्यपरिपाहिनोगयम् ॥ हिरण्यजिह्वः सुवितायनव्यसेरक्षामाकिर्न्नो

ऽ अघशꣳसऽ ईशत ॥ ६९ ॥ प्रवीरया ॥ शुचयो दद्रिरे वामध्वर्युभि र्मधुमन्तः सुतासः ॥ वह वायो नियुतो याह्यच्छा पिबा सुतस्यान्धसो मदा य ॥ ७० ॥ गावऽउप ॥ गावऽउपावतावतम्महीयज्ञस्य रप्सुदा ॥ उभा कर्णा हिरण्यया ॥ ७१ ॥ काव्ययोराजानेषु ॥ काव्ययोराजानेषु क्रत्वा दक्षस्य दु रोणे ॥ रिशादसा सधस्थऽआ ॥ ७२ ॥ दैव्यावध्वर्यू ॥ दैव्यावध्वर्युऽआ ग तꣳरथेन सूर्यत्वचा ॥ मध्वा यज्ञꣳ समञ्जाथे ॥ तम्प्रत्नथायं वेनः ॥ ७३ ॥ तिरश्चीनो विततः ॥ तिरश्चीनो विततो रश्मिरेषामधः स्विदासी ३ दुपरि स्विदा

संहि ३त्॥रेतोधाऽआसन्म्महिमानंऽआसन्त्स्वधाऽअवस्तात्प्रयतिःपरस्तात्॥ उ॰अ॰
७९ ७४॥आरोदसीऽअपृणादास्वर्म्महज्जातंयदेनमपसोऽअधारयन्॥सोऽ ३३
अध्वरायपरिणीयतेकविरत्योनवाजसातयेचनोहितः॥७५॥उक्थेभिर्वृत्र
हन्तमा॥उक्थेभिर्वृत्रहन्तमायामन्दानाचिदागिरा॥आङ्गूषैराविवासतः॥७६
॥उपनः॥सुनवोगिरःशृण्वन्त्वमृतस्यये॥सुमृडीकाभवन्तुनः॥७७॥ब्रह्मा
णिमे॥मतयःशंसुतासःशुष्मऽइयर्तिप्रभृतोमेऽअद्रिः॥आशासतेप्रति ७९
हर्यन्त्युक्थेमाहरीवहतस्तानोऽअच्छ॥७८॥अनुत्तमाते॥मघवन्नकिर्नुनत्वा

वीर्यं ॥ ऽअस्तिदेवताविदानः ॥ नजायमानोनशतेनजातोयानिकरिष्याकृणु
हिप्रवृद्ध ॥ ७९ ॥ तदित् ॥ तदिदासभुवनेषुज्येष्ठंयतोजज्ञऽउग्रस्त्वेषनृम्णः
॥ सद्योजज्ञानोनिरिणातिशत्रूननुयंविश्वेमदन्त्यूमाः ॥ ८० ॥ इमाऽउत्वा ॥ पुरू
वसोगिरोवर्धन्तुयाममं ॥ पावकवर्णाःशुचयोविपश्चितोभिस्तोमैरनूषत ॥ ८१ ॥
यस्यायम् ॥ यस्यायंविश्वऽआर्योदासःशेवधिपाऽअरिः ॥ तिरश्चिदर्ये
रुशमेपवीरवितुभ्येत्सोऽअज्यतेरयिः ॥ ८२ ॥ अयंसहस्रम् ॥ अयंसह-
स्रमृषिभिःसहस्कृतःसमुद्रऽइवपप्रथे ॥ सत्यःसोऽअस्यमहिमागृणेशवो

संहि यज्ञेषुविप्रराज्ये॥८३॥अदब्धेभिः सवितः॥पायुभिष्ट्वꣳशिवेभिरद्यपरि उ॰अ॰
८० पाहिनोगयम्॥हिरण्यजिह्वः सुवितायनव्यसेरक्षामाकिर्नोऽअघशꣳसऽस ३३
ऽईशत॥८४॥आनः॥आनोयज्ञन्दिविस्पृशंवायोयाहिसुमन्मभिः॥अ
न्तःपवित्रेऽउपरिश्रीणानोयज्ञꣳशुक्रोऽअयामिते॥८५॥इन्द्रवायूसुसन्दृ
शा॥सुहवेहहवामहे॥यथानःसर्वऽइज्जनोनमीवःसङ्गमेसुमनाऽअसत्
॥८६॥ऋधगित्था॥समर्त्यःशशमेदेवतातये॥योनूनम्मित्रावरुणावभिष्टय ८०
ऽआचक्रेहव्यदातये॥८७॥आयातम्॥आयातमुपभूषतम्मध्वःपिबतमश्विना

ना॥दुग्धम्पयौव्वृषणाजेन्यावसुमानौमर्द्धिं हूमागतम्॥८८॥प्रैतु॥प्रैतुब्ब्र
ह्मणस्प्पतिः प्प्रदेव्व्येतुसूनृता॥अच्छावीरन्नर्य्यम्पङ्क्ति·राधसन्देवायज्ञन्नय
न्तुनः॥८९॥चन्द्रमाऽअप्प्स्वु॥चन्द्रमाऽअप्प्स्वन्तरासुपर्ण्णोधावतेदिवि॥
रयिम्पिशङ्ग·म्बहुलम्पुरुस्पृहꣳ·हरिरेतिकनिक्रदत्॥९०॥देवन्देवंव्वः॥दे
वन्देवंव्वोवसेदेवन्देवमभिष्टये॥देवन्देवꣳ·हुवेमव्वाजसातयेगृणन्तोदेव्व्या
धिया॥९१॥दिविपृष्ठः॥दिविपृष्ठोऽअरोचताग्निर्व्वैश्श्वानरोबृहन्॥क्ष्मया
वृधानऽओजसाचनोहितोज्ज्योतिषाबाधतेतमः॥९२॥इन्द्राग्नीऽअपात्॥

Indira Gandhi National Centre for the Arts

संहि इन्द्राग्नीऽअपादियम्पूर्वागात्पद्वतीभ्यः ॥ हित्वीशिरोजिह्वयावावदच्चरत्त्रिं उ.अ.
८१ ꣳशत्पदान्यक्रमीत् ॥९३॥ देवासोहि ॥ ष्मामनवेसमन्यवोविश्वेसा ३३
कꣳसरातयः ॥ तेनोऽअद्यतेऽअपरन्तुचेतुनोभवन्तुवरिवोविदः ॥९४॥
अपाधमत् ॥ अपाधमदभिशस्तीरशस्तिहाथेन्द्रोद्युम्न्याभवत् ॥ देवास्त
ऽइन्द्रसख्यायेमिरेबृहद्भानोमरुद्गण ॥९५॥ प्रवः ॥ प्रवऽइन्द्रायबृहतेम
रुतोब्रह्मार्चत ॥ वृत्रꣳहनतिवृत्रहाशतक्रतुर्वज्रेणशतपर्वणा ॥९६॥ अ ८१
स्येत् ॥ अस्येदिन्द्रोवावृधेवृष्ण्यꣳशवोमदेसुतस्यविष्णवि ॥ अद्यातमे-

Indira Gandhi National Centre for the Arts

स्यमहिमानमायवोनुष्टुवन्तिपूर्वथा॥ इमा ऽउंला यस्यायमयरं सहस्रमू
र्द्धऽऋषुर्णः॥१७॥ इतिसंहितापाठेत्रयस्त्रिंशोऽध्यायः॥३३॥ य
ज्जाग्ग्रतः॥ यज्जाग्ग्रतोदूरमुदैतिदैवन्तदुसुप्तस्यतथैवैति॥ दूरङ्गमञ्ज्यो
तिषाञ्ज्योतिरेकन्तन्मेमनः शिवसङ्कल्पमस्तु॥१॥ येनकर्म्माणि॥ येनकर्म्मा
ण्यपसोमनीषिणोयज्ञेकृण्वन्तिविदथेषुधीराः॥ यदपूर्वंय्यक्षमन्तः प्रजाना
न्तन्मेमनः शिवसङ्कल्पमस्तु॥२॥ यत्प्रज्ञानम्॥ यत्प्रज्ञानमुतचेताधृतिश्च
यज्ज्योतिरन्तरमृतम्प्रजासु॥ यस्मान्नऽऋतेकिञ्चनकर्म्मक्रियतेतन्मेमनः

शिवसङ्कल्पमस्तु ॥ ३ ॥ येनेदम् ॥ येनेदम्भूतम्भुवनम्भविष्यत्परिगृहीतम
मृतेनसर्व्वम् ॥ येनयज्ञस्तायतेसप्तहोतातन्मेमनः शिवसङ्कल्पमस्तु ॥ ४ ॥
यस्मिन्नृचः ॥ यस्मिन्नृचः सामयजूꣳषियस्मिन्प्रतिष्ठितारथनाभावि
वाराः ॥ यस्मिꣳश्चित्तꣳसर्व्वमोतम्प्रजानान्तन्मेमनः शिवसङ्कल्पमस्तु ॥ ५ ॥
सुषारथिरश्वानिव ॥ सुषारथिरश्वानिवयन्मनुष्यान्नेनीयतेभीशुभिर्व्वा-
जिनऽइव ॥ हृत्प्रतिष्ठंयदजिरञ्जविष्ठन्तन्मेमनः शिवसङ्कल्पमस्तु ॥ ६ ॥ ८२
पितुन्नु ॥ स्तोषम्महोधर्म्माणन्तविषीम् ॥ यस्यत्रितोव्योजसावृत्रंविपर्व्वमर्द-

यत्॥ ७॥ आन्वित्॥ अन्विदनुमतेत्वम्मन्यासैशञ्चनस्कृधि॥ क्रत्वेदक्षाय
नोहिनुप्रणऽआयूंषितारिषः॥ ८॥ शतम्॥ १८००॥ अनुनः॥ अनुनोद्या
नुमतिर्यज्ञन्देवेषुमन्यताम्॥ अग्निश्चहव्यवाहनोभवतन्दाशुषेमयः॥ ९॥
सिनीवालिपृथुष्टुके॥ सिनीवालिपृथुष्टुकेयादेवानामसिस्वसा॥ जुषस्वहव्यमाहु
तम्प्रजान्देविदिड्ढिनः॥ १०॥ पञ्चनद्यः॥ पञ्चनद्यःसरस्वतीमपियन्तिसस्रोत
सः॥ सरस्वतीतुपञ्चधासोदेशेभवत्सरित्॥ ११॥ त्वमग्ने॥ प्रथमोऽअङ्गिराऽ
ऋषिर्देवोदेवानामभवःशिवःसखा॥ तवव्रतेकवयोविद्मनापसोजायन्तमरुतोभ्राज

संहि हष्टयः॥१२॥त्वन्नः॥त्वन्नोऽअग्नेतवदेवपायुभिर्मघोनोरक्षतन्वश्चवन्द्य उ·अ·
८३ ॥त्रातातोकस्यतनयेगवामस्यनिमेषंरक्षमाणस्तवव्रते॥१३॥उत्तानायामव ३४
॥भराचिकित्वान्सद्यःप्रवीतावृषणञ्जजान॥अरुषस्तूपोरुशदस्यपाजऽइडा
यास्पुत्रोवयुनेजनिष्ट॥१४॥इडायास्त्वा॥पदेवयन्नाभापृथिव्याऽअधि॥जात
वेदोनिधीमह्यग्नेहव्यायवोढवे॥१५॥प्रमन्महे॥शवसानायशूषमाङ्गूषङ्गिर्व
णसेऽअङ्गिरस्वत्॥सुवृक्तिभिस्तुवतऽऋग्मियायार्चामार्कन्नरेविश्रुताय॥ ८२
१६॥प्रवः॥प्रवोमहेमहिनमोभरध्वमाङ्गूष्यंशवसानायसाम॥येनानः

Indira Gandhi National Centre for the Arts

पूर्वे पितरः पदज्ञाऽ अर्चन्तोऽ अङ्गिरसो गाऽ अविन्दन् ॥१७॥ इच्छन्तित्वा
॥ सोम्म्यासः सखायः सुन्वन्ति सोमन्दधति प्रयाᳬंसि ॥ तितिक्षन्तेऽ
अभिशस्तिञ्जनानामिन्द्रत्वदा कश्चनहि प्प्रकेतः ॥१८॥ नतें ॥ दूरे परमा-
त्ति द्रजाᳬंस्यातुप्प्रयाहि हरिवोहरिब्भ्याम् ॥ स्थिरायवृष्णोसवनाकृतेमायु
क्ताग्ग्रावाणः समिधानेऽअग्नौ ॥१९॥ अषाढंयुत्सु ॥ पृतनासुपप्रिᳬंस्व
र्षामप्सांवृजनस्यगोपाम् ॥ भरेषुजाᳬंसुक्षितिᳬं सुश्रवसञ्जयन्तन्त्वामन
नुमदेमसोम ॥२०॥ सोमोधेनुम् ॥ सोमोधेनुᳬं सोमोऽअर्वन्तमाशुᳬं सोमो

संहि वीरङ्कर्म्मण्यन्ददाति ॥ सादन्यं विदथ्यᳪ सभेयम्पितृश्श्रवणं योददाशद उ·अ·
८५ दस्म्मै ॥ २१ ॥ त्वमिमाः ॥ त्वमिमाऽओषधीः सोमविश्श्वास्त्वमपोऽअजन ३४
यस्त्वङ्गाः ॥ त्वमाततन्थोर्व्वन्तरिक्षन्त्वञ्ज्योतिषावितमोववर्त्थ ॥ २२ ॥ देवेन
नः ॥ देवेननोमनसादेवसोमरायोभागᳪसहसावन्नभियुध्य ॥ मात्वातनदी
शिषेवीर्य्यस्योभयेब्भ्यः प्रचिकित्सागविष्टौ ॥ २३ ॥ अष्टौवि ॥ अष्टौव्यख्य
त्ककुभः पृथिव्यास्त्रीधन्वयोजनासप्तसिन्धून् ॥ हिरण्याक्षः सवितादेव ८५
ऽआगाद्दधद्रत्नादाशुषेवार्य्याणि ॥ २४ ॥ हिरण्यपाणिः सविता ॥ विचर्ष

Indira Gandhi National Centre for the Arts

णिरुभे द्यावापृथिवी ऽ अन्तरीयते ॥ अपामीवामबाधते वेति सूर्य्यमभिकृ-
ष्णेन रजसा द्यामृणोति ॥ २५ ॥ हिरण्यहस्तो ऽ असुरः ॥ सुनीथः सुमृडी
कः स्ववांयात्वर्वाङ् ॥ अपसेधन्रक्षसो यातुधानानस्थाद्देवः प्रतिदोषङ्गृ
णानः ॥ २६ ॥ येते ॥ येते पन्थाः सवितः पूर्व्यासो रेणवः सुकृता ऽ अन्तरिक्षे
॥ तेभिर्नो ऽ अद्यपथिभिः सुगेभी रक्षा च नो ऽ अधि च ब्रूहि देव ॥ २७ ॥ उभा
पिबतम् ॥ उभापिबतमश्विनोभानः शर्म यच्छतम् ॥ अविद्रियाभिरूति-
भिः ॥ २८ ॥ अप्नस्वतीमश्विना ॥ अप्नस्वतीमश्विना वाचमस्मे कृतन्नो

संहि दस्रावृषणामनीषाम् ॥ अह्रुत्येवसेनिह्वयेवांवृधेचनोभवतंवाजसातौ ॥ उ॰अ॰
८५ २९ ॥ द्युभिरक्तुभिः ॥ द्युभिरक्तुभिः परिपातमस्मानरिष्टेभिरश्विनासौ ३४
भगेभिः ॥ तन्नोमित्रोवरुणोमामहन्तामदितिः सिन्धुः पृथिवीऽउतद्यौः
॥ ३० ॥ आकृष्णेन ॥ रजसावर्त्तमानोनिवेशयन्नमृतंमर्त्यञ्च ॥ हिरण्ययेन
नसवितारथेनादेवोयातिभुवनानिपश्यन् ॥ ३१ ॥ आरात्रि ॥ पार्थिवꣳ र
जः पितुरप्रायिधामभिः ॥ दिवः सदाꣳसिबृहतीवितिष्ठसऽआत्वेषंवर्त्तते ८५
तमः ॥ ३२ ॥ उषस्तत् ॥ उषस्तच्चित्रमाभरास्मभ्यंवाजिनीवति ॥ येनतोक

Indira Gandhi National Centre for the Arts

ञ्चुतनंयञ्चधामहे ॥ ३३ ॥ प्रातरग्निम् ॥ प्रातरग्निम्प्रातरिन्द्रꣳ हवामहे प्रा
तर्म्मित्रावरुणा प्प्रातरश्विना ॥ प्रातर्ब्भगम्पूषणम्ब्रह्मणस्पतिम्प्रातः सोम
मुतरुद्रꣳ हुवेम ॥ ३४ ॥ प्रातर्ज्जितम्भगम् ॥ प्रातर्ज्जितम्भगमुग्रꣳ हुवेम व
यम्पुत्रमदितेर्य्यो विधर्ता ॥ आध्रश्चिद्यम्मन्यमानस्तुरश्चिद्राजा चिद्यम्भ
गम्भक्षीत्याह ॥ ३५ ॥ भगप्प्रणेतः ॥ भगप्प्रणेतर्ब्भगसत्यराधो भगेमान्धिय
मुदवाददन्नः ॥ भगप्प्रणोजनयगोभिरश्वैर्ब्भग प्प्रनृभिर्नृवन्तः स्याम ॥ ३६
॥ उतेदानीम् ॥ उतेदानीम्भगवन्तः स्यामोतप्प्रपित्वऽउतमध्येऽअन्हाम् ॥

संहि॰ उतोदितामघवन्त्सूर्य्यस्यव्वयन्देवानाᳪसुमतौस्याम॥ ३७ ॥ भगऽएव॥ उ॰अ॰
८६ भगवाँ२ऽअस्तुदेवास्तेनव्वयम्भगवन्तः स्याम ॥ तन्त्वाभगसर्व्वऽइज्जोहवी ३४
तिसनोभगपुरऽएताभवेह ॥ ३८ ॥ समध्वराय ॥ समध्वरायोषसोनमन्तदधि-
क्रावेवशुचयेपदाय॥ आर्व्वाचीनंव्वसुविदम्भगन्नोरथमिवाश्श्वावाजिनऽआ
वहन्तु॥ ३९ ॥ अश्श्वावतीर्ग्गोमतीः॥ अश्श्वावतीर्ग्गोमतीर्न्नऽउषासोवीर
वतीः सदमुच्छन्तुभद्राः ॥ घृतन्दुहानाव्विश्श्वतः प्रपीतायूयंपातस्वस्तिभिः ८६
सदानः॥ ४० ॥ पूषन्तव ॥ व्व्रतेव्वयन्नरिष्येमकदाचन॥ स्तोतारस्तऽइहस्मसि-

सि ॥ ४१ ॥ पथस्प्पथः परिपतिम् ॥ पथस्प्पथः परिपतिंवचस्याकामेनकृ
तोऽअभ्यानडर्कम् ॥ सनोरासच्छुरुधश्चन्द्राग्राधियन्धियꣳसीषधातिप्र
पूषा ॥ ४२ ॥ त्रीणिपदाविचक्रमेविष्णुर्गोपाऽअदाभ्यः ॥ अतोधर्म्माणिधा
रयन् ॥ ४३ ॥ तद्विप्रासः ॥ तद्विप्रासोविपन्यवोजागृवाꣳसः समिन्धते ॥
विष्णोर्यत्परमम्पदम् ॥ ४४ ॥ घृतवतीभुवनानाम् ॥ घृतवतीभुवनानामभि-
श्रियोर्वीपृथ्वीमधुदुघेसुपेशसा ॥ द्यावापृथिवीवरुणस्यधर्म्मणाविष्कभि
तेऽअजरेभूरिरेतसा ॥ ४५ ॥ येनः सपत्नाऽअपतेभवन्त्विन्द्राग्निभ्यामव

Indira Gandhi National Centre for the Arts

बाधामहेतान्॥ वसवोरुद्राऽआदित्याऽउपरिस्पृशम्मोग्रञ्चेत्तारमधिरा 
जमक्रन्॥ ४६॥ आनासत्या॥ त्रिभिरेकादशैरिहदेवेभिर्यातम्मधुपेयम 
श्विना॥ प्रायुस्तारिष्टन्नीरपाꣳसि क्षतꣳसेधतन्द्वेषोभवतꣳसचाभुवा
॥ ४७॥ एषवः॥ एषवस्तोमोमरुतऽइयङ्गीर्म्मान्दार्य्यस्यमान्यस्यकारोः॥
एषायासीष्टतन्वेवयांविद्यामेषंवृजनञ्जीरदानुम्॥ ४८॥ सहस्तोमाःसहच्छ
न्दसः॥ सहस्तोमाःसहच्छन्दसऽआवृतःसहप्रमाऽऋषयःसप्तदैव्याः॥ 
पूर्वेषाम्पन्थामनुदृश्यधीराऽअन्वालेभिरेरथ्योनरश्मीन्॥ ४९॥ आयुष्यं

वर्च्चस्यम् ॥ आयुष्यंवर्च्चस्यꣳ रायस्पोषमौद्भिदम् ॥ इदꣳ हिरण्यंवर्च्च
स्वज्जैत्रायाविशतादुमाम् ॥ ५० ॥ नतत् ॥ नतद्रक्षाꣳसिनपिशाचास्तर-
न्तिदेवानामोजः प्रथमजꣳ ह्येतत् ॥ यो विभर्तिदाक्षायणꣳ हिरण्यꣳ स
देवेषुकृणुतेदीर्घमायुः समनुष्येषुकृणुतेदीर्घमायुः ॥ ५१ ॥ यदाबध्नन् ॥
यदाबध्नन्दाक्षायणा हिरण्यꣳ शतानीकायसुमनस्यमानाः ॥ तन्मऽ
आबध्नामिशतशारदायायुष्माञ्जरदष्टिर्यथासम् ॥ ५२ ॥ उतनः ॥ उत
नोहिर्बुध्न्यः शृणोत्वजऽएकपात्पृथिवीसमुद्रः ॥ विश्वेदेवाऽऋतावृधो

Indira Gandhi National Centre for the Arts

हुवानास्तुतामन्त्राः कविशस्ता ऽअवन्तु ॥ ५३ ॥ इमा गिरः ॥ इमा गिर ऽआ
दित्येभ्यो घृतस्नूः सनाद्राजभ्यो जुह्वा जुहोमि ॥ शृणोतु मित्रो ऽअर्य्य-
मा भगो नस्तुविजातो वरुणो दक्षो ऽअंशः ॥ ५४ ॥ सप्त ऽऋषयः ॥ सप्त ऽ
ऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादम् ॥ सप्तापः स्वपतो लो
कमीयुस्तत्र जागृतो ऽअस्वप्नजौ सत्रसदौ च देवौ ॥ ५५ ॥ उत्तिष्ठ ब्रह्मण-
स्पते देवयन्तस्त्वेमहे ॥ उप प्रयन्तु मरुतः सुदानव ऽइन्द्र प्राशूर्भवा सचा ॥ ८८
५६ ॥ प्रनूनम् ॥ प्रनूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम् ॥ यस्मिन्निन्द्रो

वरुणो मित्त्रोऽअर्य्यमा देवाऽओका छं सिचक्क्रिरे ॥ ५७ ॥ ब्रह्मणस्पन
ते ॥ ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयञ्च जिन्व ॥ विश्वन्तद्
भद्द्रं य्यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ॥ यऽइमा विश्वा विश्वकर्म्मा
योनः पिता न्नपते न्नस्य नो देहि ॥ ५८ ॥ ६ ॥ इति संहिता पाठे चतुस्त्रिं
शोऽध्यायः ॥ ३४ ॥ अपेतः ॥ अपेतो यन्तु पणयो सुम्म्ना देवपीयवः
॥ अस्य लोकः सुतावतः ॥ द्युभिरहोभिरक्तुभिर्व्यक्तं य्यमो ददात्ववसानं
मस्मै ॥ १ ॥ सविता नै ॥ सविता ते शरीरेभ्यः पृथिव्याल्लोकमिच्छतु ॥ तस्मै

सुञ्ज्यन्तामुस्त्रियोः॥२॥व्वायुःपुनातु॥सवितापुनात्वग्नेर्भ्राजसासूर्य्य
स्यवर्च्चसा॥विमुच्यन्तामुस्त्रियोः॥३॥अश्वत्थेवः॥अश्वत्थेवोनिषदं-
नम्पर्ण्णेवोव्वसतिष्कृता॥गोभाजऽइत्किलासथय त्सनवथपूरुषम्॥४॥
सवितातें॥शरीराणिमातुरुपस्थऽआवपतु॥तस्म्मैपृथिवि शम्भव॥५
॥प्रजापतौत्वा॥देवतायामुपोदकेलोकेनिदधाम्म्यसौ॥अपनःशोशुचदघ
म्॥६॥परंस्मृत्यो॥परंस्मृत्योऽअनुपरेहिपन्थांय्यस्तेऽअन्न्यऽइतरोदेवया
नात्॥चक्षुष्मतेशृण्वतेतेब्रवीमिमानःप्रजांरीरिषोमोतव्वीरान्॥७॥

शंवातः॥शꣳहितेघृणिःशन्तेभवन्त्विष्टकाः॥शन्तेभवन्त्वग्नयःपार्थि
वासोमात्वाभिशूशुचन्॥८॥कल्प्यन्तान्ते॥दिशस्तुभ्यमापः॥शिवस्तमाः
स्तुभ्यम्भवन्तुसिन्धवः॥अन्तरिक्षꣳशिवन्तुभ्यङ्कल्प्यन्तान्तेदिशःसर्वाः
॥९॥अश्मन्वतीरीयतेसꣳरभद्ध्वमुत्तिष्ठतप्रतरतासखायः॥अत्राजही
मोऽशिवायेऽअसञ्छिवान्वयमुत्तरेमाभिवाजान्॥१०॥अपाघम्॥अपाघ
मपकिल्बिषमपकृत्यामपोरपः॥अपामार्गत्वमस्मदपदुःष्वप्न्यꣳसुव
॥११॥सुमित्रियानः॥सुमित्रियानऽआपऽओषधयःसन्तुदुर्मित्रिया-

 

स्तस्मै सन्तु सन्त्वस्मान्द्वेष्टि यञ्च वयन्द्विष्मः ॥ १२ ॥ अनड्वाहमन्वारभामहे सौरभेयꣳ स्वस्तये । स नऽइन्द्रऽइव देवेब्भ्यो वह्निः सन्तारणो भव ॥ १३ ॥
उद्वयम् । उद्वयन्तमसस्परि स्वः पश्यन्तऽउत्तरम । देवन्देवत्रा सूर्य्यमगन्म ज्योतिरुत्तमम् ॥ १४ ॥ इमञ्जीवेब्भ्यः । परिधिन्दधामि मैषान्नु गादपरोऽअर्त्थमेतत् । शतञ्जीवन्तु शरदः पुरूचीरन्तर्म्मृत्युन्दधताम्पर्व्वतेन ॥ १५ ॥
अग्नऽआयूꣳषि । पवसऽआसुवोर्ज्जमिषञ्च नः । आरे बाधस्व दुच्छुनाम् ॥
१६ ॥ आयुष्मानग्ने । हविषा वृधानो घृतप्रतीको घृतयोनिरेधि । घृतम्पीत्वा

मधुचा रुगब्द्यौम्पितेवपुत्रमभिरक्षतादिमान्त्स्वाहा॥१७॥परीमे॥गा
मनेषतपर्य्यग्निमहृषत॥देवेष्वक्रतश्रवःकऽइमाँ२॥ऽआदधर्षति॥
॥१८॥क्रव्यादमग्निम्॥ क्रव्यादमग्निम्प्रहिणोमिदूरंयमराज्ज्यंगच्छ
तुरिप्रवाहः॥इहैवायमितरोजातवेदादेवेभ्योहव्यंवहतुप्रजानन्॥१९
॥वहवपाम्॥वहवपाञ्जातवेदःपितृभ्योयत्रैनान्वेत्थनिहितान्पराके॥
मेदसःकुल्याऽउपतान्स्रवन्तुसत्याऽएषामाशिषःसन्नमन्तांस्वाहा॥
२०॥स्योनापृथिवि॥नोभवानृक्षरानिवेशनी॥यच्छानःशर्म्मसप्रथाः॥

संहि· अपनःशोशुचदघम् ॥ २१ ॥ अस्म्मात्वम् ॥ अस्म्मात्वमधिजातोसित्व उ·अ·
९१ दयञ्जायताम्पुनः ॥ असौस्वर्गायलोकायस्वाहा ॥ २२ ॥ इतिसंहितापाठे ३५
पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥ ऋचंवाचम् ॥ ऋचंवाचम्प्रपद्येमनोय-
जुःप्रपद्येसामप्राणम्प्रपद्येचक्षुःश्रोत्रम्प्रपद्ये ॥ वागोजःसहौजोमयिप्रा
णापानौ ॥ १ ॥ यन्मे ॥ छिद्रञ्चक्षुषोहृदयस्यमनसोवातितृण्णम्बृहस्पति
र्म्मेतद्दधातु ॥ शन्नोभवतुभुवनस्ययस्पतिः ॥ २ ॥ भूर्भुवः ॥ भूर्भुवःस्वः ९१
॥ तत्सवितुर्वरेण्यम्भर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ ३ ॥

कयानः ॥ कयानश्चित्रऽआभुवदूतीसदावृधः सखा ॥ कयाशचिष्ठया-
वृता ॥ ४ ॥ कस्त्वा सत्योमदानाम्मꣳहिष्ठोमत्सदन्धसः ॥ दृढाचिदारु-
जेवसु ॥ ५ ॥ अभीषुणः ॥ सखीनामविताजरितॄणाम् ॥ शतम्भवास्यूति
भिः ॥ ६ ॥ कयात्वम् ॥ कयात्वन्नऽऊत्याभिप्रमन्दसेवृषन् ॥ कयास्तोतृभ्य
ऽआभर ॥ ७ ॥ इन्द्रोविश्वस्य ॥ राजति ॥ शन्नोऽअस्तुद्विपदेशञ्चतुष्पदे
॥ ८ ॥ शन्नोमित्रः शंवरुणः शन्नोभवत्वर्य्यमा ॥ शन्नऽइन्द्रोबृहस्प-
तिः शन्नोविष्णुरुरुक्रमः ॥ ९ ॥ शन्नोवातः ॥ पवताꣳशन्नस्तपतुसू

संहि· ॥ र्य्यः। शन्नः कनिक्रदद्देवः पर्ज्जन्यो अभिवर्षतु ॥ १० ॥ अहोनिशम् ॥ उ·अ·
९२ ॥ अहोनिशम्भव न्तु नः शᳪ रात्रीः प्रतिधीयताम् ॥ शन्न इन्द्राग्नी भ ॥ ३६
वतामवोभिः शन्न इन्द्रावरुणा रातहव्या ॥ शन्न इन्द्रापूषणा वाजसा
तौ शमिन्द्रासोमा सुविताय शंय्योः ॥ ११ ॥ शन्नः ॥ शन्नो देवीरभिष्टय
आपो भवन्तु पीतये ॥ शंय्योरभिस्रवन्तु नः ॥ १२ ॥ स्योनापृथिवि ॥ नो भ
वानृक्षरा निवेशनी ॥ यच्छा नः शर्म्मसप्रथाः ॥ १३ ॥ आपोहि ॥ ष्ठामयो ९२
भुवस्तान ऊर्ज्जे दधातन ॥ महेरणाय चक्षसे ॥ १४ ॥ योवः शिवतमो रस

स्तस्य भाजयतेह नः ॥ उशतीरिव मातरः ॥ १५ ॥ तस्मा ऽ अरम् ॥ तस्मा
ऽ अरङ्ग माम वो यस्य क्षयाय जिन्वथ ॥ आपो जनयथा च नः ॥ १६ ॥ द्यौः
शान्तिः ॥ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरो
षधयः शान्तिः ॥ वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः
सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ १७ ॥ दृते दृꣳह मा
मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम् ॥ मित्रस्याहञ्चक्षुषा
सर्वाणि भूतानि समीक्षे ॥ मित्रस्य चक्षुषा समीक्षामहे ॥ १८ ॥ दृते दृꣳ

हेमा ॥ जोत्कैसुन्दृशिजीव्यासुञ्ज्योत्कैसुन्दृशिजीव्यासम् ॥ १९ ॥ नमेस्ते
हरसेशोचिषेनमस्तेऽअस्त्वर्च्चिषे ॥ अन्न्याँस्तेऽअस्म्मत्तेपन्तुहेतयः पाव
कोऽअस्म्मब्भ्यंᳫ शिवोभव ॥ २० ॥ नमेस्ते ॥ऽअस्तुविद्युतेनमेस्तेस्तनयि
त्नवे ॥ नमेस्तेभगवन्नस्तुयतः स्वः समीहसे ॥ २१ ॥ यतोयतः समीहसेत
तोनोऽअभयङ्कुरु ॥ शन्नः कुरुप्रजाब्भ्योभयन्नः पशुब्भ्यः ॥ २२ ॥ सुमि
त्रियानः ॥ सुमित्रियानऽआपऽओषधयः सन्तुदुर्म्मित्रियास्तस्म्मैस
न्तुयोस्म्मान्द्वेष्टियञ्चवयन्द्विष्म्मः ॥ २३ ॥ तच्चक्षुः ॥ तच्चक्षुर्द्देवहितम्पु



Indira Gandhi National Centre for the Arts

रस्त्वोच्छुन्न्कृसमुच्चरत् ॥ पश्येमशरदःशतञ्जीवेमशरदःशतꣳ शृणुयामशरदःशतम्प्रब्रवामशरदःशतमदीनाःस्यामशरदःशतम्भूयश्चशरदःशतात् ॥ २४ ॥ इतिसंहितायांदीर्घपाठेषट्त्रिꣳशोऽध्यायः ॥ ३६ ॥

देवस्यत्वा ॥ सवितुःप्प्रसवेश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम् ॥ आददेनारिरसि ॥ १ ॥ युञ्जतेमनः ॥ युञ्जतेमनउतयुञ्जतेधियोविप्राविप्रस्यबृहतोविपश्चितः ॥ विहोत्रादधेवयुनाविदेकइन्मही देवस्यसवितुःपरिष्टुतिः ॥ २ ॥ देवीद्यावापृथिवी ॥ मुखस्यवामद्यशिरोराध्यासन्देवयजे

संहि॰ पृथिव्याः॥ मखायत्वा मखस्यत्वाशीर्ष्णे॥ ३ ॥देव्यौव म्न्यः॥ देव्यौव उ॰अ॰
९४ म्न्योमृतस्य प्रथमजा मखस्यवोद्यशिरोराध्यासन्देवयजने पृथिव्याः॥ ३७
मखायत्वा मखस्यत्वाशीर्ष्णे॥४॥शतम्॥१९००॥इयत्यग्रे॥इयत्यग्रऽआसी
न्मखस्यतेद्यशिरोराध्यासन्देवयजने पृथिव्याः॥ मखायत्वा मखस्यत्वा
शीर्ष्णे॥ ५ ॥इन्द्रस्यौजः॥ इन्द्रस्यौजस्थमखस्यवोद्यशिरोराध्यासन्दे
वयजने पृथिव्याःमखायत्वा मखस्यत्वाशीर्ष्णे ॥ मखायत्वा मखस्यत्वा ९४
शीर्ष्णे॥मखायत्वा मखस्यत्वाशीर्ष्णे ॥ ६ ॥प्रैतु॥ ब्रह्मणस्पतिः प्र

देद्ध्येतुसूनृता॥ अच्छावीरन्नर्ष्यम्पङ्क्तिराधसन्देवासुज्ञन्नयन्तुनः॥म
खायत्वामखस्यत्वाशीर्ष्णे॥ मखायत्वामखस्यत्वाशीर्ष्णे॥ मखाय
त्वामखस्यत्वाशीर्ष्णे ॥ ७ ॥ मखस्यशिरः ॥ मखस्यशिरोसि ॥ मखाय
त्वामखस्यत्वाशीर्ष्णे॥ मखस्यशिरोसि ॥ मखायत्वामखस्यत्वाशीर्ष्णे
॥ मखस्यशिरोसि ॥ मखायत्वामखस्यत्वाशीर्ष्णे ॥ मखायत्वामखस्यत्वा
शीर्ष्णे॥ मखायत्वामखस्यत्वाशीर्ष्णे॥ मखायत्वामखस्यत्वाशीर्ष्णे॥
८ ॥ अश्वस्यत्वा॥ वृष्णः शक्नाधूपयामिदेवयजनेपृथिव्याः॥ मखाय-

Indira Gandhi National Centre for the Arts

संहि॰ त्वा मुखस्य शीर्ष्णे ॥ अश्वस्य त्वा वृष्णः शक्ना धूपयामि देवयजने पृथि उ॰अ॰
९५ व्याः ॥ मखाय त्वा मुखस्य त्वा शीर्ष्णे ॥ अश्वस्य त्वा वृष्णः शक्ना धूपया ३७
मि देवयजने पृथिव्याः ॥ मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ मखाय त्वा मख
स्य त्वा शीर्ष्णे ॥ मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ मखाय त्वा मखस्य त्वा-
शीर्ष्णे ॥ ९ ॥ ऋजवे त्वा ॥ साधवे त्वा सुक्षित्यै त्वा ॥ मखाय त्वा मखस्य त्वा-
शीर्ष्णे ॥ मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ १० ॥ ९५
यमाय त्वा ॥ मखाय त्वा सूर्य्यस्य त्वा तपसे ॥ देवस्त्वा सविता मध्वानक्तु पृथि

व्याᳪ सुषᳪ स्पृशस्पाहि ॥ अर्चिरसि शोचिरसि तपोसि ॥११॥ अनाधृ
ष्टापुरस्तात् ॥ अनाधृष्टापुरस्ताद्ग्नेराधिपत्यऽआयुर्म्मेदाः पुत्रवतीद
क्षिणतऽइन्द्रस्याधिपत्येप्रजाम्मेदाः ॥ सुषदापश्चाद्देवस्यसवितुरा
धिपत्येचक्षुर्म्मेदाऽआश्रुतिरुत्तरतोधातुराधिपत्येरायस्पोषम्मेदाः ॥
विधृतिरुपरिष्टाद्बृहस्पतेराधिपत्यऽओजोम्मेदाविश्वाभ्योमानाष्ट्राभ्य
स्पाहिमनोरश्वासि ॥१२॥ स्वाहामरुद्भिः ॥ परिश्रीयस्वदिवᳪ सुषᳪ
स्पृशस्पाहि ॥ मधुमधुमधु ॥१३॥ गर्ब्भोदेवानाम् ॥ गर्ब्भोदेवानाम्पिता

Indira Gandhi National Centre for the Arts

संहि मेतीनाम्पतिः प्रजानाम् ॥ सन्देवोदेवेन सवित्रागतसꣳ सूर्य्येणरोच उ॰अ॰
९६ ते ॥ १४ ॥ समग्निः ॥ समग्निरग्निनागतसन्दैवेन सवित्रासꣳ सूर्य्येणा ३७
रोचिष्ट ॥ स्वाहा समग्निस्तपसागतसन्दैव्येन सवित्रासꣳ सूर्य्येणारूरु
चत ॥ १५ ॥ धर्त्ता दिवः ॥ धर्त्ता दिवो विभाति तपसस्पृथिव्या न्धर्त्ता देवो दे
वानाममर्त्यस्तपोजाः ॥ वाचमस्मे नियच्छ देवायुवम् ॥ १६ ॥ अपश्यम् ॥
गोपाम् ॥ अपश्यङ्गोपामनिपद्यमानमाच परा च पथिभिश्चरन्तम् ॥ सस ९६
ध्रीचीः स विषूचीर्वसान आवरीवर्त्ति भुवनेष्वन्तः ॥ १७ ॥ विश्वासा-

म्भुवाम् ॥ विश्वासाम्भुवाम्पते विश्वस्यम नसस्पते विश्वस्यवच्च-
स्पतेसर्वस्यवच्चसस्पते ॥ देवश्रुत्वन्देवधर्म्मदेवो देवान्पाह्यत्र प्रा-
वीरनुवान्देववीतये ॥ मधुमा । न्नीश्श्याम्मधुमाधूचीश्याम् ॥ १८ ॥ हृदेत्वा
॥ मनसेत्वा दिवेत्वासूर्य्यायत्वा ॥ ऊर्द्ध्वोऽ अ-ध्वरन्दिविदेवेषुधेहि ॥ १९ ॥
पितानः ॥ पितानोसिपितानोबोधिनमस्तेऽ अस्तुमामाहिᳬसीः ॥ त्व
ष्टृमन्तस्त्वासपेमपुत्रान्पशून्मयिधेहिप्रजामस्मासुधेह्यरिष्टाहᳬ-सु
हपत्याभूयासम् ॥ २० ॥ अहः केतुना ॥ जुषताᳬसुज्ज्योतिज्ज्योतिषा स्वा-

ह्रा ॥ रात्रिः केतुनाजुषताᳪं सुज्योतिर्ज्योतिषाᳪं स्वाहा ॥ २१ ॥ इति वाजसनेयसंहितायां दीर्घपाठे सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ देवस्यत्वा ॥

देवस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥ आददे दित्यै रास्नासि ॥ १ ॥ इडऽएहि ॥ इडऽएह्यदितऽएहि सरस्वत्येहि ॥ असावेह्यसावेह्यसावेहि ॥ २ ॥ अदित्यै रास्नासीन्द्राण्याऽउष्णीषः ॥ पूषासि घर्म्माय दीष्व ॥ ३ ॥ अश्विभ्यां पिन्वस्व सरस्वत्यै पिन्वस्वेन्द्राय पिन्वस्व ॥ स्वाहेन्द्रवत् स्वाहेन्द्रवत्स्वाहेन्द्रवत् ॥ ४ ॥ यस्ते ॥ स्तनः शशयो यो मयोभूर्यो

रत्नधा वसुविद्यः सुदत्त्रः ॥ येन विश्श्वा पुष्ष्यसि वार्य्याणि सरस्वति तमिह
धातवे कः ॥ उर्व्वन्तरिक्षमन्वेमि ॥ ५ ॥ गायत्त्रञ्छन्दः ॥ गायत्त्रञ्छन्दो-
सि त्रैष्टुभञ्छन्दोसि द्यावापृथिवीभ्यान्त्वा परिगृह्णाम्यन्तरिक्षेणोपयच्छा
मि ॥ इन्द्राश्विना मधुनः सारघस्य घर्म्मम्पात वसवो यजत वाट् ॥ स्वाहा सू
र्य्यस्य रश्मये वृष्टिवनये ॥ ६ ॥ समुद्राय त्वा ॥ वाताय स्वाहा सरिराय त्वा वा
ताय स्वाहा ॥ अनाधृष्याय त्वा वाताय स्वाहाऽप्रतिधृष्याय त्वा वाताय स्वाहा
॥ अवस्यवे त्वा वाताय स्वाहाऽशिमिदाय त्वा वाताय स्वाहा ॥ ७ ॥ इन्द्राय त्वा ॥

Indira Gandhi National Centre for the Arts

संहि· वसुमतेरुद्रवतेस्वाहेन्द्रायत्वादित्यवतेस्वाहेन्द्रायत्वाभिमातिग्घ्नेस्वाहा उ·अ·
९८ ॥सवित्रेत्वऽऋभुमतेविभुमतेवाजवतेस्वाहाबृहस्पतयेत्वाविश्श्वदेव्या ३८
वतेस्वाहा॥८॥यमायत्वाङ्गिरस्वतेपितृमतेस्वाहा॥स्वाहाघर्म्मायस्वाहा-
घर्म्मःपित्रे॥९॥विश्श्वाऽआशाः॥विश्श्वाऽआशादक्षिणसद्विश्श्वान्दे
वानयाडिह॥स्वाहाकृतस्यघर्म्मस्यमधोःपिबतमश्श्विना॥१०॥दिविधाः॥
दिविधाऽइमंय्यज्ञमिमंय्यज्ञन्दिविधाः॥स्वाहाग्नयेयज्ञियायशंय्यजुर्ब्भिः॥ ९८
११॥अश्श्विनाघर्म्मम्॥अश्श्विनाघर्म्मम्पातꣳहार्द्वानमहर्द्दिवाभिरूतिभिः

Indira Gandhi National Centre for the Arts

॥तन्न्नायिणेनमोद्यावापृथिवीब्भ्याम्॥१२॥अपातामश्श्विना॥घर्म्ममनुद्यावा
पृथिवीऽअमँऽसाताम्॥इहैवरातयः सन्तु॥१३॥इषेपिन्वस्व॥इषेपिन्वस्वो
र्ज्जेपिन्वस्वब्ब्रह्मणेपिन्वस्वक्षत्त्रायपिन्वस्वद्यावापृथिवीब्भ्याम्पिन्वस्व॥धर्म्मा
सिसुधर्म्मामेन्न्यस्म्मेनृम्णानि॥धारयब्ब्रह्मधारयक्षत्त्रन्धारयविशन्धारय॥१४॥स्वा
हापूष्णे॥शरसेस्वाहाग्ग्रावभ्भ्यःस्वाहाप्प्रतिरवेब्भ्यः॥स्वाहापितृब्भ्यऽऊर्द्ध्वबर्हिब्भ्यो
घर्म्मपावभ्भ्यःस्वाहाद्यावापृथिवीब्भ्याँस्वाहाविश्श्वेब्भ्योदेवेब्भ्यः॥१५॥स्वाहारुद्द्राय
रुद्द्रहूतयेस्वाहासञ्ज्योतिषाज्ज्योतिः॥अहः केतुनाजुषताँसुज्ज्योतिर्ज्ज्योतिषास्वा

संहि· हा॥रात्रिःकेतुनाजुषताꣳसुज्ज्योतिर्ज्ज्योतिषास्वाहा॥मधुहुतमिन्द्रतमेऽअग्नाव उ·अ·
९९ श्यामतेदेवघर्म्मनमस्तेऽअस्तुमामाहिꣳसीः॥१६॥अभीमम्॥अभीम- ३८
म्महिमादिवंविप्प्रोबभूवसप्प्रथाः॥उतश्श्रवसापृथिवीꣳसꣳसीदस्वमहाँ
२॥ऽअसिरोचस्वदेववीतमः॥विधूममग्नेऽअरुषम्मियेध्यसृजप्प्रशस्तद
र्शतम्॥१७॥यातेघर्म्मदिव्व्याशुग्ग्यागायत्र्याꣳहविर्द्धाने॥सातऽआप्प्या
यतान्निष्ट्यायतान्तस्यैतेस्वाहा॥यातेघर्म्मान्तरिक्षेशुग्ग्यात्रिष्टुब्भ्याग्नीध्रे॥ ९९
सातऽआप्प्यायतान्निष्ट्यायतान्तस्यैतेस्वाहा॥यातेघर्म्मपृथिव्व्याꣳशुग्ग्या

जगत्याᳬंसदस्या ॥ सातऽआप्प्यायतान्निष्ट्यायतान्तस्यैतेस्वाहा ॥
१८ ॥ क्षुम्भस्येत्वा ॥ पुरस्पोयुब्रह्मणस्तन्न्वम्पाहि ॥ विशास्त्वाधर्म्मणाव्वय
मनुक्रामामसुवितायनव्यसे ॥ १९ ॥ चतुःस्रक्तिर्न्नाभिः ॥ चतुःस्रक्ति-
र्न्नाभिर्ऋतस्यसप्रथाःसनोविश्वायुःसप्रथाःसनःसर्वायुःसप्रथाः
॥ अपद्वेषोऽअपह्वरोन्न्यव्रतस्यसश्चिम ॥ २० ॥ घर्म्मैतत् ॥ घर्म्मैतत्तेपुरीष
न्तेनवर्द्धस्वचाचप्प्यायस्व ॥ वर्द्धिषीमहिचव्वयमाचप्प्यासिषीमहि ॥ २१ ॥ अ
चिक्रदद्वृषाहरिर्म्महान्मित्रोनदर्शतः ॥ सᳬंसूर्य्येणदिद्युतदुदधिर्न्निधीः

संहि· ॥२२॥ सुमित्रियान॑ः ॥ सुमित्रियानुऽआपुऽ ओषधयः सन्तुदुर्म्मित्रिया उ·अ·
१०० स्तस्म्मैसन्तुयोस्म्मान्द्वेष्टियञ्चवयन्द्विष्म्मः ॥२३॥ उद्वयम् ॥ उद्वयन्तम- ३९
सुस्प्परिस्वः पश्श्यन्तुऽउत्तरम् ॥ देवन्देवत्रासूर्य्यमगन्म्मज्ज्योतिरुत्तमम् ॥
२४ ॥ एधोसि ॥ एधोस्येधिषीमहिसमिदसितेजोसितेजोमयिधेहि ॥ २५ ॥
यावतीद्यावापृथिवी ॥ यावच्चसप्तसिन्धवोवितस्थिरे ॥ तावन्तमिन्द्रतेग्ग्र
हमूर्ज्जागृह्णाम्म्यक्षितम्म्मयिगृह्णाम्म्यक्षितम् ॥ २६ ॥ मयिन्त्यत् ॥ मयि १००
त्यदिन्द्रियम्बृहन्म्मयिदक्षोमयिक्रतुः ॥ घर्म्मस्त्रिशुग्विराजतिविराजाज्ज्यो

तिषासहब्रह्मणातेजसासह ॥२७॥ पयसोरेतः ॥ पयसोरेतऽआभृतन्त
स्युदोहमशीमुत्तरामुत्तराᳪंसमाम् ॥ त्विषःसंवृक्क्रत्वेदक्षस्यतेसुषु–
म्णस्यतेसुषुम्म्णाग्निहुतः ॥ इन्द्रपीतस्यप्प्रजापतिभक्षितस्यमधुमत
ऽउपहूतऽउपहूतस्यभक्षयामि ॥२८॥ इतिअष्टत्रिंशोऽध्यायः ॥३८॥

Indira Gandhi National Centre for the Arts

स्वाहाप्प्राणेभ्यः ॥ स्वाहाप्प्राणेब्भ्यःसाधिपतिकेब्भ्यः ॥ पृथिव्यैस्वाहाग्न
येस्वाहान्तरिक्षायस्वाहावायवेस्वाहा ॥ दिवेस्वाहासूर्य्यायस्वाहा ॥१॥ दि
ग्भ्यःस्वाहा ॥ चन्द्रायस्वाहानक्षत्रेब्भ्यःस्वाहाब्भ्यःस्वाहावरुणायस्वाहा

॥नाभ्यैस्वाहा पूतायस्वाहा ॥ २ ॥ वाचेस्वाहा ॥ प्राणायस्वाहा ॥ प्राणा
यस्वाहा। चक्षुषेस्वाहा चक्षुषेस्वाहा ॥ श्रोत्रायस्वाहा श्रोत्रायस्वाहा ॥ ३
॥ मनसः कामम् ॥ मनसः काममाकूतिंवाचः सत्यमशीय ॥ पशूनाꣳरूप
मन्नस्यरसोयशः श्रीः श्रयताम्मयिस्वाहा ॥ ४ ॥ प्रजापतिः सम्भ्रियमा
णःसम्राड्सम्भृतोवैश्वदेवः संसन्नोघर्मः प्रवृक्तस्तेजऽउद्यतऽआ
श्विनः पयस्यानीयमानेपौष्णोविष्यन्दमानेमारुतः क्लथन् ॥ मैत्रःश
रसिसन्ताय्यमानेवायव्योह्रियमाणऽआग्नेयोहूयमानोवाग्घुतः ॥ ५ ॥

सविताप्प्रथमे ॥ हेन्नग्निर्द्वितीयेव्वायुस्तृतीयऽआदित्यश्चतुर्थेचन्द्रमाः
पञ्चमऽऋतुः षष्ठेमरुतः सप्तमेबृहस्पतिरष्टमे ॥ मित्रोनवमेव्वरुणो-
दशमइन्द्रऽएकादशोव्विश्वेदेवाद्द्वादशे ॥ ६ ॥ उग्ग्रश्च ॥ भीमश्चद्ध्वान्त-
श्चधुनिश्च ॥ सासहाँश्चाभियुग्ग्वाचव्विक्षिपः स्वाहा ॥ ७ ॥ अग्निंहृ
दयेन ॥ अग्निंहृदयेनाशनिंहृदयाग्ग्रेणपशुपतिङ्कृत्स्नहृदयेनभवं-
यक्ना ॥ शर्वम्मतस्नाब्भ्यामीशानम्मन्न्युनामहादेवमन्तःपर्शव्येनोग्ग्र
न्देवंव्वनिष्ठुनाव्वसिष्ठहनुः शिङ्गीनिकोश्याब्भ्याम् ॥ ८ ॥ उग्ग्रंल्लोहितेन ॥

संहि· मित्रꣳ सौव्रत्येन रुद्रन्दौर्व्रत्येनेन्द्रम्प्रक्रीडेन मरुतो बलेन साध्यान्प्रमुदा॥ भवस्य क उ·अ·
१०२ ण्ठ्यꣳ रुद्रस्यान्तःपार्श्व्यम्महादेवस्य यकृच्छर्वस्य वनिष्ठुः पशुपतेः पुरीतत्॥९॥ लोम ३९
भ्यः स्वाहा॥ लोमभ्यः स्वाहा त्वचे स्वाहा त्वचे स्वाहा लोहिताय स्वाहा लोहिताय
स्वाहा मेदोभ्यः स्वाहा मेदोभ्यः स्वाहा॥ माꣳसेभ्यः स्वाहा माꣳसेभ्यः स्वा
हा स्नावभ्यः स्वाहा स्नावभ्यः स्वाहास्थभ्यः स्वाहास्थभ्यः स्वाहा मज्जभ्यः
स्वाहा मज्जभ्यः स्वाहा॥ रेतसे स्वाहा पायवे स्वाहा ॥१०॥ आयासाय स्वाहा १०२
॥ प्रायासाय स्वाहा संयासाय स्वाहा वियासाय स्वाहा उद्यासाय स्वाहा॥

Indira Gandhi National

॥शुचेस्वाहाशोचतेस्वाहा शोचमानायस्वाहा शोकायस्वाहा॥११॥त
पसेस्वाहा॥तप्यतेस्वाहातप्यमानायस्वाहा तप्तायस्वाहा
धर्म्मायस्वाहा॥निष्कृत्यैस्वाहाप्रायश्चित्त्यैस्वाहाभेषजायस्वाहा॥१२॥
यमायस्वाहा॥यमायस्वाहान्तकायस्वाहामृत्यवेस्वाहा॥ब्रह्मणेस्वाहा-
ब्रह्महत्यायैस्वाहाविश्वेभ्योदेवेभ्यःस्वाहाद्यावापृथिवीभ्याᳫंस्वाहा॥
इतिएकोनचत्वारिᳫंशोऽध्यायः॥३९॥ ईशावास्यम्॥ ईशावास्यमिद
ᳫं·सर्व्वंयत्किञ्चजगत्याञ्जगत॥तेनत्यक्तेनभुञ्जीथामागृधः कस्यस्वि·

द्धनम् ॥ १ ॥ कुर्व्वन्नेव ॥ कुर्व्वन्नेवेहकर्म्माणिजिजीविषेच्छतꣳसमाः ॥ एव-
न्त्वयिनान्यथेतोऽस्तिनकर्म्मलिप्यतेनरे ॥ २ ॥ असुर्य्यानाम ॥ असुर्य्याना
मतेलोकाऽअन्धेनतमसावृताः ॥ ताँस्तेप्रेत्यापिगच्छन्तियेकेचात्महनो-
जनाः ॥ ३ ॥ अनेजदेकम् ॥ अनेजदेकम्मनसोजवीयोनैनद्देवाऽआप्नुव-
न्पूर्व्वमर्शत् ॥ तद्धावतोऽन्यानत्येतितिष्ठत्तस्मिन्नपोमातरिश्वादधाति ॥
॥ ४ ॥ तदेजति ॥ तदेजतितन्नैजतितद्दूरेतद्वन्तिके ॥ तदन्तरस्यसर्व्वस्यतदुसर्व्व
स्यास्यबाह्यतः ॥ ५ ॥ यस्तु ॥ सर्व्वाणिभूतान्यात्मन्नेवानुपश्यति ॥

सर्व्वभूतेषुचात्मानन्ततोनविचिकित्सति ॥ ६ ॥ यस्मिन्त्सर्व्वाणि ॥ भू
तान्यात्मैवाभूद्विजानतः ॥ तत्रकोमोहःकःशोकएकत्वमनुपश्यतः
॥ ७ ॥ सपरि ॥ सपर्य्यगाच्छुक्रमकायमव्रणमस्नाविरꣳशुद्धमपापविद्धम्
॥ कविर्म्मनीषीपरिभूःस्वयम्भूर्य्याथातथ्यतोर्थान्व्यदधाच्छाश्वती-
भ्यःसमाभ्यः ॥ ८ ॥ अन्धन्तमः ॥ प्रविशन्तियेसम्भूतिमुपासते ॥ ततोभू
यइवतेतमोयउसम्भूत्याꣳरताः ॥ ९ ॥ अन्यदेव ॥ अन्यदेवाहुःसम्भ
वादन्यदाहुरसम्भवात् ॥ इतिशुश्रुमधीराणांयेनस्तद्विचचक्षिरे ॥ १० ॥

॥सम्भूतिञ्च॥विनाशञ्चयस्तद्वेदोभयꣳसह॥विनाशेनमृत्युन्तीर्त्त्वा
सम्भूत्यामृतमश्नुते॥११॥अन्धतमः॥अन्धतमःप्रविशन्तियेविद्यामु
पासते॥ततोभूयऽइवतेतमोयऽउविद्यायाꣳरताः॥१२॥अन्यदेव॥अ
न्यदेवाहुर्विद्यायाऽअन्यदाहुरविद्यायाः॥इतिशुश्रुमधीराणांयेनस्त
द्विचचक्षिरे॥१३॥विद्याञ्च॥विद्याञ्चाविद्याञ्चयस्तद्वेदोभयꣳसह॥
अविद्ययामृत्युन्तीर्त्त्वाविद्ययामृतमश्नुते॥१४॥वायुरनिलम्॥वायुरनिल
ममृतमथेदम्भस्मान्तꣳशरीरम्॥ॐ३म्॥क्रतोस्मर॥क्लिबेस्मर ॥क्र

तꣳ स्म्मर ॥ १५ ॥ अग्ग्नेनय ॥ सुपथाराय ऽ अस्म्मान्विश्श्वानिदेवव्वयु

नानि व्विद्द्वान् ॥ युयोद्ध्यस्म्मज्जुहुराणमेनोभूयिष्ठान्तेनम ऽ उक्तिम्वि

धेम ॥ १६ ॥ हिरण्मयेनपात्रेण ॥ सत्यस्यापिहितम्मुखम् ॥ योसावादि

त्येपुरुषः सोसावहम् ॥ १७ ॥ ॐ३म् ॥ खम्ब्रह्म्म ॥ ॥ इतिवाजसने

यसꣳहितायान्दीर्घपाठेच्चत्वारिꣳशत्तमो ऽ ध्यायः ॥ ४० ॥ ॥ ॥

॥ ॥ श्रीमज्जगदीश्वरार्पणमस्तु ॥ ॥ शुभंभवतु ॥ ॥

Indira Gandhi National Centre for the Arts

इदं पुस्तकं मुंबय्यां श्रीकृष्णात्मजेन गंगाविष्णुना "बॉम्बे सिटी प्रेस"
यंत्रालये मुद्रापितम्. संवत् १९४४.

यह पुस्तक गंगाविष्णु श्रीकृष्णदासके पास मिलेगा.
ठिकाणा- श्रीवेंकटेश्वर प्रेस, मुंबादेवी बजार,
मुंबई.

# ग्रंथानुक्रम.

१ यजुर्वेदीयसंहिता, २ प्रतिज्ञासूत्र, ३ याज्ञवल्क्यशिक्षा, ४ अनुवाकसूत्र, ५ सर्वानुक्रम.

Indira Gandhi National Centre for the Arts

गंगाविष्णु श्रीकृष्णदास.
श्रीवेंकटेश्वरछापखाना मुंबई.
BOMBAY.

Indira Gandhi National
Centre for the Arts
IGNCA RAR
ACC No. R-732

इति शुक्लयजुर्वेदमाध्यंदिनीयसंहिता स०

Indira Gandhi National Centre for the Arts

1508